चौखम्बा संस्कृत सीरीज १०८

योगसिद्धान्तचन्द्रिका

डॉ० विमला कर्नाटक

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

चौखम्बा संस्कृत सीरीज

१०८

****

पातञ्जलयोगसूत्रव्याख्या

परमहंसपरिव्राजकाचार्य-श्रीनारायणतीर्थविरचिता

योगसिद्धान्तचन्द्रिका

(पाठभेदयुता-संशोधिता-परिवर्द्धिता-संपूर्णा च)

डॉ० विमला कर्नाटक

एम. ए., पी-एच. डी., विद्यालंकारः,

मीमांसाचार्यः (लब्धसुवर्णपदकम्) जर्मन डिप्लोमा

प्रोफेसर, संस्कृतविभागः काशी हिन्दू विश्वविद्यालयः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : चौखम्बा प्रेस, वाराणसी
संस्करण : प्रथम, वि० सं० २०५७, सन् २०००
मूल्य : रु० २००.००

ISBN : 81-7080-044 - 7

© चौखम्बा संस्कृत सीरीज आफिस

पोस्ट बॉक्स नं० १००८
के. ३७/९९, गोपाल मन्दिर लेन
गोलघर (मैदागिन) के पास, वाराणसी-२२१ ००१ (भारत)
फोन : ३३३४५८ (आफिस), ३३४०३२ एवं ३३५०२० (आवास)

अपरं च प्राप्तिस्थानम्

कृष्णदास अकादमी
पुस्तक प्रकाशक एवं वितरक
पोस्ट बॉक्स नं० ११९८ के. ३७/११८, गोपाल मन्दिर लेन
वाराणसी-२२१ ००१ (भारत)
फोन : ३३५०२०

CHOWKHAMBA SANSKRIT SERIES
108
*****

YOGASIDDHĀNTACANDRIKĀ

of

Srinarayanatirtha

(A Craitical Edition)

Edited by

Dr. Vimala Karnatak

Prof. & Head, Deptt. of Sanskrit
B.H.U. Varanasi

CHOWKHAMBA SANSKRIT SERIES OFFICE
VARANASI

Publisher : Chowkhamba Sanskrit Series Office , Varanasi.
Printer : Chowkhamba Press, Varanasi.

ISBN : 81-7080-044 - 7

© **CHOWKHAMBA SANSKRIT SERIES OFFICE**

K. 37/99, Gopal Mandir Lane
Near Golghar (Maidagin)
Post Box No. 1008, Varanasi-221 001 (India)
Phone : Off. 333458, Resi. : 334032 & 335020

Also can be had from

KRISHNADAS ACADEMY

Oriental Publishers & Distributors,
Post Box No. 1118
K. 37/118, Gopal Mandir Lane, Varanasi-221 001
Phone : 335020

पुरोवाक्

आधुनिके काले भौतिकपदार्थजनिततुष्टिसमुपलब्धये व्यपगतसिद्धान्तसरणिं शरणीकर्तुं भूतलव्याप्तिमतोपभोक्तृवादेन विवशीकृतो मानवः। स च दिग्भ्रमेण भ्रान्तः सन् प्रकृत्या सह अनुचितां क्रीडां कुर्वन् आस्ते। तथैवाऽऽसुरीसम्पद्विवशं गतः सन्नातङ्कवादमेव प्राणप्रदमिति मम्मन्यते। स्वीयपूर्वजानां गुणगणविलसितेषु ग्रन्थरत्नेषु समुपवर्णितानामादर्शसिद्धान्तानां कृते देदीयते तिलाञ्जलिम्। स्वान्तर्निहितसौजन्य-विकासप्रक्रियातः सर्वतोभावेनाऽवीभवत् पराङ्मुखः। तस्माद्दैहिकव्याधीनामपेक्षया मनसि समुत्पन्नाभिराधिभिः (मानसीव्यथाभिः) तस्य मूर्ध्नि विद्यमाना रुधिरप्रवाहिन्यो नाडिका मन्ये समुन्मथिताः। निराशयाऽसहिष्णुतया च समभिव्याप्तं तस्य शिरः। विस्फोटकपरिस्थितेर्निर्माणादर्वागेवाऽस्माभिः सतर्कैर्भवितव्यं, स्व-स्वरूपञ्चा-वगन्तुम्प्रयतनीयम्।

भारतीयदर्शनशास्त्राण्यवलम्ब्यैव स्व-स्वरूपावगमो भवितुं शक्यः, अस्मत्पूर्व-जैर्ऋषिभिः प्रणीताः सारगर्भिताः पवित्रा ग्रन्थाः शरणीकरणीयाः, बुद्धिशुद्धेरुपाया-श्चिन्तनीयाः, ते च पतञ्जलिमहर्षिणा विरचिते योगसूत्रे वर्णिताः। ज्ञानकर्मणोः सम्पा-दनसाधनेषु प्राधान्यं बुद्धेरेव, सैव **'चित्त'** शब्देन परिभाष्यते योगदर्शने। मस्तिष्कं बुद्धिश्चित्तं चेति पर्याया अनर्थान्तरमितियावत्। आङ्ग्लानां माइण्ड-(MIND) शब्देनापि इदं बुद्धितत्त्वमेवाभिव्यज्यते। अनेन बुद्धितत्त्वेनैव समग्रशरीररचनाया भावपक्षः समनु-प्राणितोऽस्ति। अतो बुद्धिविकासेन सहैव बुद्धिपरिष्कारोऽपि अनिवार्य एव। अन्यथा असन्तुलितं जीवनं, मानव-महत्त्वस्य विनाशकं भवति। अतस्तन्मा भूदिति प्रत्यहं लुप्तप्राययोगशास्त्रीयग्रन्थरत्नानां महर्षिरचितानां संरक्षणमाधुनिके युगेऽत्यन्तमावश्यक-मस्ति।

पातञ्जलयोगसूत्रमधिकृत्य विद्वदपश्चिमस्य भगवतो व्यासस्य भाष्यं सुतरां विश्रुतमस्ति विदुषां विद्यारसिकानाम्। तत्र तत्त्ववैशारदी-योगवार्त्तिकव्याख्याग्रन्थाना-मिव विद्वद्वरेण्य**श्रीनारायणतीर्था**ऽभिधानानां स्वामिपादानां विरचिता **योगसिद्धान्त-चन्द्रिका**ऽपि स्वमहत्त्वं विख्यापयन्ती विद्वत्समाजे समादरं लभमाना श्रद्धेया बोभवीति। अस्यां व्याख्यायां तीर्थपादैरुद्भाविता नैके नवीना विषयाः सन्ति, येचान्यैः पूर्वतनैर्व्याख्याकारैर्विद्वद्भिरनुद्भाविताः। एतद्व्याख्यया द्वादशदर्शनेष्वपि प्रकाण्ड-वैदुष्यविभूषितानां श्रीनारायणतीर्थस्वामिचरणानां सर्वेष्वपि शास्त्रेषु अकुण्ठिता गतिरिति

निश्चप्रचं भवति। स्वनिर्मितव्याख्यायां शास्त्रान्तरगतवाक्योद्धरणपुरःसरं स्वमत-परिपोषणञ्च यत्र-तत्र समकार्षीत्। तीर्थस्वामिपादाः शास्त्रीयचिन्तने सर्वथा सर्वदा च जागरूकाः सन्ति। अन्धश्रद्धापरवशःसन् किमपि कदापि न जल्पन्ति। तीर्थपादैः स्वविरचितव्याख्यायां योगलक्षणम्, **निद्रास्वरूपम्, स्मृतेः स्वरूपम्, प्रणवार्थ-विवेचनम्, ऋतम्भराप्रज्ञाया उपयोगः**, इत्यादिविषयेषु सन्देहबहुला ग्रन्थग्रन्थयः प्रश्नोत्तराभ्यां विश्लथिताः। पातञ्जले योगसूत्रे प्रयुज्यमाना **विषया०** (१/१५), **संज्ञा** (१/१५), **पुरुषख्यातेः** (१/१६), **उपायः** (२/२६) इत्यादयः शब्दाः, तेषां गांभीर्यञ्च बोधयितुं समर्था नारायणतीर्थस्वामिपादा एवेति मे विश्वासः। एतद्विरचितायां योगसिद्धान्त-चन्द्रिकाख्यायां व्याख्यायामेकत्र**भक्तियोगस्य** पराकाष्ठा चेत्, तर्हि अन्यत्र **हठयोगस्य** चरमोत्कर्षो दरीदृश्यते। अस्यां व्याख्यायाम**वतारवाद-षट्कर्म-षट्चक्र-कुण्डलिनी-शक्ति**प्रभृतिभिर्नूतनैर्विषयैः संवलितायां तदनुपमं दर्शनीय-सौन्दर्यं विद्यारसिकानां सरसां सहृदयानां हृदयं हठात्समाकर्षति। कृष्णादिचतुर्विधकर्मणां स्थापनं, शास्त्रान्तराणि विचिन्त्य विधाने तीर्थपादानां प्रखरतमप्रतिभाया एव निदर्शनम्।

श्रीनारायणतीर्थस्वामिनो गुरुचरणाः श्रीरामगोविन्दतीर्थस्वामिनः ई. सप्तदश शताब्द्यां स्वजनिमलभन्त। श्रीनारायणतीर्थस्वामिनां विरचिता अनेके ग्रन्थाः सन्ति। तथाहि सांख्यकारिकाव्याख्या **चन्द्रिका, भक्तिचन्द्रिका, भक्त्यधिकरणमाला, तत्त्वचन्द्रिका, न्यायकुसुमाञ्जलिः, सिद्धान्तबिन्दुः, विभावना, भाषापरिच्छेदः**, योगसूत्रस्य **सूत्रार्थबोधिनीवृत्तिश्चे**ति।

चौखम्भा संस्कृत सीरीज, वाराणसीतः ई. स. १९१० तमे वर्षे संस्कृतग्रन्थ-माला-संख्या १५४ तथा १५९-न्तर्गते योगदर्शनखण्डे मुद्रिता, या **योगसिद्धान्त-चन्द्रिका** सा खण्डिता आसीत्। समाधिपादीय—२३ तमसूत्रतः २६ सूत्रं यावद्-व्याख्यानं, तथा चतुर्थपादीय ३ सूत्रतः ३४ सूत्रं यावदेव व्याख्यानमिति खण्डितं संस्करणमस्ति। ततोऽद्ययावत्कालाऽवधौ उक्तव्याख्याया अन्यत् संस्करणं कुतश्चिदपि नहि प्रकाशितम्।

योगसिद्धान्तचन्द्रिकाख्याया व्याख्याया महत्त्वमुपयोगितां च विज्ञाय, अनवरत-मनुसन्धानकार्ये सँल्लग्ना, विदुषां विद्याव्यासङ्गिनां पक्षपातरहितानां सरसहृदयानां सादरं सम्मानिता विदुषीवरेण्या सुश्रीविमला कर्नाटकमहोदया, **मद्रदेशं** (मद्रास) **तञ्जोर-बंगलोर-मैसूर-मुंबई-पुणें-बडौदा-जयपुर-जोधपुर-अलबर-बीकानेर-इलाहाबाद-लखनऊ-मथुरा-वृन्दावनादिप्रदेशेषु** यानि प्राच्यविद्याशोधप्रतिष्ठानानि सन्ति, तत्र स्वयं गत्वा योगसूत्रव्याख्यापाण्डुलिपीनामध्ययनं कृतवती। महता प्रयासेन

योगसिद्धान्तचन्द्रिकायास्तिस्त्रः पाण्डुमातृकाः छायारूपाः सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयवाराणसीस्थसरस्वतीविद्याभवनतः, भाण्डारकरप्राच्यविद्याध्ययनशोध-प्रतिष्ठानपुण्यपत्तनतः, तथा केन्द्रीयप्राच्यविद्यापुस्तकालयमैसूरतश्च प्राप्ताः। तिसृषु पाण्डुमातृकासु लब्धास्वपि सरस्वतीविद्याभवनस्य पाण्डुमातृका सर्वाधिकं खण्डिता आसीत्। पुण्यपत्तनतः प्राप्ता पाण्डुमातृका सर्वाधिकं सुस्पष्टा, शुद्धा चास्ते, किन्तु तत्र योगसूत्रस्य चतुर्थपादीयपंचम (सू. ५म.) तः पञ्चदश (१५ सू.) सूत्रपर्यन्तं सूत्राणां व्याख्या नोपलभ्यते। संभवत एतावन्ति पत्राणि लुप्तप्रायाणि स्युः। मैसूरतः प्राप्ता पाण्डुमातृका सम्पूर्णा विद्यते। इयं पाण्डुमातृका १८६७ तमे वैक्रमाब्दे लिपिबद्धा वर्तते।

पाठकानां करकमलोपलब्धस्थानस्य प्रस्तुतसंस्करणस्य सम्पादनसमये मूलपुस्तकस्योपलब्धाभिश्चतसृभिः संवादोऽपि अवहितेन मनसा विहितोऽस्ति, एवं यत्र-यत्र यथावश्यकं टिप्पणी, पाठभेदाश्चापि प्रदर्शिताः। तत्र च योगसिद्धान्तचन्द्रिकाया मुद्रितसंस्करणं '**क**' नाम्ना, सरस्वतीविद्याभवनस्य पाण्डुमातृकासंस्करणं '**ख**' नाम्ना, पुण्यपत्तनस्थपाण्डुमातृका च '**ग**' नाम्ना एवं मैसूरस्थ पाण्डुमातृका '**घ**' नाम्ना अङ्किता वर्तते।

मन्ये नवति-(९०) वर्षेभ्यः पूर्वं प्रकाशितां खण्डितां व्याख्यां प्रपूर्य सम्पूर्ण-व्याख्यासम्पादनप्रयासं कृतवती सुश्री. कु. विमलाकर्नाटकविदुषी महोदया। प्रयासोऽयमनवरतपरिश्रमगर्भोऽद्य सफलतां गत इती वीक्ष्य मोमुदीति मदीयं मानसमिति अस्या विदुष्याः प्रशंसां कर्तुमहमहमिकया अग्रेसरं धावति।

योगशास्त्रानुसन्धातारोऽनेन संस्करणप्रकाशनेन निश्चितमेव लाभान्विता भविष्यन्तीति नास्त्यत्र संशीतिरिति—विश्वसिमि।

''वृद्धिम्प्राप्नोतु ते कीर्तिरित्याशीः सफला मम''

प्रतिक्षणं ते सुयशोवृद्धिर्भवतु, सर्वेष्वपि ज्ञानवर्धककार्येषु त्वं सफलताम-वाप्नुया इति शुभाशिषः समुल्लसन्तुतमाम्।

सर्वदैवशुभचिन्तकः

गुरुपूर्णिमायां तिथौ **गजाननशास्त्री मुसलगाँवकरः**

रविवासरे वि. सं. २०५७

दिनाङ्कः १६. ७. २०००

प्रस्तावना

उपभोक्तावाद के भूमण्डलीकरण ने मानव को भौतिक तुष्टि के लिये सिद्धान्तविहीन मार्ग को अंगीकार करने के लिये विवश कर दिया है। वह दिग्भ्रमित हो गया है। वह एक ओर जहाँ प्रकृति से खिलवाड़ करने लगा है, वहीं दूसरी ओर आसुरीवृत्ति के वशीभूत होकर उसने आतंकवाद को जीवन का पर्याय समझ लिया है। पूर्वजों के गौरवग्रन्थों में वर्णित आदर्शवाद के सिद्धान्तों को उसने तिलाञ्जलि दे दी है। अपने में अन्तर्निहित साधुता के विकास की प्रक्रिया से वह सर्वथा विमुख हो गया है। दुष्परिणाम सामने है कि शारीरिक व्याधियों की अपेक्षा मानसिक आधियों (व्यथाओं) ने उसके मस्तिष्क की रक्तवाहिनी शिराओं को झकझोर दिया है। हताशा एवं असहिष्णुता ने उसके मस्तिष्क पर अपनी दृढ शाखाएँ स्थापित कर ली हैं। विस्फोटक स्थिति बने, उससे पूर्व हमें सतर्क हो अपने स्वरूप को समझने का प्रयास करना चाहिए।

भारतीय दर्शनशास्त्र को अवलम्बन बनाकर हमें इसके समाधान का अन्वेषण करना होगा। ऋषि-मुनियों द्वारा प्रणीत सारगर्भित पावन ग्रन्थों की शरण में जाना होगा। बद्धि की परिशुद्धि के उपायों की ओर सचेष्ट होना होगा। योगदर्शन के प्रणेता महर्षि पतञ्जलि के योग सूत्र का तो मेरुदण्ड ही है—बुद्धि-परिष्कार। ज्ञान, कर्म के व्यापारों में प्रधानतम करण है—बुद्धि। योगशास्त्र में इसे चित्त शब्द से परिभाषित किया गया है। चित्त तथा बुद्धि ये दोनों पर्याय शब्द हैं। मस्तिष्क शब्द से भी यही बद्धितत्त्व गृहीत है। अंग्रेजी के माईन्ड (MIND) शब्दसे यही बुद्धि तत्त्व ध्वनित होता है। सम्पूर्ण शरीर-संरचना का भावपक्ष इसी बुद्धि से अनुप्राणित रहता है। अतः बद्धिविकास के साथ-साथ बुद्धिपरिष्कार की समानान्तर अपरिहार्यता है। अन्यथा असन्तुलित जीवन, मानव मूल्यों के विनाश का कारण बनता है। अतः लुप्तप्राय योगशास्त्र के गौरव ग्रन्थों का संरक्षण आज के युग में अत्यन्त प्रसंगिक बन गया है।

पतञ्जलिकृत योगसूत्र की टीकाओं में आचार्य व्यासदेव का योगभाष्य, जो अत्यन्त प्रसिद्ध है, उपजीव्य ग्रन्थ है। तत्त्ववैशारदी तथा योगवार्त्तिक जैसे व्याख्याग्रन्थों की तुलना में श्रीनारायणतीर्थकृत योगसिद्धान्तचन्द्रिका का महत्त्व अल्प नहीं है। योगसूत्र पर लिखी गई नारायणतीर्थ की योगसिद्धान्तचन्द्रिका उनकी मौलिक कृति है। व्यासभाष्यानुसारी इस टीका में नवीन विषयों की उद्‌भावना सर्वदर्शननिष्णात

श्रीनारायणतीर्थ की अप्रतिहत गति की परिचायिका है। इसमें स्वमतस्थापना हेतु प्रस्तुत युक्तियों को शास्त्रान्तरों के उद्धरणों द्वारा परिपुष्ट किया गया है। वे अपने पूर्ववर्ती योग के आचार्यों के मतों के अन्धपोषक नहीं हैं। इसमें योग का लक्षण, निद्रा का स्वरूप, स्मृति का सिद्धान्त, प्रणवार्थविवेचन, ऋतम्भरा प्रज्ञा की उपयोगिता आदि स्थलों की सन्देहात्मक गुत्थियों को प्रश्नोत्तर-शैली में सुलझाया गया है। योगसूत्र में प्रयुक्त **विषय०** (१/१५), **संज्ञा** (१/१५), **पुरुषख्यातेः** (१/१६), **उपायः** (२/२६) आदि शब्दों का गाम्भीर्य (तत्त्वार्थ) समझाने का सामर्थ्य नारायणतीर्थ में ही निहित था। योगसिद्धान्तचन्द्रिका में एक ओर भक्तियोग की पराकाष्ठा है, तो दूसरी ओर हठयोग का चरमोत्कर्ष है। **अवतारवाद, षट्कर्म, षट्चक्र, कुण्डलिनी शक्ति** आदि नवीन विषयों से यह उपबृंहित है। कृष्णादि चतुर्विध कर्म की स्थापना (४/७) में शास्त्रान्तरों का आश्रय ले जो व्याख्यान प्रस्तुत हुआ है, वह नारायणतीर्थ की मेधा का चूडान्त निदर्शन है।

सत्रहवीं शताब्दी के आचार्य श्रीनारायणतीर्थ के गुरु का नाम श्रीरामगोविन्दतीर्थ था। विद्वत्समाज में योगसिद्धान्तचन्द्रिका के अतिरिक्त श्रीनारायणतीर्थ के निम्नलिखित ग्रन्थ प्रसिद्ध हैं—**चन्द्रिका** (सांख्यकारिका की टीका), **भक्तिचन्द्रिका, भक्त्यधिकरणमाला, तत्त्वचन्द्रिका, न्यायकुसुमाञ्जलि, सिद्धान्तबिन्दु, विभावना, भाषापरिच्छेद** तथा **सूत्रार्थबोधिनी** (योगसूत्र की वृत्ति)।

उल्लेखनीय तथ्य यह है कि चौखम्भा संस्कृत सीरीज, वाराणसी से सन् १९१० ई० में संस्कृत ग्रन्थमाला संख्या १५४ तथा १५९ योगदर्शनम् खण्ड के अन्तर्गत प्रकाशित योगसिद्धान्तचन्द्रिका खण्डित संस्करण है। समाधिपाद के २३वें सूत्र से लेकर २६वें सूत्र तक की व्याख्या तथा चतुर्थपाद की सूत्र-संख्या ३ से लेकर ३४वें सूत्र की व्याख्या तक यह संस्करण खण्डित है। इसके अतिरिक्त इस टीका का कोई अन्य संस्करण कहीं से भी अद्यावधि प्रकाशित नहीं हुआ है।

योगसिद्धान्तचन्द्रिका टीका की उपयोगिता एवं उसकी महत्ता को दृष्टि में रखते हुए मैंने **मद्रास, तञ्जोर, बंगलोर, मैसूर, मुम्बई, पूना, बडोदरा, जयपुर, जोधपुर, अलवर, बीकानेर, इलाहाबाद, लखनऊ, मथुरा, वृन्दावन** आदि प्रदेशों में स्थित प्राच्यविद्या-शोधप्रतिष्ठानों से सम्पर्क स्थापित किया। यहाँ के शोधप्रतिष्ठानों में व्यक्तिगतरूप से उपस्थित होकर योगसूत्र पर लिखी गई पाण्डुमातृकाओं का अध्ययन किया। इस प्रयास में योगसिद्धान्तचन्द्रिका की तीन पाण्डुमातृकाओं की छायाप्रतियाँ—सरस्वतीविद्याभवन, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, भण्डारकर प्राच्य

विद्या अध्ययन एवं शोध प्रतिष्ठान, पूना तथा केन्द्रीय प्राच्य विद्या पुस्तकालय, मैसूर विश्वविद्यालय, मैसूर से प्राप्त हो सकीं।

योगसिद्धान्तचन्द्रिका की उपलब्ध तीनों पाण्डुमातृकाओं में भी सरस्वती-विद्याभवन वाराणसी की पाण्डुमातृका (क्रम संख्या २९८००, पत्र संख्या १-३२४, आकार ८.२ X ६.६) सर्वाधिक खण्डित है। पूना से हस्तगत योगसिद्धान्तचन्द्रिका की पाण्डुमातृका (क्रमसंख्या ६१३-१८८७-९१) सर्वाधिक सुस्पष्ट एवं शुद्ध है, किन्तु एक न्यूनता यह है कि इसमें योगसूत्र के चतुर्थपाद के ५वें सूत्र से लेकर १५वें सूत्र तक की व्याख्या नहीं मिलती है। सम्भवत: सम्बन्धित पाण्डुपत्र लुप्तप्राय हो गये हों। योगसिद्धान्तचन्द्रिका की मैसूरस्थ पाण्डुमातृका (क्रमसंख्या ३५०७६, ३५०७७) सम्पूर्ण है। यह पाण्डुमातृका विक्रम संवत् १८६७ में लिखी गई है।

प्रस्तुत संस्करण का सम्पादन कार्य करते समय मैंने योगसिद्धान्तचन्द्रिका की उपलब्ध चारों प्रतियों का अक्षरश: तुलनात्मक अध्ययन किया है एवं आवश्यकतानुसार टिप्पणी में पाठभेदों का उल्लेख किया है। ऐसा करते समय मैंने योगसिद्धान्तचन्द्रिका के मुद्रित संस्करण को **'क'** नाम से, सरस्वतीविद्याभवनस्थ पाण्डुमातृका को **'ख'** नाम से, पूनास्थित पाण्डुमातृका को **'ग'** नाम से तथा मैसूरस्थ पाण्डुमातृका को **'घ'** नाम से चिह्नित किया है।

उल्लिखित पाण्डुमात्रिकाओं के अक्षरश: अनुशीलन द्वारा पाठभेदों का यथास्थान संकेत करते हुए संस्कृतटीका **योगसिद्धान्तचन्द्रिका** को संशोधित करने का एक ओर प्रयास किया है तो दूसरी ओर उसमें उद्धृत उद्धरणों के आकरग्रन्थों का यथासाध्य अन्वेषण करते हुए योग के पारिभाषिक शब्दों के लक्षणपरक वाक्यांशों का संग्रह कर प्रस्तुत संस्करण को परिवर्द्धित किया है। योगसिद्धान्तचन्द्रिका संस्कृत टीका के इस अखण्डित, संशोधित एवं परिवद्धित संस्करण का प्रकाशन, जो भगीरथ प्रयास का सुमधुर फल है, मेरे उस चिरप्रतीक्षित संकल्प का परिचायक है, जिसका बीज तीन दशक पूर्व पी-एच.डी. उपाधिहेतु शोध के अध्ययन काल में रोपित हुआ था। कालक्रम से अनेक संकल्पों को पूर्ण होता हुआ देख एक ओर सफल श्रम को जहाँ बौद्धिक तुष्टि प्राप्त हुई है, वहीं दूसरी ओर अन्य संकल्पों को पूर्ण करने में आत्मविश्वास जागरित हुआ है।

इस संकल्प-सिद्धि में पूर्व उल्लिखित संस्कृत-शोध-प्रतिष्ठानों के निदेशकों का पूर्ण सहयोग एवं महामहोपाध्याय राष्ट्रपतिपुरस्कारप्राप्त डॉक्टर गुरुवर्य श्रद्धेय गजाननशास्त्री मुसलगांवकर जी की अहेतुकी कृपा रही है। अत: सम्बन्धित

व्यक्त करती हूँ तथा आचार्यप्रवर परम श्रद्धेय गुरुवर्य डॉ. गजाननशास्त्री जी को शतशः नमन करती हूँ। उन्होंने मेरे अनुरोध पर पुरोवाक् लिखकर मुझे उपकृत किया है। पुरोवाक् को राष्ट्रभाषा हिन्दी में लिखने का परामर्श भी उन्हीं का रहा। अन्त में विद्या की अधिष्ठात्री वीणावादिनी माँ सरस्वती देवी से प्रार्थना करती हूँ कि वे मेरी लेखनी को उत्तरोत्तर प्रौढता प्रदान करती रहें और मेरी योग-साधना की सफल प्रस्तुति, संस्कृत के शोधार्थियों के लिये, पूर्ववत् नूतन ग्रन्थों के प्रणयन द्वारा होती रहे।

श्रावण पूर्णिमा
विक्रम संवत् २०५७
दिनाङ्क १५. ८. २००० विमला कर्नाटक

No: 6/3 New No:

of 1887-91 Section.

Name: पातंजलसूत्र टीका

Author. नारायणतीर्थ Age Samvat AD

Extent: foll. 43 lines. 17

50-7=43 letters. 64

folios 41-47 wanting









पातञ्जलदर्शनविषयसूची
योगसिद्धान्तचन्द्रिकाऽऽख्यटीकानुसारिणी

विषयः	पादसूत्रम्	पृष्ठ-संख्या
मंगलाचरणम्		
योगशास्त्रारम्भः	१/१	३
योगलक्षणम्	१/२	३
निरोधकाले चितः स्वरूपमात्रावस्थानम्	१/३	३
व्युत्थानकाले चितो वृत्तिसारूप्यम्	१/४	९
वृत्तीनां पञ्चप्रकारत्वम्	१/५	९
पञ्चवृत्त्युद्देशः	१/६	१०
प्रमाणवृत्तिविभागम्	१/७	१०
विपर्ययवृत्तिलक्षणम्	१/८	१२
विकल्पवृत्तिलक्षणम्	१/९	१२
निद्रावृत्तिलक्षणम्	१/१०	१३
स्मृतिवृत्तिलक्षणम्	१/११	१७
वृत्तीनां निरोधोपायः	१/१२	१९
अभ्यासलक्षणम्	१/१३	२०
अभ्यासस्य दृढभूमित्वम्	१/१४	२१
अपरवैराग्यलक्षणम्	१/१५	२१
परवैराग्यलक्षणम्	१/१६	२२
सम्प्रज्ञातसमाधिलक्षणविभागौ	१/१७	२३
असम्प्रज्ञातसमाधिलक्षणम्	१/१८	२३
भवप्रत्ययाधिकारिकथनम्	१/१९	२४
उपायप्रत्ययाधिकारिकथनम्	१/२०	२४
उपायतारतम्येन फलतारतम्यम्	१/२१, २२	२५
ईश्वरचिन्तनस्यापि निरोधसमाध्युपायत्वम्	१/२३	२६
ईश्वरलक्षणम्	१/२४	२८

विषयः	पादसूत्रम्	पृष्ठ-संख्या
ईश्वरस्य सर्वज्ञत्वसाधनम्	१/२५	३३
ईश्वरस्य श्रेष्ठतमत्वम्	१/२६	३४
ईश्वरस्य वाचकत्वम्	१/२७	४०
ईश्वरप्रणिधानम्	१/२८	४४
ईश्वरप्रणिधानफलम्	१/२९	४६
अन्तरायकथनम्	१/३०, ३१	४८
प्रेमाख्याभ्यासकथनम्	१/३२	५१
चर्यायोगकथनम्	१/३३	५२
हठयोगकथनम्	१/३४	५३
लक्ष्ययोगस्वरूपोपायान्तरकथनम्	१/३५	५३
ब्रह्मयोगं शिवयोगञ्च स्वरूपम्	१/३६	५४
वासनायोगकथनम्	१/३७	५५
वासनायोगस्याऽवान्तरत्वम्	१/३८	५६
ध्यानयोगकथनम्	१/३९	५६
सिद्धियोगस्य समाध्यनुकूलत्वम्	१/४०	६३
लययोगकथनम्	१/४१	६४
सवितर्कासमापत्तिलक्षणम्	१/४२	६५
निर्वितर्कासमापत्तिलक्षणम्	१/४३	६५
सविचारानिर्विचारासमापत्तिलक्षणम्	१/४४	६५
सूक्ष्मविषयत्वावधिकथनम्	१/४५	६५
समापत्तीनां सबीजत्वकथनम्	१/४६	६६
निर्विचारोत्कर्षफलम्	१/४७	६६
ऋतम्भराप्रज्ञाकथनम्	१/४८	६६
ऋतम्भराया विशेषविषयत्वम्	१/४९	६७
निर्विचारासमापत्तिजन्यसंस्काराणामितरसंस्कार-प्रतिबन्धकत्वम्	१/५०	६८
निर्विचारसमाधिदशाकालः	१/५१	६८
क्रियायोगस्वरूपकथनम्	२/१	७०
क्रियायोगफलम्	२/२	७१

विषयः	पादसूत्रम्	पृष्ठ-संख्या
क्लेशोद्देशः	२/३	७१
क्लेशानामविद्याभूमिकत्वम्	२/४	७१
अविद्यालक्षणम्	२/५	७२
अस्मितालक्षणम्	२/६	७७
रागलक्षणम्	२/७	७८
द्वेषलक्षणम्	२/८	७८
अभिनिवेशलक्षणम्	२/९	७८
क्लेशानां सूक्ष्मावस्थाकथनम्	२/१०	७९
क्लेशवृत्तीनां ध्यानहेयत्वम्	२/११	८०
कर्माशयस्य क्लेशमूलत्वम्	२/१२	८०
कर्माशयस्य विपाकस्वरूपत्वम्	२/१३	८१
जात्यादीनां विपाकफलहेयत्वम्	२/१४	८५
सुखस्यापि दुःखात्मकतया हेयत्वम्	२/१५	८६
हेयस्वरूपकथनम्	२/१६	८६
हेयहेतुस्वरूपकथनम्	२/१७	८६
दृश्यस्वरूपं कार्यं प्रयोजनञ्च	२/१८	८६
गुणानामवस्थाकथनम्	२/१९	८७
द्रष्टृस्वरूपम्	२/२०	८७
दृश्यस्य द्रष्टृर्थत्वम्	२/२१	८८
अकृतार्थं प्रति दृश्यस्याऽनादित्वम्	२/२२	८८
द्रष्टृदृश्यसंयोगस्वरूपवचनम्	२/२३	८९
द्रष्टृदृश्यसंयोगहेतुकथनम्	२/२४	८९
हानकथनम्	२/२५	९०
हानोपायनिदर्शनम्	२/२६	९०
विवेकप्रज्ञायाः सप्तविधत्वम्	२/२७	९१
विवेकख्यातिसाधनकथनम्	२/२८	९२
योगाङ्गकथनम्	२/२९	९८
सभेदं यमस्वरूपम्	२/३०	९८
यमस्य महाव्रतत्वकथनम्	२/३१	१००

विषयः	पादसूत्रम्	पृष्ठ-संख्या
सभेदं नियमस्वरूपम्	२/३२	१००
यमनियमविघ्नानां निवृत्त्युपायत्वम्	२/३३	१०२
वितर्कादिस्वरूपादिकथनम्	२/३४	१०३
अहिंसापरस्य योगिनः सिद्धियोगत्वकथनम्	२/३५	१०४
सत्यप्रतिष्ठस्य सिद्धियोगत्वकथनम्	२/३६	१०४
अस्तेयपरस्य फलस्वरूपत्वम्	२/३७	१०४
ब्रह्मचर्यपरस्य फलस्वरूपत्वम्	२/३८	१०५
अपरिग्रहपरस्य सिद्धियोगत्वकथनम्	२/३९	१०५
शौचसिद्धिस्वरूपम्	२/४०,४१	१०५
सन्तोषसिद्धिफलम्	२/४२	१०६
तपःसाध्यसिद्धिस्वरूपम्	२/४३	१०६
स्वाध्यायसिद्धिस्वरूपम्	२/४४	१०७
ईश्वरप्रणिधानफलम्	२/४५	१०७
हठयोगोपायनमासनम्	२/४६	१०७
आसनस्थैर्यस्य साधनत्वम्	२/४७	११४
आसनजयफलम्	२/४८	११४
प्राणायामाख्यहठयोगलक्षणम्	२/४९	११४
प्राणायामस्य दीर्घसूक्ष्मत्वम्	२/५०	११५
चतुर्थप्राणायामस्य विवेचनत्वम्	२/५१	११६
प्राणायामावान्तरफलम्	२/५२,५३	१२९
प्रत्याहारलक्षणम्	२/५४	१३०
प्रत्याहारफलम्	२/५५	१३१
धारणालक्षणम्	३/१	१३३
ध्यानलक्षणम्	३/२	१३४
समाधिलक्षणम्	३/३	१३६
संयमपदार्थः	३/४	१३६
संयमजयस्य फलत्वम्	३/५	१३६
संयमसापेक्षता	३/६	१३६
धारणादीनामन्तरङ्गत्वम्	३/७	१३७

विषयः	पादसूत्रम्	पृष्ठ-संख्या
धारणादीनां बहिरङ्गत्वम्	३/८	१३८
निरोधपरिणामलक्षणम्	३/९	१३८
चित्तप्रशान्तवाहितोक्तिः	३/१०	१३९
समाधिपरिणामलक्षणम्	३/११	१३९
एकाग्रतापरिणामलक्षणम्	३/१२	१३९
धर्मादित्रयपरिणामकथनम्	३/१३	१४०
धर्मिलक्षणम्	३/१४	१४१
परिणामान्यत्त्वहेतूक्तिः	३/१५	१४२
परिणामत्रयसंयमफलम्	३/१६	१४३
शब्दार्थप्रत्ययविवेकसंयमफलम्	३/१७	१४३
संस्कारसाक्षात्कृतिफलम्	३/१८	१४४
प्रत्ययसाक्षात्कृतिफलम्	३/१९	१४४
प्रत्ययसाक्षात्कृतौ तद्विषयस्यासाक्षात्कृतिः	३/२०	१४५
कायरूपसंयमफलम्	३/२१	१४५
कर्मसंयमफलम्	३/२२	१४५
मैत्र्यादिसंयमफलम्	३/२३	१५०
बलसंयमफलम्	३/२४	१५०
प्रवृत्त्यालोकसंयमफलम्	३/२५	१५०
सूर्यसंयमफलम्	३/२६	१५१
चन्द्रसंयमफलम्	३/२७	१५८
ध्रुवसंयमफलम्	३/२८	१५८
नाभिचक्रसंयमफलम्	३/२९	१५९
कण्ठकूपसंयमफलम्	३/३०	१५९
कूर्मनाडीसंयमफलम्	३/३१	१५९
मूर्द्धज्योतिःसंयमफलम्	३/३२	१५९
प्रातिभज्ञानसंयमफलम्	३/३३	१६०
हृदयसंयमफलम्	३/३४	१६०
पुरुषज्ञानसाधनसंयमकथनम्	३/३५	१६०
प्रातिभादीनां स्वार्थसंयमफलत्वम्	३/३६	१६१

विषयः	पादसूत्रम्	पृष्ठ-संख्या
पूर्वोक्तविभूतीनां समाधिप्रतिपक्षत्वम्	३/३७	१६१
चित्तस्य परदेहावेशोपायः	३/३८	१६२
उदानसंयमफलम्	३/३९	१६२
समानसंयमफलम्	३/४०	१६२
श्रोत्राकाशसम्बन्धसंयमफलम्	३/४१	१६३
कायाकाशसम्बन्धसंयमफलम्	३/४२	१६३
प्रकाशावरणक्षयकथनम्	३/४३	१६३
भूतजयोपायः	३/४४	१६४
भूतजयफलम्	३/४५	१६४
कायसंपत्स्वरूपम्	३/४६	१६५
इन्द्रियजयोपायः	३/४७	१६५
इन्द्रियजयफलम्	३/४८	१६५
सर्वज्ञातृत्वाद्युपायः	३/४९	१६६
कैवल्योपायः	३/५०	१६६
कैवल्यविघ्नप्रशमोपायः	३/५१	१६६
क्षणतत्क्रमसंयमफलम्	३/५२	१६७
विवेकज्ञानस्यासङ्कीर्णत्वम्	३/५३	१६८
विवेकज्ञानलक्षणम्	३/५४	१६८
कैवल्यस्वरूपम् (सत्त्वपुरुषान्यताख्यातिफलम्)	३/ ५५	१६८
सिद्धिकारणवैविध्यम्	४/१	१६९
जात्यन्तरपरिणामस्य प्रयोजकत्वम्	४/२	१७०
धर्मादेः प्रकृतिप्रयोजकत्वाभावः	४/३	१७०
निर्माणचित्तस्य स्वरूपत्वम्	४/४	१७१
तत्प्रयोजकचित्तकथनम्	४/५	१७२
अपवर्गभागीयचित्तस्वरूपम्	४/६	१७२
योगिनः कर्मविलक्षणत्वम्	४/७	१७२
वासनानां कर्मानुगुणत्वम्	४/८	१९१
व्यवहितवासनानामव्यवधानोपपत्तिः	४/९	१९१
वासनानामनादित्वम्	४/१०	१९२

विषयः	पादसूत्रम्	पृष्ठ-संख्या
अनादित्वेऽपि वासनानामुच्छेदः	४/११	१९२
धर्माणामध्वभेदपरिणामः	४/१२	१९३
धर्माणां गुणत्वम्	४/१३	१९४
वस्तुगतैकत्वव्यवहारनिमित्तोक्तिः	४/१४	१९४
अर्थज्ञानभेदसाधनम्	४/१५	१९५
अर्थस्य ज्ञानसहभावित्वखण्डनम्	४/१६	१९६
चित्तपरिणामित्त्वव्यञ्जनम्	४/१७	१९६
पुरुषापरिणामित्वोक्तिः	४/१८	१९७
चित्तस्य स्वयंप्रकाशत्वाभावः	४/१९	१९७
चित्तस्य स्वाभासत्वे दोषः	४/२०	१९७
चित्तान्तरभास्यत्वे च चित्तस्य दोषः	४/२१	१९८
अपरिणामिन्या अपि चितितो बुद्धिवेदनम्	४/२२	१९८
चित्ते सर्वार्थत्वस्यौपाधिकत्वम्	४/२३	१९९
चित्तातिरिक्तचेतने हेत्वन्तरम्	४/२४	१९९
आत्मज्ञानाधिकारिपरिचयः	४/२५	२००
आत्मज्ञानाधिकारिचित्तस्वरूपापत्तिः	४/२६	२००
विवेकिनो व्युत्थितचित्तत्वे हेतुः	४/२७	२००
विवेकिनो व्युत्थितचित्तत्वनिराकृतिप्रकारः	४/२८	२०१
प्रसंख्याननिरोधोपायः	४/२९	२०१
धर्ममेघसमाधिफलम्	४/३०	२०१
धर्ममेघकाले चित्तावस्थाकथनम्	४/३१	२०१
गुणपरिणामक्रमसमाप्तिः	४/३२	२०२
क्रमलक्षणम्	४/३३	२०२
कैवल्यस्वरूपम्	४/३४	२०२

योगसिद्धान्तचन्द्रिका

श्रीनारायणतीर्थविरचिता योगसूत्रव्याख्या

प्रथमः समाधिपादः

सत्यं ज्ञानमनन्तमद्वयसुखं ब्रह्मेति वेदेषु यत्।
प्रोक्तं विष्णुशिवादिभिश्च बहुभी रूपैर्मतं वादिभिः ॥
यन्मानाविषयः सदा गुरुकृपासत्[१]प्रेमयोगेन [२]य-
ल्लभ्यं तं समुपास्महे हृदि सदा कृष्णं जगद्देशिकम् ॥ १ ॥
योगं प्राह पितामहोऽथ भगवान् शेषः स्वयं संयमैः[३]
सूत्रैर्भाष्यमिषेण सर्वविदितो व्यासः समस्तं परम् ॥
तद्भाष्यं विशदीचकार मतिमान् मिश्रोऽथ भिक्षुस्तथा
दुर्बोधं हि तथापि मूढमतिभिर्गूढं रहस्यं यतः ॥ २ ॥
अत्र[४] सूत्रेषु गूढार्थद्योतिकां तनुते पराम्।
वृत्तिं नारायणो भिक्षुः सुगमां हरितुष्टये ॥ ३ ॥
[५]स्वातन्त्र्यसत्यत्वसुखं प्रधाने सत्यञ्च चिद्भेदमभेदवाक्यैः।
व्यासो निराचष्ट न भावनाख्यं योगं स्वयं निर्मितब्रह्मसूत्रैः ॥ ४ ॥
अपि चाऽऽत्मप्रदं योगं व्याकरोन्मतिमान्मुनिः।
भाष्यादिषु ततस्तत्राप्याचार्यप्रमुखैर्मतः ॥ ५ ॥
मतो योगो भगवता गीतायामधिकोऽन्यतः।
कृतः शुकादिभिस्तस्मादत्र सन्तोऽतिसादराः ॥ ६ ॥

[६]**ब्रह्मविदाप्नोति परम्।**

---

१. क ख ग — **प्रेम०**, घ — **पूत०**।
२. क ख — **यत्**, ग घ — **सत्**।
३. क ख — **संयमैः**, ग घ — **सूत्तमैः**।
४. क ख — **अत्र**, ग घ — **अतः**।
५. क ख घ —**स्वातन्त्र्यसत्यत्वसुखं प्रधाने सत्यञ्च**, ग — **प्रधानसत्यत्वस्वतन्त्रतादि सत्यञ्च**।
६. ग — **विरोधिविषयकत्वेन जीवज्ञानस्यैव जीवाज्ञाननाशे क्षमत्वाद् ब्रह्मशब्दोऽत्र जीवात्मपर एव यो वेदनिहितं गुहायामिति मन्त्रवाक्येन तस्यैव द्रष्टव्यत्वज्ञापनाच्च** (**ब्रह्मवित्प्राक्**) उपलभ्यते, क ख घ — **विरोधि....ज्ञापनाच्च** नोपलभ्यते।

ब्रह्मविद् ब्रह्मैव भवति।

तमेव विदित्वाऽतिमृत्युमेति [१]नान्यः पन्था विद्यतेऽयनाय।

तरति शोकमात्मवित्।

इत्यादिश्रुतिसिद्धपरमपुरुषार्थ[२]साधनतानन्दात्मसाक्षात्कारसाधनतया श्रवण-मनननिदिध्यासनादीनि,

आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

इत्यादिनाऽऽम्नातानि। तत्र निदिध्यासनं प्रधानम्। तत्सहकृतादेव मनसोऽलौकिकाऽबाधितात्मगोचर[३]प्रमासम्भवात्, [४]सर्वविज्ञानादिरूपफलसंवादाच्च। निदिध्यासनञ्चैक[५]तानतादिरूपो राजयोगापरपर्यायः समाधिः। तत्साधनं तु क्रियायोगः, चर्यायोगः, कर्मयोगो, हठयोगो, मन्त्रयोगो[६], ज्ञानयोगः[७], अद्वैतयोगो[८], लक्ष्ययोगो[९], ब्रह्मयोगः[१०], शिवयोगः[११], सिद्धियोगो[१२], वासनायोगो[१३], लययोगो[१४], ध्यानयोगः[१५], प्रेमभक्तियोगश्च[१६]। तदेतत् सर्वं सामान्यविशेषभावेनाष्टाङ्गयोगेन

---

१. क ख घ — **नान्यः पन्था विद्यतेऽयनाय, तरति शोकमात्मवित्** उपलभ्यते, ग — **नान्यः....आत्मवित्** नोपलभ्यते।

२. क ख ग — **साधनता०**, घ — **साधनताकाः**।

३. क ख ग — **प्रमा०**, घ — **प्रमाण०**।

४. क ख घ — **सर्वविज्ञानादिरूपफलसंवादाच्च**, ग — **य यत्किंचिद् गोचरादपि तस्माद-दृष्टद्वाराश्रवणानधिकृतपुरुषधौरेयस्य विदुरादेरिव द्विजस्याप्यात्मसाक्षात्कारात् ज्ञान-संपत्सूचकाणिमादिसिद्धेश्च।**

५. क — **तानता०**, ख ग घ — **तानत्व०**।

६. क ख — **मन्त्रयोगः** उपलभ्यते, ग घ — **मन्त्रयोगः** नोपलभ्यते।

७. क ख ग — **ज्ञानयोगः** उपलभ्यते, घ — **ज्ञानयोगः** नोपलभ्यते।

८. क ख ग — **अद्वैतयोगः**, घ — **अद्वैतयोगः, अद्वितीयपरमात्मनि वेदान्तवाक्यानां तात्पर्य-निर्णयः।**

९. क ख ग — **लक्ष्ययोगः**, घ — **लक्ष्ययोगो वक्ष्यमाणदेशबन्धादिः।**

१०. क ख ग — **ब्रह्मयोगः**, घ — **ब्रह्मयोगो नाम शब्दब्रह्मात्मनो नादस्यानुसंधानम्।**

११. क ख ग — **शिवयोगः**, घ — **शिवयोगः सामान्यतो भगवदाकारतारूप इत्याख्यः स्वामिभावः। परमानन्दसाक्षात्कारात्मकश्रवणकीर्तनादिसाधनं तु भक्तिजन्यः।**

१२. क ख ग — **सिद्धियोगः**, घ — **सिद्धियोगो नाडीशुद्ध्यादिरूपः।**

१३. क ख ग — **वासनायोगः**, घ — **वासनायोगो निर्विकारस्यात्मतत्त्वजिज्ञासामुमुक्षुत्वादि।**

१४. क ख ग — **लययोगः**, घ — **लययोगः संप्रज्ञातः।**

१५. क ख ग — **ध्यानयोगः**, घ — **ध्यानयोगोऽभिमतशिवविष्ण्वादिसगुणस्वरूपचिन्तनम्।**

१६. क ख — **प्रेमभक्तियोगश्च**, ग — **भक्तियोगः**, घ — **प्रेमभक्तियोगः परमेश्वरचरणारविन्द-विषयैकैकात्मिका संवित्प्रेमप्रवाहोऽविच्छिन्न इत्यर्थः।**

कवलीकृतमिति मनसि निधाय साष्टाङ्गं सफलं योगं समाधिसाधनविभूतिकैवल्यार्थकैश्चतुर्भिः पादैर्व्युत्पादयिष्यन् प्रेक्षावत्प्रवृत्तये विषयप्रयोजनाधिकारिसम्बन्धान् दर्शयन् प्रथमं शास्त्रस्यारम्भं प्रतिजानीते भगवान् पतञ्जलिः।

अथ योगानुशासनम्॥ १॥

अथेति। अथ शब्द आरम्भार्थः, श्रुतिमात्रेण मङ्गलार्थश्च, न[१] प्रश्नाद्यानन्तर्यार्थः। शाब्दी ह्याकांक्षा शब्देनैव पूर्यत इति न्यायेन शब्दानुपस्थितानन्तर्यार्थकत्वानौचित्यात्। शिष्यप्रश्नगुर्वाज्ञाश्रद्धादीनामविशेषेण विचारप्रयोजकतया कस्यानन्तर्ये तात्पर्यमित्यवधारयितुमशक्यत्वाच्च।

योगः समाधिः। अनुशासनं हिरण्यगर्भोक्तेरनुपश्चाच्छिष्यते व्युत्पाद्यते लक्षण[२]भेदफलसाधनैरनेनेत्यनुशासनं, योगस्यानुशासनं योगानुशासनम्। योगप्रतिपादकं शास्त्रमारभ्यत इत्यर्थः[३]। अत्र ससाधनः सफलो योगः प्रतिपाद्यतया शास्त्रस्याभिधेयः। प्रतिपाद्ययोगद्वारा कैवल्यं फलम्। तत्कामश्चाधिकारी। शास्त्रफलयोः प्रयोज्यप्रयोजकभावः। शास्त्राभिधेययोस्तु प्रतिपाद्यप्रतिपादकभावः। अभिधेयस्य योगस्य कैवल्यस्य च साध्यसाधनभावः सम्बन्ध इति दिक्॥ १॥

सपरिकरो योगः प्रतिपाद्यत इति प्रतिज्ञातम्। तत्र योगलक्षणं योगशब्दप्रवृत्तिनिमित्तं च निर्दिष्ट[४]पञ्चदशप्रकारयोगसाधनव्यावृत्तमाह—

योगश्चित्तवृत्तिनिरोधः॥ २॥

तदा द्रष्टुः स्वरूपेऽवस्थानम्॥ ३॥

योग इति, **तदे**ति। [५]इति द्वाभ्याम्। तत्र चित्तस्य महदहङ्कारमनोभेदेन

---

१. क ख घ — **न प्रश्नाद्यानन्तर्यार्थः....अशक्यत्वाच्च**, उपलभ्यते, ग — **न....च**, नोपलभ्यते।

२. क ख ग — **भेद०**, घ — **भेदोपाय०**।

३. ग — **अथवा युजिर्योग इत्यनुशासनात्तदात्मवेदान्तोऽपि संहतात् तस्योपपद्यत इत्यागमाच्च शिवलक्षणा स्वस्वरूपाभिव्यक्तिरेव योगो न तु युज समाधावित्युक्तः समाधिस्तस्य तदत्वेनैवेष्टत्वात्** [इत्यर्थः पश्चात्] उपलभ्यते, क ख घ — **अथवा....इष्टत्वात्** नोपलभ्यते।

४. क ख घ — **पञ्चदशप्रकारयोग०** उपलभ्यते, ग — **पञ्चदशप्रकारयोग०** नोपलभ्यते।

५. क ख घ — **इति द्वाभ्याम्**, ग — **एताभ्यामिति सूत्रद्वाभ्याम्**।

त्रिविधाऽन्तःकरणस्य वृत्तयो दीपस्य शिखा इवाऽवस्थापरिणामरूपा बाह्या, आभ्यन्तराश्च। तासां निरोध उपशमो निरिन्धनाग्निवत् स्वकारणे लयः।

तदा निरोधकाले द्रष्टुः प्रमातुरहमर्थस्यान्तःकरणाऽवच्छिन्नस्य स्वरूपे विशिष्टे[१] केवल[२]चैतन्य आत्मन्यवस्थानं विषयतयाऽवस्थितिर्विद्यमानतेत्यर्थः। विषयता च व्यापारानुबन्धिनी। व्यापारश्च वृत्तिरेव।

योगी यामहमेतावन्तं कालं समाहितोऽभूवम्।

इति स्मरणेन व्युत्थानेऽनुमिनोति। इत्थञ्च वृत्त्यन्तरनिरोध[३]पूर्वकात्मगोचर-धारावाहिक[४]निर्विकल्पकवृत्तिर्योग इति लक्षणं सिद्धम्।

मय्येकचित्ततायोगो वृत्त्यन्तरनिरोधतः।

इति कूर्मपुराणादौ शिवोक्तेः।

यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति।

इति[५] गीतायां भगवदुक्तेश्च। यद्यपि[६] द्रष्टृगोचराया इव दृश्यगोचराया अपि तादृशवृत्तेः समाधित्वं वक्ष्यति सूत्रकारस्तथाप्यत्र **मयी**त्यादि प्रकृताभिप्रायम्। तत्रौपदेशिकवृत्तिवारणाय विशेषणम्। अभावस्य[७] निर्विषयत्वेन संस्काराऽजनकत्वाद् योगस्य च संस्कारजनकत्वात् तथैवाग्रे वक्ष्यमाणत्वाद्विशेष्यम्। तत्र संप्रज्ञातासाधारण्याय निर्विकल्पकेति। सूत्रद्वयेन विशेषणविशेष्ययोर्द्वयोरुक्तिस्तु प्रत्येकस्यापि फलभेद-

---

१. क ख ग — **विशिष्टे**, घ — **विशेष्ये**।
२. क ख ग — **चैतन्ये**, घ — **सच्चिद्रूपे**।
३. ग — **आदिधर्मिमात्र०** [**पूर्वकात्म०** पश्चात्] उपलभ्यते, क ख घ — **आदिधर्मिमात्र०** नोपलभ्यते।
४. क ख घ — **निर्विकल्पकवृत्तिर्योग इति लक्षणम्**, ग — **सात्त्विकवृत्तिमत्त्वं योग इति**।
५. क ख घ — **इति गीतायां भगवदुक्तेश्च**, ग — **इत्यादिस्मृतेः**।
६. क ख घ — **यद्यपि....प्रकृताभिप्रायम्** उपलभ्यते, ग — **यद्यपि....प्रकृताभिप्रायम्** नोपलभ्यते।
७. क ख घ — **अभावस्य निर्विषयत्वेन संस्काराऽजनकत्वाद् योगस्य च संस्कारजनकत्वात् तथैवाग्रे वक्ष्यमाणत्वाद्विशेष्यम्। तत्र संप्रज्ञातासाधारण्याय निर्विकल्पकेति। सूत्रद्वयेन विशेषणविशेष्ययोर्द्वयोरुक्तिस्तु प्रत्येकस्यापि फलभेदज्ञापनाय। अत एव पादभेदेन विशेषणांशफलं विभूतितृतीयपादे, विशेष्यांशफलं च कैवल्यं चतुर्थपादे वक्ष्यति सूत्रकारः**, ग — **घटादिसाधारण्यस्य सुषुप्त्यादावतिव्याप्तेश्च निवारणाय विशेष्यं सूत्रद्वये विशेषणविशेष्ययोरुक्तिस्तु प्रत्येकस्यापि फलभेदज्ञापनाय अत एव पादभेदेन फलभेदं वक्ष्यति सूत्रकारः**।

ज्ञापनाय। अत एव पादभेदेन विशेषणांशफलं विभूतितृतीयपादे, विशेष्यांशफलं च कैवल्यं चतुर्थपादे वक्ष्यति सूत्रकारः।

अथवा शिवलक्षणा स्वस्वरूपाभिव्यक्तिर्महायोगो निरालम्बः। तत्साधनं त्वभावयोगः समाधिपदाभिधेयो निराभासः। तस्य प्रथमस्य लक्षणं तदेति। द्वितीयस्तु[1] चित्तवृत्तीति।

योगस्तु द्विविधो ज्ञेयो ह्यभावः प्रथमो मतः।
अपरस्तु महायोगः सर्वयोगोत्तमोत्तमः॥
शून्यं सर्वं निराभासं स्वरूपं यत्र चिन्त्यते।
अभावयोगः स प्रोक्तो येनात्मानं प्रपश्यति॥
यत्र पश्यति चात्मानं नित्यानन्दं निरञ्जनम्।
मयैक्यं स महायोगो भाषित परमः स्वयम्॥

इत्यादि[2]स्मृतिभिरपि तथा ज्ञापनात्। अत्र [3]संप्रज्ञातप्राणनिरोधादेः साधनकोटावेव निवेशात्, संप्रज्ञाते सात्त्विकविशिष्टवृत्तिसत्त्वेऽपि योगः प्राणनिरोध इत्यनुक्तावपि च न हानिः। राजयोगविजिज्ञापयिषयैव लक्षणसूत्रप्रवृत्तेः। ननु संप्रज्ञातेऽस्मिन् ध्येयमात्रगोचरवृत्तिस्वीकारः, सर्ववृत्तिनिरोधे त्वसंप्रज्ञात इति भाष्येण विरुद्ध्यत इति चेन्न। संप्रज्ञातं प्रक्रम्य, तामपि ख्यातिं निरुणद्धीत्युत्तरग्रन्थेन विशिष्टवृत्तिमात्रनिरोधस्यैव तदर्थत्वज्ञापनात्। एतेन तत्र ध्येयवृत्तिसत्त्वे सर्ववृत्तिनिरोधाऽसिद्धिः। असत्त्वे तु समाधिशब्दार्थहानिः।

मय्येक[4]चित्तता।

इत्याद्युदाहृतस्मृत्या ध्येयमात्राकारवृत्तेरेव योगत्वकथनादित्याद्याशङ्कापि समाहिता। सर्वपदमपठता सूत्रकारेणापि तज्ज्ञापनात्। असंप्रज्ञातशब्दादिभिरेव, न तत्र किञ्चित् सम्यगहंत्वादिना प्रज्ञायत इत्यादिव्युत्पत्त्या तदर्थलाभाच्च। अत एव

तावन्मनो निरोद्धव्यं हृदि यावद्गतक्षयम्।
एतज्ज्ञानञ्च मोक्षश्च शेषोऽन्यो ग्रन्थविस्तरः॥

इत्यादिश्रुतिषु,

यत्रोपरमते चित्तं निरुद्धं योगसेवया।

---

१. क ख — द्वितीयस्तु, ग घ — द्वितीयस्य।
२. क ख घ — स्मृतिभिः, ग — भगवद्गीताभिः स्मृतिभिः।
३. क ख घ — संप्रज्ञात०, ग — संप्रज्ञाते।
४. क ख ग — चित्तता, घ — चित्त०।

इत्यादिस्मृतिषु च मनोनिरोधस्यैवोक्तत्वेऽपि नात्र तथोक्तम्। तत्रापि विवक्षित-विवेकेन मनोनिरोधस्य विशिष्टवृत्तिनिरोधात्मकत्वलाभादिति दिक्।

अथवा समाधित्वेन संप्रज्ञातस्याप्यग्रे वक्ष्यमाणत्वाद् राजयोगवत् संप्रज्ञातोऽपि प्रतिज्ञासूत्रे योगशब्दाभिधेयः। तथा च **युज समाधावित्य**[१]नुशासनादुभयविधसमाधेः स्वरूपसाधनभेदफलप्रतिपादकशास्त्रमारभ्यत इति प्रतिज्ञासूत्रार्थः। तदुभयसाधारणं लक्षणमाह—**योगश्चित्तवृत्तिनिरोध** इति।

तत्र चित्तस्य राजसतामसवृत्तीनां निरोध उपशमः संप्रज्ञातः। सर्ववृत्तीनां निरोधोऽसंप्रज्ञातः।

यदात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः।
यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह मुक्तः प्रपश्यन्।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः॥
यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टेत[२] तामाहुः परमां गतिम्॥
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ।
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासक्तं मोक्षो निर्विषयं स्मृतम्॥

इत्यादि[३]स्मृतेरित्यर्थः। सर्ववृत्तिशून्यरूपासंप्रज्ञातस्य तु समाध्यङ्गिनो योगस्य मधुमतीमधुप्रतीकाविशोकासंस्काराख्यासु भूमिषु सतीषु लभ्यस्य मणिमन्त्रादिन्यायेन कैवल्यहेतुत्वं स्वजन्यादृष्टद्वारात्मसाक्षात्कार[४]हेतुत्वम्।

अथवा निरोधः—चित्तवृत्तयो निरुद्ध्यन्तेऽस्मिन्निति व्युत्पत्त्या

वृत्तिहीनं[५] मनः कृत्वा क्षेत्रज्ञं परमात्मनि।
एकीकृत्य विमुच्येत योगयुक्तः स उच्यते।

इत्यादिस्मृतेश्च सर्वानर्थविरोध्यखण्डार्थाकारवृत्तिपर्यवसायी बोध्यः। विरोधिपदार्थस्यैव नाश्यनाशरूपत्वात् प्रागभावादौ तथा दर्शनात्। अत एव

---

१. ग घ — **योगस्य** [अनुशासनात्, पश्चात्] उपलभ्यते, क ख — **योगस्य** नोपलभ्यते।
२. क ख ग — **विचेष्टेत**, घ — **विचेष्टन्ति**।
३. क ख ग — **स्मृतेः**, घ — **श्रुतेः**।
४. क ख ग — हेतुत्वम्, घ — हेतुः।
५. क ख ग — **वृत्तिहीनं....पर्यवसायी बोध्यः**, घ — **विरोधिवृत्तिपर्यवसायी बोध्यः**।

[1]वृत्तिविशेषरूपाभ्यां संप्रज्ञातासंप्रज्ञाताभ्यां योगस्य विभजनमप्यग्रे सङ्गच्छते। अत एव न योगस्य वैयर्थ्यमपि। तादृशवृत्तेर्भावनासहकृतमनःप्रमाणजन्यत्वेनापरोक्षतयाऽज्ञानोच्छेदक्षमत्वादित्यग्रे स्फुटीभविष्यति।

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानञ्च राघव।
योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम्॥
असाध्यः कस्यचिद् योगः कस्यचित् तत्त्वनिश्चयः।
प्रकारौ द्वौ ततो देवो जगाद परमः शिवः॥

इत्यादिना वासिष्ठे योगज्ञानयोः पृथक्त्वकथनं तु योगवृत्तेः शास्त्रजवृत्त्या विकल्पार्थम्। बहिर्मुखानां वाक्यतोऽखण्डार्थबोध्यस्यापि दुर्लभत्वादिति संक्षेपः।

सोऽयं योगो भूमिविशेष एवाविर्भवति, न सर्वासु भूमिषु। तथा हि चित्तस्य त्रिगुणात्मकत्वात् क्षिप्तमूढविक्षिप्तैकाग्रनिरुद्धाख्याः पञ्चभूमयोऽवस्थाविशेषा भवन्ति। तत्र न तिसृणामुपयोगः। बहिःप्रवृत्तिभूयस्त्वात्। अपि च[2] द्वयोरेवान्त्ययोः। तत्र क्षिप्तं रजस उद्रेकादस्थिरं बहिर्मुखतया सुखदुःखादिविषयेषु व्यवहितेषु विकल्पितेषु सन्निहितेषु च प्रेरितं भवति। तच्च सदैव दैत्यदानवादीनाम्। मूढं तमस उद्रेकात् कृत्याकृत्यविभागमुल्लङ्घ्य क्रोधादिभिर्विरुद्धकृत्येष्वेव निरन्तरं भवति। तच्च सदैव रक्षःपिशाचादीनाम्। विक्षिप्तं सत्त्वोद्रेकाद्रजोविशिष्टं दुःखसाधनं परिहृत्य सुखसाधनेष्वे[3]व निरन्तरं[4] भवति। तच्च सदैव देवानाम्। एकाग्रं तु रजसोऽप्यभावेन शुद्धसत्त्वोद्रेकादा[5]त्ममात्रगोचरं सगुणब्रह्मगोचरं वा सविकल्पकसात्त्विकवृत्तिविशिष्टम्। तच्च सदैव भगवद्भक्तानाम्। देवासुरगन्धर्वरक्षोमनुष्यप्रभृतीनां निरुद्धम्। [6]तच्चापि निरोधविशिष्टं योगिनामेव भवति। वर्तमानाध्वनि स्थितानां वृत्तीनामत्यन्तातीताध्वनि प्रवेशलक्षणनिरोधस्यानात्माकारसर्ववृत्तिनिरोधेच्छासहकृत[7]संप्रज्ञातादिपाटवैकसाध्यस्यान्यत्रासम्भवात्। तस्मान्निरोध एवाऽसंप्रज्ञातः॥ २॥

---

१. क ख ग — **वृत्तिविशेषरूपाभ्याम्**, घ — **ज्ञवृत्तिसत्त्वाऽसत्त्वाभ्याम्**।
२. क ख ग — **च**, घ — **तु**।
३. घ — **शब्दादिषु** [एव—पश्चात्] उपलभ्यते, क ख ग — **शब्दादिषु** नोपलभ्यते।
४. क ख ग — **निरन्तरम्**, घ — **प्रवृत्तम्**।
५. क ख घ — **आत्ममात्रगोचरं सगुणब्रह्मगोचरं वा सविकल्पकसात्त्विकवृत्तिविशिष्टम्**, ग — **आत्ममात्रगोचरसविकल्पकवृत्तिविशिष्टम्**।
६. क — **तच्च**, ख ग घ — **तस्याः**।
७. क ख घ — **संप्रज्ञातादि०**, ग — **संप्रज्ञातपरवैराग्यसंस्कारादि०**।

निरोधवांस्तु योगी द्विविधः—युक्तोऽयुक्तश्च। तत्र युक्तः समाहितमनाः। यः केवलसमाधिनिष्ठो मोक्षमभिवाञ्छति। अयुक्तस्त्वसमाहितमनाः प्रारब्धदोषात् प्रतिभादिसिद्ध्या[१]दिकमपि वाञ्छन्नु[२]पहतसमाधिः। तत्राऽयुक्तोऽनेकार्थद्रष्टृत्वेन सोपाधिरपि। युक्तो योगे स्थितः किंस्वरूपः? किं [३]सांख्यपातञ्जलादिसम्मतश्चित्ततत्कार्यसाक्षिमात्ररूपः? उत किं बोधरूपोऽपि सँस्तदानीं सविषयत्वनिर्वाहकवृत्त्याद्युपाधेरभावान्निर्विषय एव? अथवा [४]तार्किकवैशेषिकप्रभाकरसम्मतः सुषुप्त्यादाविव सामग्र्यभावेन विषयमगृह्णँस्तदानीमपि जड एव, काष्ठादिवन्निर्विषयस्य प्रकाशत्वायोगात्? उताऽऽत्मनः संयोगविशेषादात्ममात्रद्रष्टा चेतनः? अथवा [५]शून्यवादिविज्ञानवादिसम्मतो [६]दशाक्षये दीपादिवद् विषयनिरूप्यो विषयोपरमान्न पश्यति? उत[७] प्रवृत्तिविज्ञानोपरमेऽपि सुषुप्ताविवाऽऽलयविज्ञानसन्ततिरूपस्तिष्ठतीत्याशङ्क्य तदानीमपि विद्यमानचित्तरोधरूपस्य सर्वथा निर्विषयत्वायोगेन प्रथमद्वितीयपक्षस्य बाधात् तार्किकोक्तयोस्तृतीयतुर्य्ययोस्तु

योऽयं विज्ञानमयः।

इत्यादिश्रुत्या तन्मते विशेषगुणयोगेनैवात्मनः प्रत्यक्षस्याङ्गीकारादात्ममात्रदर्शनरूपनिर्विकल्पकसमाधे[८]र्बाधेन च बाधात्। बौद्धाभिमतयोः पञ्चमषष्ठपक्षयोस्तु

अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा।

इत्यादिश्रुत्याऽसतः क्षणिकत्वायोगेन च बाधात् स्वाभिप्रेतं प्रथमपक्षमेव सिद्धान्तयति—**तदा द्रष्टुः स्वरूपेऽवस्थानमिति।**

तदा सकलचित्तवृत्तिनिरोधकाले द्रष्टुः चित्ततद्वृत्तिनिरोधपरिणामसाक्षिणश्चितिशक्तेः पुरुषस्य स्वरूपे तत्त्वेन चित्तादेरप्यनवगाहितया निर्विषये निरुपप्लवे स्वप्रकाशानावृत्तसच्चिद्रूपे अवस्थानं कुसुमापाये स्फटिकस्यालोहिते स्वस्वरूप इव क्लेशाद्यपाये चित्ताद्यसंक्रमेण कर्तृत्वाद्यभिमाननिवृत्त्याऽभेदेनावस्थितिरित्यर्थः। स्व-

---

१. क ख ग — **आदिकमपि वाञ्छन्**, घ — **अधिकामभिवाञ्छन्**।

२. क ख घ — **उपहत०**, ग — **उपसंहृत०**।

३. क ख घ — **सांख्यपातञ्जलादिसम्मतः** उपलभ्यते, ग — **सांख्य....सम्मतः** नोपलभ्यते।

४. क ख घ — **तार्किकवैशेषिकप्रभाकरसम्मतः** उपलभ्यते, ग — **तार्किक....सम्मतः** नोपलभ्यते।

५. क ख — **शून्यवादिविज्ञानवादिसम्मतः** उपलभ्यते, ग घ — **शून्य....सम्मतः** नोपलभ्यते।

६. घ — **वात०** [दशा० प्राक्] उपलभ्यते, क ख ग — **वात०** नोपलभ्यते।

७. क ख ग — **उत**, घ — **यद्वा**।

८. क ख ग — **बाधेन**, घ — **बोधेन**।

भावात् स कार्यचित्त[1]रोधात्माऽपि सन् निरुपाधि[2]स्वरूपात्मना तिष्ठतीति यावत्। इत्थञ्च चितिशक्तेः पुरुषस्य निर्विषयस्वप्रकाशसच्चिद्रूपतैव स्वरूपम्। विषयग्राहिता त्वौपाधिकी। तस्याश्च निरोधकालेऽसत्त्वेऽपि न हानिः। पाकनिवृत्तौ पाचकस्येव, तदुपलक्षितसाक्षिस्वरूपस्याबाधात्। तस्मात् स्वतो निरुपाधिसत्स्वप्रकाशरूपस्याप्यात्मन उपाधिभिरौपाधिकस्वरूपस्य तत्र निरोधसमाधिना संस्कारसहितचित्ताशेषवृत्तिनिरोधे शान्तघोरमूढावस्थानिवृत्तौ हि

जीवन्नेव विद्वान् हर्षमर्षाभ्यां विमुच्यते।

इत्यादिश्रुत्युक्ता निर्विकारस्वरूपाऽवस्थितिरूपा जीवन्मुक्तिर्भवति। परममुक्तिस्तु वक्ष्यमाणप्रज्ञाकाष्ठायां प्रान्तभोगान्ते प्रतिप्रसवेनौपाधिकरूपा[3]त्यन्तिक-निवृत्तावात्यन्तिकस्वरूपावस्थानमिति बोध्यम्। व्यक्तिभविष्यति चेदमुपरिष्टादिति दिक्॥ ३॥

ननु तर्हि व्युत्थाने स्वभावात्[4] प्रच्युतिः स्यात्, आम्लेन दुग्धस्य दधिभाववच्चित्तादिभिरनौपाधिकस्यौपाधिकभावजननात्? तत्राह—

वृत्तिसारूप्यमितरत्र॥ ४॥

वृत्तीति। इतरत्र व्युत्थाने वृत्तिसारूप्यं चित्तेन सह द्रष्टुर्वृत्तौ सारूप्यमवैलक्षण्यमित्यर्थः। शान्तघोरमूढाश्चित्तस्य वृत्तयः क्षणभङ्गुराः। ताभिरवशिष्टास्तत्प्रतिबिम्बरूपाः पुरुषस्य भवन्ति। याभिः शान्तोऽस्मि, दुःखितोऽस्मि, मूढोऽस्मीत्यध्यवस्यति। अतो न स्वभावात् प्रच्युतिः। न हि लौहित्यप्रतिबिम्बकालेऽपि स्फटिकस्य स्वभावात् प्रच्युतिरस्ति। अतात्त्विकान्यथाभावस्य विकारित्वाप्रयोजकत्वादिति भावः॥ ४॥

इदानीं चित्तस्येच्छादिलक्षणानेकवृत्तीनां निरोद्धव्यानां सत्त्वेऽपि तासां वक्ष्यमाणपञ्चप्रकारवृत्तिनिरोधेनैव निरोधो भवतीत्यभिप्रेत्य पुम्प्रयत्ननिरोद्धव्याः पञ्चप्रकारा एवेत्याह—

वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः॥ ५॥

वृत्तय इति। वृत्तयश्चैत्रादिभेदाद् वृत्तिसमूहाः, पञ्चतय्यः पञ्चप्रकारा अवयवा यासां ताः। अवयविनो वृत्तिसमूहाः प्रमाणादिपञ्चप्रकारावयवका इति यावत्। तासां हानोपादानसिद्ध्ये भेदमाह—**क्लिष्टाऽक्लिष्टा** इति। तत्र क्लिष्टा विविधानेकविषय-

---

१. क ख — **रोध०**, ग घ — **बोध०**।

२. क ख ग — **स्वरूप०**, घ — **स्वस्वरूप०**।

३. क ख ग — **आत्यन्तिक०**, घ — **आत्यन्तिकम्**।

४. क ख ग — **स्वभावात् प्रच्युतिः**, घ — **स्वभावच्युतिः**।

वासनानिबन्धना रागादिहेतुतया दुःखाख्यक्लेशफलिका विषयाकारवृत्तयो राजस्यस्तामस्यश्च। ताभिस्तृष्णादिद्वारा परानुग्रहनिग्रहाभ्यां धर्माधर्मयोरुत्पत्त्या दुःखधाराया एवानुभवात्। अक्लिष्टा विवेकख्यातितत्साधनसम्बद्धाः क्लेशफलकवृत्तिविरोधिन्यः सात्त्विक्यः। अक्लिष्टत्वं च यद्यपि प्रमाणवृत्तेरात्मगोचरायाः क्लेशादिविरोधित्वेन, विपर्ययस्य शालग्रामादौ विष्ण्वादिधीरूपस्य पुण्यविशेषजनकत्वेन, विकल्पस्य भेदवादिमते **तत्त्वमस्या**दिवाक्यजन्या[१]भेदबोधस्य कथञ्चित् तत्तदुद्धारकत्वेन, निद्रायाः सुखाद्यनुभावकत्वेन, स्मृतेर्नीलमेघादिदर्शनेन श्रीकृष्णादिविषयिण्या अदृष्टोत्पादकत्वेन स्फुटं, ताभिरेव च यथासंभवं दृष्टादृष्टद्वारा क्लिष्टवृत्तीनां निरोधश्च भवतीत्यतो तासां निरोधो, न वा सर्वासां निरोधनार्थं[२] साधनान्तरप्रयासश्चोचितस्तथाप्यासां साक्षान्निर्वाणहेतुत्वस्वस्वरूपाननुगुणत्वेन निरोधः सर्वासामात्यन्तिकनिरोधार्थं प्रयासान्तरश्चोचित एवेति भावः ॥ ५ ॥

[३]ता एव पञ्चवृत्तीरु[४]पदिशति—

प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥ ६ ॥

प्रमाणेति। उद्देशफलमितोऽन्याः साक्षान्निरोद्धव्या वृत्तयो न सन्तीति। यद्यपि लाघवतर्कानुगृहीतान्वयव्यतिरेकाभ्यां विशेषांश[५]ज्ञानस्याऽप्रमात्वावच्छिन्नं प्रति हेतुत्वाऽवधारणाद् विपर्ययादीनां साक्ष्याश्रिताऽविद्यावृत्तित्वपक्षस्य वेदान्तिभिरङ्गीकृतस्य युक्तत्वान्न चित्तवृत्तित्वकथनं युक्तं, तथापि स्वमतेऽनिर्वचनीयाऽनाद्यज्ञानस्य मानाभावेनानङ्गीकारान्मनःपरिणामत्वमेव विपर्ययादीनाम्। अत एव स्वप्ने शुक्तिरजतादयोऽपि चित्तपरिणामा एव बाधाबाधाभ्यां सदसद्रूपा इति सदसत्ख्यातिरित्याद्यग्रेऽविद्यासूत्रे स्फुटीभविष्यति ॥ ६ ॥

तत्र प्रमाणवृत्तिं विभजते—

प्रत्यक्षानुमानागमाः प्रमाणानि ॥ ७ ॥

प्रत्यक्षेति। तत्रोपमानस्य, गवयपदं गवयवाचकम्। असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात्। योऽसति वृत्त्यन्तरे वृद्धै[६]र्यत्र प्रयुज्यते स [७]तद्वाचकः। यथा

---

१. क ख ग — **अभेद०**, घ — **अभेदे**।

२. क ख — **निरोधनार्थं**, ग घ — **निरोधार्थम्**।

३. क ख ग — **ता एव**, घ — **एताः**।

४. क घ — **उपदिशति**, ख ग — **उद्दिशति**।

५. क ख — **ज्ञानस्य**, ग घ — **अज्ञानस्य**।

६. क ख घ — **यत्र**, ग — **तत्र**।

७. क ख ग — **तत्**, घ — **तस्य**।

गोशब्दादिः। गवयो गवयपदवाच्यो गोसदृशत्वात्। व्यतिरेके घटवदित्याद्यनुमाने। अर्थापत्तेरपि, अयं रात्रिभोजी, दिवाऽभुञ्जानत्वे सति पीनत्वादित्यनुमाने। अनुपलब्धेस्तु, यदि स्यादुपलभ्येतेत्यादिप्रतियोगिसत्त्वप्रसञ्जितप्रतियोग्युपलब्ध्यभावरूपायाः प्रत्यक्षा[१]सहकारित्वेन प्रत्यक्षे। इति होचुरित्यैतिह्यस्य तु शब्दे। सम्भवस्य तु, खार्यां द्रोणादिपरिमाणसम्भावनारूपस्यानुमाने। चेष्टाया अपि, गेहे कति घटाः सन्तीति प्रश्ने, दशाङ्गुलीप्रदर्शनरूपाया अनुमाने, दशादि[२]पदस्मरणे तु शब्द एवान्तर्भावात् त्रीण्येव प्रमाणानीति भावः। तत्राऽविसंवादि ज्ञानम्, अनधिगततत्त्वबोधो वा प्रमा तत्करणं प्रमाणमिति[३] प्रमाणसामान्यलक्षणम्। तत्रेन्द्रियसञ्चारमार्गेण बाह्यवस्तुसम्बन्धाच्चित्तस्याऽखिलार्थवासनावत इन्द्रियविषयसामान्यविशेषात्मनोऽर्थस्य विशेषाऽवधारणप्रधाना वृत्तिः प्रत्यक्षम्। यथा घटोऽयमित्यादिगृहीतव्याप्तिकेन हेतुना साध्यवति पक्षे ज्ञायमानेन साध्यस्य [४]सामान्यात्मनाऽध्यवसायोऽनुमानम्। तच्चानुमानं त्रिविधमुक्तं न्याये—पूर्ववत्, शेषवत्, सामान्यतोदृष्टं चेति। तत्र पूर्ववत्, पूर्वम् अन्वयस्तद्वत् केवलान्वयीत्यर्थः। यथा, इदमभिधेयं, प्रमेयत्वात्, सम्मतवदित्यादिः। शेषवत्, शेषो व्यतिरेकस्तद्वत् केवलव्यतिरेकीत्यर्थः। यथा, पृथिवी इतरेभ्यो भिद्यते, गन्धवत्त्वाद् व्यतिरेके जलादिवदित्यादि। सामान्यतोदृष्टम्, अन्वयेन व्यतिरेकेण च गृहीतव्याप्तिकम्। यथा, वह्निमान् धूमादित्यादि। प्रकृतवाक्यार्थयथार्थज्ञानवत्त्वरूपाप्तत्वविशिष्टेन पुरुषेण दृष्टश्रुतानुमितार्थानां परं प्रति यथार्थबोधार्थमुपदिष्टेनाऽऽकांक्षाऽऽसत्तियोग्यतादिमता शब्देन श्रोतुस्तदर्थाकारा वृत्तिरागमः। [५]यथा

स्वर्गकामो यजेत।

इत्यादिवाक्यात् स्वर्गकामनावता यागः कार्य इति। पौरुषेयो बोधः सर्वत्र फलम्। येन जानामि ज्ञातः स्फुरति घटादिः प्रकट इत्येवं व्यवहरति जनः। तत्र यत्र यस्य शब्दस्य भ्रमादिमाननाप्तो वक्ता स नागमः। यथा चैत्यवन्दनं कार्यमित्यादि। मन्वादिस्मृतयस्तु निर्णीतप्रमाणवेदमूलकत्वादागमा एव। एवमन्येऽपि दृष्टार्थका अस्मदादिशब्दा इति संक्षेपः ॥ ७॥

---

१. क ग घ — **सहकारित्वेन**, ख — **असहकारित्वेन**।

२. क ख ग — **पर०**, घ — **पद०**।

३. क — **प्रमाणमिति** उपलभ्यते, ख ग घ — **प्रमाणमिति** नोपलभ्यते।

४. क ग घ — **सामान्यात्मना**, ख — **समानात्मना**।

५. क ख घ — **यथा स्वर्गकामो यजेतेत्यादिवाक्यात्....यागः कार्य इति** उपलभ्यते, ग — **यथा ....कार्य इति** नोपलभ्यते।

विपर्ययं लक्षयति—

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्॥ ८॥

विपर्यय इति। लक्ष्यनिर्देशः। मिथ्याज्ञानमित्यादिलक्षणम्। तच्चायथार्थज्ञानम्। तद्विकल्पेऽप्यनुगतमित्यत आह—अतद्रूपप्रतिष्ठमिति। तच्च रूपं चेति तद्रूपं ज्ञानस्वरूपम्। तस्मिन्न विद्यते प्रतिष्ठा बाधाऽप्रतिबध्यत्वं यस्य तत्। यथा शुक्त्यादिविशेषदर्शनप्रतिबध्यं रजतादिज्ञानम्। विकल्पस्तु प्रत्यक्ष[१]प्रमावद् बाधाऽप्रतिबध्य एव। इदमनित्यमिति ज्ञातेऽपि बाधितत्वे कलहादौ शब्द[२]ज्ञानोदयात्। अतो न तत्रातिव्याप्तिः। बाधबाध्यपरोक्ष[३]प्रमायामतिव्याप्तिवारणाय मिथ्याज्ञानमिति॥ ८॥

विकल्पं लक्षयति—

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः॥ ९॥

शब्देति। शब्दश्च ज्ञानश्च शब्दज्ञाने। ते अनुपातिनी जनके यस्य स शब्दज्ञानानुपाती। श्रोतुः श्रूयमाणशब्दहेतुकः प्रयोक्तुः पदार्थोपस्थितिहेतुको [४]बाधनिश्चयेऽपि कलहादौ नरशृङ्गादिप्रयोगे उत्प्रेक्षादौ च सर्वानुभवसिद्धः। वस्तुशून्यो बाधितविषयप्रत्ययः नरविषाणं, खपुष्पं, चैतन्यं पुरुषस्य स्वरूपमित्याद्याकारा विकल्पाख्या वृत्तिरित्यर्थः। [५]वस्तुशून्यत्वान्नायं प्रमाणम्। बाधाप्रतिबध्यत्वाच्च न विपर्ययः। न च बाधबुद्धिसत्त्वे विशिष्टप्रत्ययः कथं, लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यविशिष्टबुद्धेर्बाधप्रतिबध्यत्वादिति वाच्यम्। सत्यपि बाधनिश्चये,

[६]धूमस्तोमं तमशशङ्के राधाविरहशुष्मणाम्।

इत्याद्युत्प्रेक्षादिवाक्यतः शाब्दबोधस्यानुभवसिद्धत्वेन शाब्दातिरिक्तत्वेनापि तादृशधियो विशेषणीयत्वात्। अनाहार्यबुद्धेरेव तथाविधाया बाधप्रतिबध्यत्वाङ्गीकाराच्च। अन्यथा कलहतर्कादिनापि प्रतिपत्तिर्न स्यात्। नैयायिकानां तु योग्यताया बाधेनात्र [७]शब्दाऽऽहार्यस्यापि असंभवात् पदार्थोपस्थितिमात्रं न शाब्दबोध इति संक्षेपः॥ ९॥

---

१. क ख ग — **प्रमा०**, घ — **प्रमाण०**।

२. क ख — **ज्ञान०**, ग घ — **बुद्धेः**।

३. क ख ग — **प्रमायां**, घ — **प्रमाणम्**।

४. क ख घ — **बाधनिश्चये....सर्वानुभवसिद्धः** उपलभ्यते, ग — **बाध....सिद्धः** नोपलभ्यते।

५. क ख घ — **वस्तुशून्यत्वात्**, ग — **बाधितविषयत्वात्**।

६. क ख घ — **धूमस्तोमं तमशशङ्के राधाविरहशुष्मणामित्याद्युत्पेक्षादिवाक्यतः**, ग — **कलहोत्प्रेक्षादिवाक्यतः**।

७. क ख — **शब्द०**, ग घ — **शाब्द०**।

निद्रां लक्षयति—

अभावप्रत्ययालम्बना वृत्तिर्निद्रा ॥ १० ॥

अभावेति। जाग्रत्स्वप्नवृत्तीनामभावस्य प्रत्ययः प्रत्येति जनयतीति प्रत्ययो[1] हेतुः तम आलम्बनं विषयो यस्याः सा वृत्तिर्निद्रा। अस्याः सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति सुषुप्त्यनन्तरं जागरे स्मृतिदर्शनात्, स्मृतेश्चानुभवव्यतिरेकेणानुपपत्तेर्वृत्तित्वम्। वृत्तिपदं तु ज्ञानसामान्याभावो निद्रेति तार्किकमतनिरासाय। अत्र भाष्यम्—

स च सम्प्रबोधे प्रत्यवमर्षात् प्रत्ययविशेष एव। कथम्? उच्यते। सुखमहमस्वाप्सं, प्रसन्नं मे मनः, प्रज्ञां मे विशारदीकरोति। दुःखमहमस्वाप्सं, स्त्यानं मे मनो भ्रमत्यनवस्थितम्। गाढं मूढोऽहमस्वाप्सं, गुरूणि मेऽङ्गानि क्लान्तं मे चित्तमलसं मुषितमिव तिष्ठतीति। स खल्वयं प्रबुद्धस्य प्रत्यवमर्षो न स्याद् असति प्रत्ययानुभवे। तदाश्रिताः स्मृतयश्च तद्विषया न स्युः। तस्मात् प्रत्ययविशेषो निद्रा। सा च समाधावितरप्रत्ययवन्निरोद्धव्या।

इति। भाष्यार्थस्तु[2]—सा च निद्रा तु सम्प्रबोधे जागरे, प्रत्यवमर्षात् स्मरणात्, प्रत्ययविशेष एव वृत्तिरूपैव, न [3]ज्ञानसामान्याभावो, न वा साक्षिरूपा। जागरे स्मरणानुपपत्तेः। अनुभवसूक्ष्मावस्थारूपसंस्कारं विना साक्षिणाऽपि स्मृतेरसम्भवात्। स्मरणाकारं पृच्छति—**कथमिति।** उत्तरमाह[4]—**उच्यत** इति। वृत्तिमात्रस्य त्रिगुणात्मकत्वसूचनाय तदुक्तम्। आदौ सत्त्वफलमाह—**सुखमिति।** ततस्तदभिनयति। प्रसन्नं निर्मलम्। प्रज्ञां स्वस्मिञ्ज्ञायमानां यथार्थवृत्तिं, विशारदीकरोति सूक्ष्मार्थग्रहणयोग्यां करोति। इदञ्च तत्र सत्त्वोद्रेकस्य फलम्। रजसः फलमाह—**दुःखमिति।** [5]ततस्तदभिनयति। स्त्यानमकर्मण्यम्। अनवस्थितमस्थिरम्। तमसः फलमाह—**गाढमिति।** ततस्तदभिनयति। गुरूणि मेऽङ्गानि, अलसमत्यन्तं, मुषितमिव परैरपहतमिव तिष्ठतीत्यर्थः। अन्वयमुखेन सुषुप्तावनुभवमुपपाद्य व्यतिरेकमुखेनोपपादयति—**स**

---

१. क ख — **प्रत्ययः** उपलभ्यते, ग घ — **प्रत्ययः** नोपलभ्यते।

२. क ख घ — **भाष्यार्थस्तु**, ग — **अस्यार्थः**।

३. क ख — **ज्ञानसामान्य०**, ग — **ज्ञान०**, घ — **ज्ञानाज्ञानसामान्य०**।

४. क ख घ — **उत्तरमाह**, ग — **उत्तरयति**।

५. क ख — **ततस्तदभिनयति**, ग — **तदभिनयति**, घ — **ततस्तदभिनयति/तदभिनयति** नोपलभ्यते।

खल्विति। प्रत्ययानुभवे सूत्रोक्तप्रत्ययानुभवे असति योऽयं[१] प्रत्यवमर्षे[२] जागरे स्मृतिरूपः खलु न स्यादित्यर्थः। अनुभवं विना स्मृतेरदर्शनादिति भावः। नन्वस्तु तत्रानुभवः, परन्तु साक्ष्याश्रित एव सोऽविद्यावृत्तिरूपोऽस्तु, न चित्तपरिणामरूपः। चित्तस्य तदानीं[३] लीनत्वात्। तत्राह—**तदाश्रिता** इति। चित्ताश्रिताः स्मृतयः सुखदुःखादिविषया न स्युः। साक्षिणा दृष्टस्य चित्तेन स्मरणासम्भवादित्यर्थः। स्मृतिश्चित्तस्यैव धर्मः। तत्[४]कार्यहर्षविषादेच्छादेस्तत्रैव सम्भवादिति भावः। **सा चेति**। च इति हेतौ। यतः सा सुख[५]दुःखमोहान्विता, अत एव समाधावितरप्रत्ययवन्निरोद्धव्येत्यर्थः। स्वाप उद्रिक्तं तमः। निद्रा तु स्वापप्रधाना सुखस्वापाहमर्थगोचरा वृत्तिः। सुखमहं स्वपिमीत्याकारा विशिष्टा, समूहालम्बनात्मिका निर्विकल्पिका वा।

तामेव तत्र जानानः पुरुषः स्वप्न इवान्तःप्रज्ञोऽपि दृग्दृश्यभेदाभिमानाभावात् सुषुप्तिस्थान एकीभूतः।

इत्युच्यते श्रुतिभिः। इत्थं भेदमभिप्रेत्यै[६]व स्वापानुभववृत्तेर्निद्रात्वोक्तिः। लोके, अयं स्वपितीति निद्रातीति स्वपितिनिद्रात्योः पर्यायस्तु विषयविषयिणोरभेदाभिमानादिति दिक्। तत्र साऽविद्यांश[७]सत्त्वपरिणामो न चित्तस्य। तस्य तत्र लीनत्वात्। अन्यथा स्वप्नजागरणयोरन्यतरा[८]पत्तिरिति वेदान्तिनः।

तत्र युक्तम्। दुःखानुभवानुपपत्तेः। दुःखस्य च चित्तमात्रधर्मत्वात्। न च स्वप्नजागरणयोरन्यतरापत्तिरिति वाच्यम्। स्वापादृष्टे न तयोः प्रतिबन्धात्। अत एव तत्र नात्मस्वरूपसुखस्यानुभवः, किन्तु चित्तपरिणामरूपस्यैव।

त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्।

इति श्रुत्यापि भोक्तृभोग्यभोगानां तत्र सद्भावकथनेन तावदर्थज्ञापनादित्य[९]भिमानिनः। अथ

---

१. क — **योऽयं**, ख ग घ — **सोऽयम्**।
२. क — **प्रत्यवमर्षे**, ख — **प्रत्यवमर्षः**, ग — **परामर्शः**।
३. क ख घ — **तदानीं**, ग — **तदा**।
४. क ख घ — **कार्य०**, ग — **कार्यस्य**।
५. ग घ — **दुःख०** उपलभ्यते, क ख — **दुःख०** नोपलभ्यते।
६. ग घ — **सूत्रे** [एवपश्चात्] उपलभ्यते, क ख — **सूत्रे** नोपलभ्यते।
७. क ख घ — **सत्त्व०**, ग — **सत्त्वस्यैव**।
८. क ख ग — **आपत्तिः**, घ — **वृत्तिः** (उभयत्र)।
९. क ख — **अभिमानिनः**, ग घ — **अभिमानः**।

यत्रैतत् पुरुषः स्वपिति निद्रा नाम, सता सौम्य तदा सम्पन्नो भवति स्वमपीतो भवति स्वं ह्यपीतो भवति तस्मादेनं स्वपितीत्याचक्षते।

न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येत्।

इत्यादिश्रुतिभिः सत्[१]सम्पत्तेर्निर्विषयत्वादिकथनेन सुषुप्तौ चित्तलयप्रतिपादनाद् ब्रह्मसुखस्यैव तत्र भानम्। निद्राप्यविद्यावृत्तिरेव। भोक्तृभोग्यानां सत्त्वांशसंस्काररूपेण संस्कारसत्त्वेऽपि [२]द्वितीयाभावन्तु अभिमानाभावमादायेति वेदान्तिनामभिप्रायादिति चेत्। अत्र वदन्ति। सत्सम्पत्तिरपि दुग्धजलयोरिव एकीभावो न त्वेकतैव। पुनरुत्थानाभावप्रसङ्गात्। सापि यद्यपि लयात्, तथापि लयोऽत्र न कारणात्मनाऽवस्थितिः, किन्तु स्वाभाविकबहिःप्रवहणशीलत्वाभावमात्रम्। तथा च तत्र मनःसत्त्वेऽपि न हानिर्न वा श्रुतिविरोधः। अतो निद्रा मनस एव वृत्तिः। सुखमपि तस्यैव सत्त्वांशपरिणामः, नात्मरूपमित्यास्तां विस्तरः।

नैयायिकास्तु, यदा मनः पुरीतति प्रविशति तदा त्वङ्मनोयोगरूपकारणाभावाज्ज्ञानसामान्याभावः। सैव सुषुप्तिः। प्रमाणञ्चात्र

यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात् पुरीततिमभिप्रतिष्ठन्नेताभिः प्रत्यवसृज्य पुरीतति शेते।

इति श्रुतिः। अनया पुरीतत्प्रवेशेन त्वङ्मनोयोगाभावस्यो[३]क्त्या ज्ञानाभावमात्र[४]कथनात्। तस्मान्न चित्तलयो न वा चित्तपरिणामस्तत्रेति वदन्त उदाहृतानुभवान् स्वप्नेऽन्तर्भावयन्ति। तन्न [५]सम्यक्।

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति।

इत्युपक्रम्य

आनन्दभुक्चेतोमुखः प्राज्ञस्तृतीयपादः।

इत्यादिश्रुतिभिरुक्तानुभवानां सुषुप्तिकालिकत्वावगमात्। सुषुप्तौ ज्ञानसामान्याभावस्य वक्तुमशक्यत्वात्। त्वदुदाहृतश्रुतेर्मनसः संस्काररूपेणावस्थितौ कथित-

---

१. क — **सम्पत्तेः**, ख ग घ — **सम्पत्ति०**।

२. क घ — **द्वितीयाभावं**, ख — **द्वितीयया भावं**, ग — **द्वितीयाभावः**।

३. ग — **सुषुप्तौ [उक्त्या पश्चात्]** उपलभ्यते, क ख घ — **सुषुप्तौ** नोपलभ्यते।

४. क ख घ — **कथनात्**, ग — **सूचनात्**।

५. क ख घ — **सम्यक्। यत्र सुप्तो....वक्तुमशक्यत्वात्**, ग — **अस्मदुदाहृत्य श्रुत्यनुभवानां विरोधेन ज्ञानसामान्याभावस्य तत्र वक्तुमशक्यत्वात्।**

वृत्तिभिन्नवृत्तिसामान्याभावे वा[१] तात्पर्यात्। इन्द्रियाद्युत्पत्तेः प्रागेव हिरण्यगर्भस्य ज्ञानोत्पत्त्या ज्ञानसामान्ये त्वङ्मनोयोगस्य हेतुत्वा[२]ऽयोगात्। एतेन[३] जन्यज्ञानमात्रे त्वङ्मनोयोगस्य हेतुत्वमङ्गीकृत्य तदभावबलात्, न किञ्चिदवेदिषमिति नञाद्यन्वय-स्वारस्याच्च सुषुप्तौ ज्ञानसामान्याभावमङ्गीकृत्योत्थितस्य स्वापसुखादिप्रत्ययोऽनु-मितिरेव। सुषुप्तिकालीनात्मा ज्ञानाभाववान्, ज्ञानसामग्र्यभावात्। मुक्तिकालिकात्मवत्। सुषुप्तिकालिकात्मा दुःखाभाववान् दुःखसामग्रीशून्यत्वात्। मुक्तिकालिकात्मव-दित्यनुमानसम्भवात् सौषुप्तदुःखाभावे सुखशब्दप्रयोगस्यौपचारिकत्वात्। अन्यथा अक्लृप्तनित्यसुखकल्पनागौरवप्रसङ्गादिति परास्तम्। सुषुप्तिपरिचयं विना पक्षाज्ञाना-दनुमानानुदयाच्च। न च कालत्वादिना सामान्यलक्षणप्रत्यासत्त्या परिचयः। सामान्य-लक्षणाया एवालीकत्वात्। अभ्युपगमेऽपि स्वाभिमतासिद्धेः। कालत्वरूपेण परिचयेऽपि सुषुप्तित्वरूपेणापरिचयात्तद्घटितानुमानस्य कालान्तरीयज्ञानाभावसाधारण्यादर्थान्तरात्।

नन्वहोरात्रस्य प्रहराष्टकरूपत्वेन ज्ञानात् प्रहरद्वयं सुप्तोत्थितेन प्रहरषट्कस्य जागरणकालत्वेन ज्ञानात् परिशेषाद् अवशिष्टप्रहरद्वयस्य वस्तुतः सुषुप्तिकालस्य स्वज्ञानत्वात् तत्कालीनात्मन्यनुमितौ नानुपपत्तिः। एवं सर्वसुषुप्तिषु तत्तत्कालपरिचयो द्रष्टव्य इति चेन्न। अहोरात्र[४]परिणामादिविवेकरहितानामपि मुग्धबालप्रभृतीनां, तद्विवेकवतामपि विनैव तत्प्रतिसंधानं सुखमहमस्वाप्समिति प्रतीतिसत्त्वात्। उक्तप्रहरद्वयेन तत्कालज्ञानेऽपि सुषुप्तेरज्ञानात्, अस्वाप्समित्यभिलापासम्भवाच्च। न ह्युक्तप्रहरद्वयकालसम्बन्धिनी एव सुषुप्तिः। न वा तत्कालीनात्मयोग्यविशेषगुणाभावः। आद्ये तस्य पुरुषान्तरसाधारण्यात् तस्यापि तदा स्वपिमीति व्यवहारापत्तेः। द्वितीयस्त्वप्रसिद्धः। पुरुषान्तरे तदा [५]ज्ञानाद्यन्यतमसत्त्वात्। न च यस्य यत्काले वस्तुत उक्तगुणाभावस्तस्य सुषुप्तिरिति वाच्यम्। पुरुषाणामानन्त्यात् प्रतिपुरुषं च सुषुप्ति-कालानामानन्त्याद् अनियतपरिमाणत्वाच्च स्वपिधातोरव्यवहितानन्तार्थकत्वापत्तेः। मम तु अस्वाप्समित्यनुगताकारस्मृतिहेत्वनुभवसाक्षिकः प्रलीनबहिःप्रवाहकमनस्कत-

---

१. ग — **वा** उपलभ्यते, क ख घ — **वा** नोपलभ्यते।

२. क ख ग — **अयोगात्**, घ — **योगात्**।

३. क ख घ — **एतेन....विस्तरः**, ग — **अपि च ज्ञानसामान्यं प्रति तस्य हेतुत्वे आसन्? न चाक्षुषादिकाले त्वाचप्रत्यक्षं स्यात्। चाक्षुषादिसामग्र्या अतिबन्धकत्वे न तद् वारणं निर्मूलातिगौरवहेतुरित्यन्यत्र विस्तरः।**

४. क — **परिणाम०**, ख घ — **परिमाण०**।

५. क ख — **ज्ञान०**, घ — **अज्ञान०**।

मोऽवस्थाविशेषनिष्ठो जातिविशेष इत्यनुगमादेकार्थत्वोपपत्तिः। यत्तु, नाडीविशेषमनःसंयोगः सुषुप्तिरिति तन्न सम्यक्। तस्यातीन्द्रियत्वेनाबालानां जनानाम्, अस्वाप्समिति स्मृतिहेतुप्रत्यक्षाऽयोगादुदाहृतश्रुतिविरोधाच्च। अत्र यद्यप्यहमर्थस्य वर्तमानतया प्रत्यक्षत्वान्न स्मृतिः, तथापि स्वापावस्थाया अतीतत्वाद् भवति स्मृतिः। सुखस्य वेदान्तनये नित्यतया वर्तमानत्वाद् अस्मरणापत्तिः। स्वमते तु मनःपरिणामरूपस्य तस्याप्यतीतत्वात् सम्भवति तस्यापि स्मृतिः। न वाहमर्थस्य प्रत्यक्षत्वे अहमस्वाप्समिति भूतलकारोत्तमपुरुषाभिलापानुपपत्तिः। स्मर्यमाणस्वापसम्बन्धात् स्मर्यमाणत्वारोपादित्यास्तां विस्तरः॥ १०॥

स्मृतिं लक्षयति—

अनुभूतविषयाऽसम्प्रमोषः स्मृतिः॥ ११॥

अनुभूतेति। अनुभूयत इत्यनुभवोऽ[1]नुभवविषयः। तस्माद्विषयस्या[2]ज्ञानस्याधिकस्य न सम्प्रमोषः स्तेयः परिग्रहो यत्र [3]तादृशोऽनुभवविषयादनधिकविषयो गृहीतग्राही प्रत्ययः। सा गङ्गा मया दृष्टेत्याद्याकारः स्मृतिरित्यर्थः। न च प्राथमिकानुभव[4]विषयविषयकधारावाहिकद्वितीयादिज्ञानेऽतिव्याप्तिः। तत्र

न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते।

इति न्यायेन[5] क्षणादिरूपाधिकार्थभानाङ्गीकाराद् अगृहीतग्राहित्वस्यैव सत्त्वात्। स्मृतौ तु क्षणादिभानस्याननुभवेनोक्तन्याये प्रत्ययपदस्यानुभवपरत्वात् स्मृतौ क्षणवैशिष्ट्यभानानङ्गीकार इति भावः। ननु लाघवात् संस्कारजन्यं ज्ञानं स्मृतिरित्येव लक्षणमुचितमिति चेन्न। तावन्मात्रस्य प्रत्यभिज्ञायामतिव्याप्तेः। संस्कारमात्र[6]जन्यत्वस्यादृष्टदेशकालादिरूपसामग्र्यपेक्षायामसम्भवात्। यदि मात्रपदेन प्रमाणस्यैव व्यवच्छेदस्तदास्तु वा। अनुभूतेत्यनेन संस्कारजन्यत्वज्ञापनात् तदपि लक्षणम्। तदापि न हानिः। लक्षणस्य लक्षणान्तराविरोधित्वादिति संक्षेपः।

अत्र साम्प्रदायिकास्तु, अनुभूतेत्यस्य अनुभूतौ चितिशक्त्या परोक्षतया[7] गृहीतौ

---

१. क ख घ — **अनुभव०**, ग — **अनुभूत०**।
२. क ख ग — **अज्ञानस्य**, घ — **अज्ञातस्य**।
३. क ख ग — **तादृशः**, घ — **तादृक्**।
४. क ख घ — **विषय०** उपलभ्यते, ग — **विषय०** नोपलभ्यते।
५. क ख घ — **न्यायेन**, ग — **न्याये**।
६. ग — **वानुभव०** [जन्यत्वस्य पश्चात्] उपलभ्यते, क ख घ — **वानुभव०** नोपलभ्यते।
७. क ख ग — **परोक्षतया**, घ — **अपरोक्षतया**।

यौ विषयौ वृत्तितद्विद्यरूपावर्थौ तयोरसम्प्रमोषः अनपहरणं यत्र तादृशस्तदुभयविषयक-प्रत्ययः स्मृतिरित्यर्थमङ्गीकृत्य वृत्तेस्तद्विषयस्य च स्मरणमिच्छन्ति। स घट इत्यादि-स्मरणेऽनुभूततारूपतत्तातदारूढार्थयोर्द्वयोरपि भानस्यानुभवसिद्धत्वात्। तथा चैतन्मते वित्तिवेद्योभयानुभवं विना वित्तिवेद्योभयस्मरणायोगादयं घट इत्याद्यनुभवेऽपि वृत्ति-तदारूढयोर्द्वयोर्भानमावश्यकमिति सर्वमेव ज्ञानं व्यवसायात्मकम्[1]। साक्षिरूपचिति-शक्त्यैव वित्तिवेद्ययोर्ग्रहणात्। इत्थञ्चैतन्मते अनुभव[2]स्मृत्योः समानप्रकारत्वादिना हेतुहेतुमद्भावोऽ[3]प्यविरुद्धः। [4]अयं घट इत्यनुभूततारूपतत्ताप्रकारकज्ञानात् स घट इत्याद्यनुभवप्रकारिकाया, घटमहं जानामीति ज्ञानविशेष्यकाच्च घटमहं स्मरामीति ज्ञानविशेष्यकायाः स्मृतेर्दर्शनात्। यदि च घटमहं जानामीति ज्ञानादपि स घट इति तत्ताप्रकारिका स्मृतिस्तदास्तु प्रकारकत्वविशेष्यत्वादिमन्तर्भाव्य समानविषयत्वेनै-वानुभवस्मृत्योः कार्यकारणभावः। न चान्यविशेष्यकज्ञानादन्यविशेष्यकस्मरणप्रसङ्गः। इष्टापत्तेः। तदुक्तं भाष्येऽपि

ग्रहणाकारपूर्वा बुद्धिः, ग्राह्याकारपूर्वा स्मृतिः।

---

१. क ख ग — व्यवसायात्मकं, घ — व्यवसायानुव्यवसायादिकम्।

२. ग — न [स्मृत्योः पश्चात्] उपलभ्यते, क ख घ — न नोपलभ्यते।

३. क ख घ — अप्यविरुद्धः, उपलभ्यते, ग — अप्यविरुद्धः नोपलभ्यते।

४. क ख घ — अयं घट इत्यनुभूतता....तस्य विपर्ययत्वादिति दिक्, ग — अयं घटो घटमहं जानामीति ज्ञानविशेष्यकविषयप्रकारकाऽनुभवात्, स घट इति विषयविशेष्यकज्ञान-प्रकारकस्मरणालोपप्रसङ्गात्। तस्मादत्र लाघवात् प्रकारत्वविशेष्यत्वादिकमनन्तरभाष्य-समानविषयकत्वेनैव कार्यकारणभावः। भाष्यसम्मतं चैतत्। उक्तं हि भाष्ये ग्रहणाकार-पूर्वा बुद्धिः ग्राह्याकारपूर्वा स्मृतिरिति। अत्र पूर्वशब्दो विशेष्यपरः। एतेन अन्यविशेष्यक-ज्ञानादन्यविशेष्यकस्मरणाभावात्। तद्विशेष्यकताप्रकारकत्वेनैव अनुभवस्मृत्योः कार्य-कारणभाव इति वदतां नव्यतार्किकाणां मतं न सम्यगिति मन्तव्यम्। तत्र यथा स्मृतेर्भाष्यकाराद्यनुभवसिद्धत्वात्। न च अनुभवेऽपि विदुषः कलहायन्ते स्मृतेर्युग-पदुभयविशेष्यकत्वाद्यनुभवस्तु विशेष्योद्बोधकानां हेतुत्वकल्पनाभिः सम्पादनीय इत्यास्तां विस्तरः। परे तु वस्तुतः कुम्भत्वविषयादपि द्रव्यम् इति द्रव्यत्वादिनाऽनुभवात् कुम्भत्वादिना स्मृत्या वारणाय समानप्रकारकत्वादिनैव हेतुहेतुमद्भावं सर्वत्रानुभवस्मृतिः संस्कारादविच्छिन्नतस्तथोभयभानं न इच्छन्ति। तन्न सम्यक्। कुम्भे इदं द्रव्यम् इति ज्ञानस्यानन्तरं कुम्भो न वेति संशयदर्शनात्। कुम्भत्वविषयकत्वे मानाभावे न समान-विषयत्वस्यैवाऽभावात्। कुम्भकत्वे न स्मृतिः प्रसङ्गाभावात्। तदन्याप्रकारकत्वादिना कार्यकारणभावमङ्गीकृत्य वा निर्वाहाच्चेत्यास्तां विस्तरः। ननु स्वप्ने स्वकरे गजवैशिष्ट्य-मननुभूतमपि स्मर्यत इति चेन्न तस्य विपर्ययत्वादिति दिक्।

इति। घटमहं जानामीति ज्ञानविशेष्यकोऽनुभवः। स घट इति घटविशेष्यिका स्मृतिरिति तदर्थः। अत्र पूर्वशब्दो विशेष्यपरः। न चैवं सति स्मृतेर्युगपदुभय-विशेष्यकत्वापत्तिः। सामग्र्या समत्वादिति वाच्यम्। विशेष्योद्बोधकानां हेतुत्व-कल्पनाभिस्तन्निरासादिति यत्किञ्चिदेतत्। एतावाँस्तु विशेषः। तार्किकस्यायं घटो घटमहं जानामीत्यनयोर्व्यवसायानुव्यवसायभेदाद्भेदः। पूर्वस्य विषयेन्द्रियसन्निकर्षजन्यस्य विषयमात्रग्राहकत्वात्। द्वितीयस्य तु मनोमात्रजन्यस्य ज्ञानगोचरत्वात्। यद्यपि स्वमते तु न तथा। वृत्तिवेद्योभयविषयत्वेन द्वयोरपि [१]व्यवसायस्थानीयत्वात्। तथाप्यज्ञान-नाशकोऽयं घट इत्याद्याकारः। अज्ञाननाशोत्तरं तु घटमहं जानामीत्याद्याकारः क्रियाजन्यफलभागितारूपकर्मतायास्तदानीमेव भानसम्भवात्। वेदान्तिनस्तु वृत्त्य-वच्छिन्नचैतन्यमज्ञाननाशकं व्यवसायः। विषयमात्रग्राहकत्वात्। वित्तिवेद्योभयार्थग्राहकं वृत्त्याद्युपहितं त्वनुव्यवसाय इति तयोस्तार्किकाणामिव भेद एवेति वदन्ति। परन्तु तार्किकाणामनुव्यवसायो जन्यत्वादनन्तः। वेदान्तिनान्तु स्वयमात्मैवेत्यन्यदेतत्। युक्तश्चायं पक्षः। यद्यपि ज्ञानकर्मतायाः पश्चादेवानुभवात् तथापि ग्रहणसमर्थया चितिशक्त्या वृत्त्युत्पत्तिकाले वृत्तेरपि विषयस्येव ग्रहणसम्भवाद् वृत्तिवेद्योभय-भाननिबन्धनभेदात् तयोः पौर्वापर्यकल्पनमयुक्तमिवेति सूत्रकारप्रभृतेर्गूढाभिसन्धिः। प्रकृतमनुसरामः। तथापि घट इत्येवं स्मरणपक्षे प्रमुष्टतत्ताकज्ञानस्य संस्कारमात्रजन्यस्य स्मरणत्वलोपप्रसङ्गः। तत्तायास्तत्राभानादिति चेन्न। तादृशनियमस्यौत्सर्गिकत्वात्। अत एव निद्रासूत्रे उदाहृतसुखस्मरणस्योद्बोधकदोषात् प्रमुष्टतत्ताकत्वेऽ[२]पि नैतत्सूत्रविरोध इति वदन्ति। ननु स्वप्ने सूकरे[३] गजवैशिष्ट्यमननुभूतमपि स्मर्यते, इति चेन्न तस्य विपर्ययत्वादिति दिक्॥ ११॥

आसां वृत्तीनां निरोधोपायमाह—

अभ्यासवैराग्याभ्यां तन्निरोधः॥ १२॥

अभ्यासेति। अभ्यासवैराग्याभ्यामनुपदं वक्ष्यमाणाभ्यां समुच्चिताभ्यां तन्निरोधः। तासां क्लिष्टानामक्लिष्टानां च वृत्तीनां निरोधः कथितः। प्रयाजाद्यङ्गानाम-पूर्वरूपव्यापारभेदादिव व्यापारभेदाद्भवतीत्यर्थः। यथाऽभिवृद्धनद्या द्विविधः प्रवाहो

---

१. क ख — **व्यवसाय०**, घ — **अनुव्यवसाय०**।

२. क ख — **अपि नैतत्**, घ — **विनैव**।

३. क ख — **सूकरे**, घ — **स्वकरे**।

ग्रामनगरादिमज्जनानुकूलः[१] सेत्वादिना प्रतिबद्ध्यते। [२]क्षेत्राद्यनुकूलश्चाल्पकुल्याखननादिना सम्पाद्यते। एवञ्चित्तनद्याः संसारसागराभिमुखो विषयभूमिगोऽनर्थप्रवाहो वैराग्येण भज्यते। [३]निद्रादिदोषवारणायात्मभूमिगो मोक्षसुखसागराभिमुखोऽर्थप्रवाहोऽभ्यासेन वर्द्धते इत्यभ्यासवैराग्ययोश्चित्तवृत्तिनिरोधे समुच्चयोऽत्र द्विवचनेन।

अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।

इति च शब्देन भगवताऽत्राभिहित इति दिक्॥ १२॥

अभ्यासं लक्षयति—

तत्र स्थितौ यत्नोऽभ्यासः ॥ १३ ॥

तत्रेति। तत्र तयोर्मध्ये तस्मिन् परात्मनि सच्चिद्रूप इति वा स्थितिरेकाग्रता तदर्थं प्रयत्न उत्साहसाहसधैर्याध्यात्मविद्याध्ययनमहत्सेवनयमनियमाद्यनुष्ठानलक्षणोऽभ्यास इत्यर्थः। तत्रोत्साहः सर्वदा बहिःप्रवहणशीलं चित्तं निरोत्स्यामीत्येवमुद्यमः। साहसं साध्या-साध्यत्वाद्यपरामृश्य शीघ्रं प्रवृत्तिः। धैर्यम्, इह जन्मनि जन्मान्तरे वा सेत्स्यत्येवेत्यऽखेदः। तदेतदुदाजहरुर्गौडपादाः—

उत्सेक उदधेर्यद्वत् कुशाग्रेणैव बिन्दुना।
मनसो निग्रहस्तद्वद्भवेदपरिखेदत॥

इति। तत्राख्यायिकां प्राहुः साम्प्रदायिकाः[४]—कस्यचित्तीरस्थपक्षिणोऽण्डानि समुद्रस्तरङ्गैराजहार। स एनं [५]शोषयाम्येवेति द्रुतं प्रवृत्तः स्वमुखाग्रेणैकैकं जलबिन्दुमु[६]च्चिक्षेप। वारयमाणाँश्च बन्धून् सहायान् वव्रे। ततश्च कृतनिवारणोऽपि नारदोऽस्याखेदप्रवृत्त्या तुष्टः, त्वज्जातिद्रोहेण त्वामवजानाति समुद्र इति गरुडं प्रेषयामास। समुद्रश्च गरुडपक्षवातभीतः पक्षिणोऽण्डानि ददाविति। एवमखेदादिना मनोनिरोधे यतमानस्य योगिन ईश्वरानुग्रहादिष्टसिद्धिरिति भावः। एवमध्यात्मविद्याऽध्ययनेनापि स्वगोचरेषु[७] मिथ्यात्वेन प्रयोजनाभावं प्रयोजनवत्यात्मनि च

१. क ख घ — **ग्रामनगरादिमज्जनानुकूलः**, ग — **आद्यः**।
२. क ख घ — **क्षेत्राद्यनुकूलश्च**, ग — **द्वितीयः**।
३. क ख — **निद्रादिदोषवारणाय**, ग घ — **तथा सति निद्रादिदोषस्तद्वारणाय**।
४. क ख घ — **साम्प्रदायिकाः**, ग — **सम्प्रदायविदः**।
५. क ख घ — **शोषयामि**, ग — **शोषयिष्यामि**।
६. क ख घ — **उच्चिक्षेप**, ग — **उपरि प्राचिक्षेप**।
७. ग घ — **दृश्येषु** [**स्वगोचरेषु** पश्चात्] उपलभ्यते, क ख — **दृश्येषु** नोपलभ्यते।

स्वागोचरत्वं ज्ञात्वा निरिन्धनाग्निवच्चित्तं स्वयमेवोपशाम्यति। महत्सेवा च महतां प्रणिपातपरिप्रश्नपरिचर्यादिः।

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।

इति भगवदुक्तेः[१]। यमादीन् सूत्रकार एव वक्ष्यति॥ १३॥

नन्वनादिकालप्रवृत्तराजसतामससंस्कारैर्विरोधिभिः प्रबलैः कुण्ठितोऽभ्यासो न स्थित्यै कल्पत इत्यत आह—

स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ॥ १४॥

सत्विति। तु शब्दः शङ्का[२]व्यावृत्तौ। सोऽभ्यासो दीर्घकालं नैरन्तर्येण भक्ति-श्रद्धादिरूप[३]सत्कारेण सेवितो दृढभूमिर्दृढसंस्कारः सन् व्युत्थानसंस्कारैरनभिभवेन स्थितौ समर्थो भवतीत्यर्थः। अदीर्घकालत्वे दीर्घकालत्वेऽपि विच्छिद्य[४] विच्छिद्य सेवने भक्तिश्रद्धातिशयाभावेन लयविक्षेपकषायसुखादीनामपरिहारे व्युत्थानसंस्कारप्राबल्याद् दृढभूमिरभ्यासः फलाय न कल्पत इति त्रयमुपात्तम्॥ १४॥

वैराग्यं लक्षयति—

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्॥ १५॥

दृष्टाश्चानुश्रविकाश्च दृष्टानुश्रविकास्ते च विषयाश्चेति। दृष्टाः स्त्र्यन्नपानादयः। गुरुमुखादनुश्रूयत इत्यनुश्रवो वेदस्तत्प्रतिपाद्याः स्वर्गादितत्साधनादय आनुश्राविकाः[५]। तेषु वैतृष्णस्य

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥

इत्यादिभगवदुक्तदिशाऽनेकदोष[६]दुष्टत्वभावनाजनितदोषसाक्षात्कारात् तृष्णा-रहितस्य या वशीकारसंज्ञा वशीकृतं मे चित्तम् अलं विषयैस्तुच्छैरित्युपेक्षा बुद्धि-

---

१. ग — **महत्सङ्गश्च शास्त्रेभ्योऽधिकः, शास्त्रं विनाऽप्युद्धारकत्वात्। उक्तञ्च तथा भारते— येषां विद्यायोनि स्वकर्म च** [भगवदुक्तेः पश्चात्] उपलभ्यते, क ख घ — **महत्....गरीयसी** इति नोपलभ्यते।

२. क ख — **व्यावृत्तौ**, ग घ — **व्यावृत्त्यर्थः**।

३. ग — **च सम्यक्** [**सत्कारेण** पश्चात्], घ — **च** उपलभ्यते, क ख — **च सम्यक्** नोपलभ्यते।

४. क घ — **विच्छिद्य विच्छिद्य**, ख ग — **विच्छिद्य**।

५. क — **आनुश्राविकाः**, ख ग — **आनुश्रविकाः**, घ — **अनुश्रविकाः**।

६. क ख घ — **दुष्टत्वभावनाजनितदोष०** उपलभ्यते, ग — **दुष्टत्वभावनाजनितदोष०** नोपलभ्यते।

वैराग्यमित्यर्थः। विषयपदोपादानं तु सद्गुरुसच्छास्त्रादीनां दृष्टानां मोक्षस्य चानुश्रविकस्य व्यावृत्तये। विषयिणं प्रमातारमवबध्नन्ति स्वसंयोगेन स्वासक्त्या संसारमभिलयन्तीति सिद्धं बन्धकत्वरूपं विषयत्वं तेषु नास्तीति भावः। वशीकार इत्यनेन विषयालाभासामर्थ्यादौ वैतृष्ण्यं न वैराग्यमिति सूचितम्। संज्ञापदेन च यतमानव्यतिरेकैकेन्द्रियवशीकारसंज्ञाभिश्चातुर्विध्यं सूचितम्। तत्र विषयान् सन्त्यक्तुमशक्नुवतोऽपि समानेच्छात्यागमात्रेणाऽऽद्यम्। ततोऽपि विषयाणां मध्ये प्रियतरवस्तुनि व्यतिरेकवृत्तिद्वितीयम्। तथा वृत्तावपि मनसि रागशैथिल्याद् बाह्येन्द्रियैरेव सेवनं तृतीयम्। तत्राप्यौदासीन्यं चतुर्थम्। तदुक्तं—

वैराग्यमाद्यं यतमानसंज्ञं क्वचिद्विरागो व्यतिरेकसंज्ञः।
एकेन्द्रियाख्यं हृदिरागसौक्ष्म्यं तस्याप्यभावस्तु वशीकृताख्यम्

इति। अथवा

सारासारविवेकार्थमुद्योगः प्रथमो भवेत्।
अभ्यासेन कषायाणां परिशेषावधारणम्॥
द्वितीयोऽथ कषायाणामौत्सुक्येन व्यवस्थितिः।
मनस्येव तृतीयः स्याद् बहिर्मात्रानिवृत्तितः॥
उपेक्षा सर्वथा तत्र स्याद्विरागश्चतुर्थक इति॥ १५॥

अपरं वैराग्यमुक्त्वा परवैराग्यमाह—

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्॥ १६॥

तदिति। तत्र वशीकार[१]संज्ञे वैराग्ये जाते सति सम्प्रज्ञातप्रभावेण पुरुषस्य या ख्यातिः प्रधानाद्विवेकेन यः साक्षात्कारः तत्परिपाकाद् गुणवैतृष्ण्यं गुणत्रयाशेषव्यवहारेषु, प्राप्तं प्रापणीयं[२], कृतं कर्तव्यं, ज्ञातं ज्ञातव्यं, हानं हातव्यमिति तृष्णाविरोधिनी चित्तवृत्तिर्भवति। तत्परं श्रेष्ठं फलीभूतं वैराग्यं, तत्परिपाकाच्चित्तोपशमपरिपाकस्ततोऽविलम्बेन कैवल्यमित्यर्थः। पुरुषख्यातेरित्यनेनात्मज्ञानहेतुकवैराग्यस्य परत्वं वदता तौष्टिकानामालस्य[३]विशेषदर्शादिजनितस्य हेतुत्वं[४] ध्वनितम्। तद्विवेकस्तु—प्रकृतित एव सर्वं जायतेऽतो मोक्षोऽपि तत्परिणामरूपसाक्षात्कारेण भविष्यतीति प्रकृतिविश्वासेन,

---

१. क ख घ — संज्ञे, ग — संज्ञके।
२. क ख — प्रापणीयं, ग घ — प्राप्तत्वम्।
३. क ख — विशेषदर्शादि०, ग घ — विषयदोषदर्शनादि०।
४. क ख ग — हेतुत्वं, घ — हेयत्वम्।

गृहस्थानां मुक्त्यभावाद्यथाकथञ्चित् परिव्राजविश्वासेन वा, कालादेव सर्वं जायतेऽतो मोक्षोऽपि काले[1] भविष्यतीति कालविश्वासेन वा मोक्षोपायेषु विषयेषु चार्जनरक्षणक्षयाऽतृप्तिहिंसादिदोष[2]दर्शने जातवैराग्यस्यात्मज्ञानपूर्वकत्वाभावाद्धेयत्व-मेवोचित्तम्।

सम्प्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः।
ते सर्वगं सर्वतः प्राप्य धीरा मुक्तात्मान सर्वमेवाविशन्ति।

इत्यादिश्रुत्यात्मज्ञानपूर्वकवैराग्यस्यैव मोक्षोपायत्वकथनादिति संक्षेपः। अत एव यथाकथञ्चिद् वैतृष्ण्यमात्रस्य निवृत्तये पूर्वं [3]वशीकारकथनेऽपि नात्र तथोक्तिः। आत्म[4]ज्ञानकथनेनैव सामान्यवैतृष्ण्यव्यावृत्तेः सम्भवात्॥ १६॥

इदानीमपरवैराग्यसाध्यं सम्प्रज्ञातं लक्षयति—

वितर्कविचारानन्दास्मितानुगमात् सम्प्रज्ञातः॥ १७॥

वितर्केति। प्रथमं भावनाविषयस्याशेषविशेषतः स्थूलांशचतुर्भुजाऽऽदेः साक्षात्कारो वितर्कः। विशेषेण [5]तर्कणमिति व्युत्पत्तेः। स्थूलकारण[6]पञ्चतन्मात्रा-हङ्कारमहदव्यक्तसूक्ष्मसाक्षात्कारो विचारः। विशेषेण सूक्ष्मपर्यन्तं चरणमिति व्युत्पत्तेः। तत्रारोहात् सत्त्वप्रकर्षेण जायमानाह्लादस्य साक्षात्कार आनन्दः।

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।

इत्यादिस्मृत्युक्त एतेषां कारणं बुद्धिः। सा ग्रहीत्रैकीभूताऽस्मितेत्युच्यते। तद्विषयकसाक्षात्कारोऽप्यस्मिता। एतैरनुगमाद् युक्तत्वाद्धेतोः सम्यक् प्रज्ञातत्त्वेन[7], भावनाविशेषरूपो योगः सम्प्रज्ञातनामा भवति। स च वितर्कादिभूमिभेदैः सवितर्कः, सविचारः, सानन्दः, सास्मितश्चेति चतुर्धा भवतीत्यर्थः॥ १७॥

अधुना सोपायमसम्प्रज्ञातं लक्षयति—

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः॥ १८॥

विरामेति। विरमणं विरामो वृत्तीनामभावः। तस्य प्रत्ययः प्रत्येति जनयतीति

---

१. क ख ग — **काले**, घ — **मोक्षकाले**।
२. क ख — **दर्शने**, ग घ — **दर्शनेन**।
३. क ख — **वशीकार०**, ग घ — **वशीकारान्त०**।
४. घ — **हेतुकत्व०** [**ज्ञान०** पश्चात्] उपलभ्यते, क ख ग — **हेतुकत्व०** नोपलभ्यते।
५. क ख घ — **तर्कणं**, ग — **तर्कः**।
६. क ख घ — **प्रपञ्च०**, ग — **पञ्च०**।
७. क ख घ — **प्रज्ञातत्त्वेन**, ग — **प्रज्ञावत्वेन**।

प्रत्ययः कारणं परवैराग्यम्। तस्याभ्यासः पौनःपुन्यं पूर्व उपायो यस्य स तथा। संस्कारशेषः ख्यातिसंस्कार एव शिष्यते यत्र सः, अन्यः असम्प्रज्ञातो निर्बीजसमाधिः। कर्मबीजाभावात्। अत्र पूर्वपदेनोपायस्य, शेषाभ्यां तु स्वरूपस्य कथनम्। अथवा संस्कारशेषः स्वापो विदेहप्रकृतिलीनानामनुभवश्च भवतीति तत्रातिव्याप्तिवारणाय पूर्वपदम्। तावन्मात्रमौपनिषदानामात्ममात्रसत्यत्वबुद्धिजजीवन्मुक्तावतिव्याप्तमिति। संस्कारशेषपदम्। न हि तदानीं संस्कारशेषत्वमस्ति। मिथ्यात्वघटत्वादिना जगद्भानस्य तदानीमङ्गीकारात्। तथा च परवैराग्यहेतुकः संस्कारशेषोऽसम्प्रज्ञात इति सिद्धम्। सोऽयं योग एव भवतीति भावः॥ १८॥

अयमसम्प्रज्ञातो द्विविधः—उपायप्रत्ययो भवप्रत्ययश्च। तत्र मुमुक्षुभिर्हेयं भवप्रत्ययमाह—

भवप्रत्ययो विदेहप्रकृतिलयानाम्॥ १९॥

भवेति। भूतेन्द्रियाणाम[1]न्यतमदात्मत्वेन प्रतिपन्नास्तदु[2]पासनतया तद्वासितान्तःकरणाः पिण्डपातानन्तरं भूतेन्द्रियेषु लीना मांसशोणितलोममेदोऽस्थिमज्जारूपषाट्कौषिकदेहशून्या विदेहाः। एवमव्यक्तमहदहंकारपञ्चतन्मात्राणामन्यतमदात्मत्वेन प्रतिपन्नास्तदुपासनया तद्वासितान्तःकरणाः पिण्डपातानन्तरं प्रकृत्यादिकारणेषु लीनाः प्रकृतिलयाः। विदेहाश्च प्रकृतिलयाश्च विदेहप्रकृतिलयास्तेषां चित्तं संस्कारमात्रशेषमित्यसम्प्रज्ञातः। स तु भवप्रत्ययो, भवन्ति जायन्तेऽस्यामित्यनात्मन्यात्मबुद्धिः प्रत्ययो हेतुर्यस्य स तथा। अविद्यामूलोऽयं योगोऽतः हेयः। अत एवोक्तं वायुपुराणे—

दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकाश्च शतं पूर्णं सहस्रं त्वाभिमानिकाः॥
बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः।
पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः॥
पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यते। इति॥ १९॥

अधुना [3]मुमुक्षूणामुपायप्रत्ययं द्वितीयमाह—

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्॥ २०॥

---

१. क ख — अन्यतमत्, ग घ — अन्यतरत्।
२. क ख ग — उपासनतया, घ — उपासनया।
३. क ख घ — मुमुक्षूणामुपायप्रत्ययं, ग — मुमुक्षुणोपादेयम्।

श्रद्धेति। [1]पुरुषगोचरा सात्त्विकी श्रद्धा तया वीर्यं प्रयत्नो जायते तेन यमादिपरम्परया स्मृतिर्ध्यानं, तेन समाधिः। तेन प्रज्ञा पुरुषगोचरा ख्यातिः। ततः परवैराग्यादसम्प्रज्ञात इतरेषां पूर्वविलक्षणानां मनुष्याणां मुमुक्षूणां भवतीत्यर्थः। अयमेव च राजयोग इत्युच्यते। तदुक्तं स्मृतौ—

समाधिस्तत्र निर्बीजो राजयोगः प्रकीर्त्तितः।
दीपवद्राजते यस्मादात्मा सच्चिन्मयः प्रभुः॥

इति। वस्तुतस्तु प्रथमसूत्रस्य भवो विशिष्ट देवादिजन्म तदेव प्रत्ययः कारणं यस्येत्यर्थो न तु कथितः। परवैराग्यस्यासम्प्रज्ञातहेतुतया तस्याऽ[2]विदुष्यऽसम्भवात्। इन्द्रियादिचिन्तामात्रेणासम्प्रज्ञातानुपपत्तेश्च। तस्मादीश्वरोपासनया प्रकृतिदेवतोपासनया वा प्रकृत्यावरणादिषु विशिष्टदेहप्राप्तिमाहात्म्येनोत्पन्नज्ञानादसम्प्रज्ञातयोगिनो भवन्ति। अधिकारसमाप्तौ मुच्यन्ते। मनुष्यास्तु न तथा, किन्तु साधनान्तरेणैवेत्याह—**श्रद्धे**ति। समानमन्यत्॥ २०॥

तत्र प्रज्ञान्ता उपाया मृदुमध्याधिमात्रभेदेन त्रिविधाः। तथा च योगिनोऽपि त्रयः—मृदूपायो मध्योपायोऽधिमात्रोपायश्चेति। तत्रै[3]कैकस्त्रिविधः—मृदुसंवेगो, मध्यसंवेगस्तीव्रसंवेगश्चेति। तत्र नवमस्याऽधिमात्रोपायस्य तीव्रसंवेगस्य क्षिप्रं सिद्धिमाह—

तीव्रसंवेगानामासन्नः॥ २१॥

तीव्रेति। संवेगोऽत्र वैराग्यम्, उपाया[4]नुष्ठानशैघ्र्यं वा, दृढतरसंस्कारो वा, येषामधिमात्रोपायस्तीव्रसंवेगस्तेषां योगिनाम् आसन्नः शीघ्रलभ्योऽसम्प्रज्ञातः। ततो मोक्ष इत्यर्थः॥ २१॥

नवमेऽप्यवान्तरभेदं विशेषं चाह—

मृदुमध्याधिमात्रत्वात् ततोऽपि विशेषः॥ २२॥

मृद्विति। पूर्वसूत्रोक्तविशिष्टान्तर्गतस्य तीव्रस्य मृदुमध्याधिमात्रत्वाद् अल्पमध्यातिशयितभेदेन त्रैविध्यात् ततोऽप्यासन्नादपि विशेषः। मृदुतीव्रसंवेगस्य योगिन

---

१. क ख घ — **पुरुषगोचरा सात्त्विकी श्रद्धा तथा वीर्यं प्रयत्नो जायते**, ग — **श्रद्धा गुरुशास्त्रदेशितार्थविश्वासरूपमास्तिक्यबुद्धिः सात्त्विकी पुरुषगोचरा तथा वीर्यं प्रयत्न उत्साहादिर्जायते।**

२. क ख ग — **अविदुष्यऽसम्भवात्**, घ — **अविदुष्यसम्भवात्।**

३. ग — **पुनः** [एकैकः पश्चात्] उपलभ्यते, क ख घ — **पुनः** नोपलभ्यते।

४. क ख ग — **अनुष्ठान०**, घ — **अनुष्ठाने।**

आसन्नात् समाधेः मध्यतीव्रसंवेगस्य योगिन आसन्नतरः। ततोऽधिमात्रतीव्रसंवेगस्या-सन्नतमो भवतीत्यर्थः। इत्थञ्च पूर्वसूत्रोक्तनवमयोगिनस्त्रयो भेदाः। तत्र चान्तिमस्यैवाति-शीघ्रलभ्योऽसम्प्रज्ञात इति सिद्धम्॥ २२॥

इदानीं पुरुषगोचरैतत्सर्वनैरपेक्ष्येणाञ्जसैव ज्ञानद्वारा कैवल्यान्तफलं साधनम्—

यस्य देवे यथा[1] भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम्।
देहान्ते देवः परमं ब्रह्म तारकं व्याचष्टे॥

इत्यादिश्रुतिभिः,

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः॥
तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह॥
यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्।
योगेन दानधर्मेण श्रेयोभिरितरेण च॥
सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा॥

इत्यादिस्मृतिभिश्च तथा तेनोक्तं भगवद्भजनरूपं उपायमाह—

ईश्वरप्रणिधानाद्वा॥ २३॥

ईश्वरेति। विशेष इत्यनुषज्यते। ईश्वरे [2]अनुपदवक्ष्यमाणलक्षणे प्रणिधानात् प्रणिधीयते तदेकमात्रनिष्ठं मनः क्रियतेऽनेनेति [3]पुनःपुनारूपं प्रेम तत्साधनमन्त्रज-पाराध्यत्वज्ञानादिरूपाद्वक्ष्यमाणाद् भक्तियोगाद् अनायासेन आसन्नतमः समाधिलाभो भवतीत्यर्थः। प्राकृत[4]स्वकृतजातजादनुग्रहात् तत्सम्भवेऽप्यासन्नतम इह प्रणिधानजन्मा, सर्वज्ञं भगवन्तं भावयत आसन्नतमे समाधिफले भवेतामिति तदिच्छारूपात् तत्तदनुग्रहादेव सद्गुरुलाभादितो भवतीति यावत्।

१. क ख — यथा, ग घ — परा।
२. क ख ग — अनुपद०, घ — अनुपदमेव।
३. क ख — पुनःपुनारूपं, ग घ — पुनःपुनरनुसंधानरूपम्।
४. क ख — स्वकृत०, ग घ — सुकृत०।

[१]संसाररूपस्वाऽनर्थहेतुस्वाज्ञाननाशे विरोधिविषयकत्वेन क्षमस्य स्वसाक्षात्कारस्योत्पत्तयेऽवश्यापेक्षितस्वसमाधिं प्रति स्वगोचरकारणकलापस्य समानविषयतया हेतुत्वेन मुख्यत्वेऽपि सत्यसंकल्पस्येश्वरस्येच्छामात्रेण फलदस्य यथाकथञ्चिदपि प्रणिधानं ततोऽपि मुख्यं तस्य क्लृप्ततादृशकारणकलापं विनाऽपि तत्प्रसादजनिततत्साक्षात्कारादिद्वारा स्वसमाधिसाधनत्वात्,

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।

इत्यादिभगवद्वाक्यैर्मायातत्कृताज्ञानतत्कृतबन्धादिनिवृत्तिफल[२]श्रवणाच्चेति ज्ञापयितुं तस्य तेन सह विकल्पोऽत्रान्ते वा शब्देनाभिहित इति दिक्।

[३]अत्रोपासनाद्वेति विहाय प्रणिधानाद्वेति कथनं तु कपिलजैमिनिप्रभृतीनामिव उपासनमात्रं न युक्तं, किन्तु वस्तुतो वस्तुतत्त्वे मनसोऽत्यादरेण नियोजनरूपं भावनम्। तत एव तत्साक्षात्कारसंभवादिति ज्ञापनाय लोकेऽप्यन्तर्गतसूक्ष्मविशेषे सादरेण चक्षुषो नियोजनरूपप्रणिधानादेव चक्षुषा साक्षात्कारदर्शनात्। तथैवाग्रे निरूपणाच्च। उपासनतस्तु न तथा।

योषिताग्निं ध्यायीत।

इत्यादाविव तस्यारोपविषयकत्वात्। तत्राग्नौ योषायामग्निदृष्टिविधानात्। एवं स्वस्य तस्मिन्नप्यारोपादिमूर्त्यभेदचिन्तनाद्यप्युपासनमेव वस्तुतत्वनिरपेक्षत्वात्। अत एव कीटभृङ्गन्यायेन प्राप्तमपि तत्फलं सारूप्यं शाश्वतमिति वदन्ति॥ २३॥

ननु[४] स्वमते प्रधानपुरुषातिरिक्तं तत्त्वं नास्त्येव, कुत ईश्वरस्तत्प्रणिधानं च? तत्र[५] चेश्वरस्य न प्रधानेऽन्तर्भावः। चेतनत्वादिनाऽभ्युपगतस्याचेतने प्रधानेऽन्तर्भावाऽयोगात्। नापि पुरुषेऽन्तर्भावः। सर्वेषां पुरुषाणां सच्चिन्मात्रस्वरूपत्वेनेश्वरत्वाऽनीश्वरत्वयोः स्वतोऽसम्भवात्। विनिगमनाभावे नैकतरस्य तथात्वाऽनिर्णयाच्च। न चात एव वैशेषिकादेरिव नित्यज्ञानादिमान् तदुभयातिरिक्तः स इति वाच्यम्। तत्त्वान्तराङ्गी-

---

१. क ख — **संसाररूप....इति दिक्** नोपलभ्यते, ग घ — **संसाररूप....इति दिक्** उपलभ्यते।

२. ग — **श्रवणाच्चेति**, घ — **श्रवणाच्च ततोऽपि मुख्यम्।**

३. क ख ग — **अत्रोपसनाद्वेति....शाश्वतमिति वदन्ति** नोपलभ्यते, घ — **अत्र....वदन्ति** उपलभ्यते।

४. क ख — **ननु स्वमते....ज्ञानोपदेष्टा च** नोपलभ्यते, ग घ — **ननु स्वमते....ज्ञानोपदेष्टा च** उपलभ्यते।

५. ग — **तत्र चेश्वरस्य न**, घ — **न चेश्वरस्य।**

कारेऽप्रसिद्धत्वात् मानाऽभावाच्च। न च कर्तृजन्यत्वव्याप्यकार्यत्वहेतुस्तदनुमापक इति वाच्यम्। शरीरजन्यत्वाद्युपाधिदोषगणग्रस्तत्वात्।

अपि[1] चेश्वरस्य कर्तृत्वे कथञ्चित्स्वोपकारार्थमेव कर्तृत्वं रागित्वं च स्यात्। रागवत एव स्वोपकारार्थमेव च प्रवृत्तिदर्शनात्। उपकाररागयोः स्वीकारे तु सोऽपि संसारी लोकवदेव स्यात्। इष्टापत्तौ नित्यैश्वर्यानुपपत्त्या सांख्यानामिव सर्गाद्युत्पन्नपुरुषे परिभाषामात्रं स्यात्। रागाद्यभावेऽपि दयया राजवल्लीलयैव करोतीति तु न युक्तम्। परलोकसुखमुद्दिश्य दयया, क्रीडादिसुखविशेषमुद्दिश्य च लीलायाः सर्वत्र दर्शनात्, तयोरपि साक्षात्परम्परया वा स्वोपकारनिबन्धनाच्च। अपि च स्वमते

साक्षी चेता केवलो निर्गुणश्च।

इत्यादिश्रुत्या सदा निर्गुण इति। तस्य प्रकृतिप्रवर्त्तनेच्छादयो गुणाः प्रकृतिप्रवृत्त्यनन्तरं, प्रकृतिप्रवृत्तिश्चेच्छादित इत्यन्योन्याश्रयप्रसङ्गः। तत्र, प्रधानस्य नित्येच्छादयः श्रुतिस्मृतिसिद्धसाम्यावस्थाऽनुपपत्तेः। अपि च प्रकृतिं प्रत्यैश्वर्यं किं प्रधानधर्मत्वेनाभिमतानामिच्छादीनां साक्षादेव सम्बन्धात्, उत अयस्कान्तमणिवत् सन्निधिसत्तामात्रेण प्रेरकत्वात्? तत्र नाद्यः-असङ्गश्रुतिविरोधात्। नापि द्वितीयः- सर्वेषामेव तत्तत्सर्गेषु भोक्तॄणामप्यविशेषेणेश्वरत्वप्रसङ्गादित्यास्तां विस्तरः। न च

तदैक्षत बहु स्याम्

इत्यादिश्रुतिः स्मृतिश्च चेतनकारणत्वबोधिका तत्र मानम्। तस्याः सर्गादावुत्पन्नमहत्तत्त्वोपाधिकपुरुषपरत्वेनाप्युपपत्तेः। यापि मुक्तस्येश्वरत्वबोधिका साऽप्युपाधिनिवृत्त्या पुरुषाणामीश्वरत्वपरा। अतो नास्ति प्रधानपुरुषयोरतिरिक्त ईश्वर इति सांख्याऽऽक्षेपनिरासायाह—

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥ २४ ॥

क्लेशेति। श्रुतिसिद्धनित्येश्वरत्वादिना संसारिपुरुषेभ्यो विशिष्यत इति स पुरुषविशेषः। संसारिपुरुषविलक्षणः पुरुष एव ईश्वरः। तथा चेश्वरस्य पुरुषेऽन्तर्भावस्तदुपाधेश्च प्रधान[2] इति भावः। शोधितजीवानामेवेश्वरत्वमस्त्विति शङ्कानिरासाय अपरामृष्ट इत्यन्तं विशेषणम्। क्लेशाः वक्ष्यमाणलक्षणा अविद्यादयः। कर्म धर्माऽधर्मौ। विपाकस्तयोः फलं सुखदुःखे। आशयाः तन्मूलीभूता वासनाः। एतैः अपरामृष्टः कालत्रयेऽप्यसंसृष्ट इत्यर्थः। एतेन क्लेशाद्यपरामृष्टत्वाच्छ्रुत्यादौ गीत ईश्वरो न शुद्धजीवो न वा सदृशः। कादाचित्कक्लेशसंबन्धाद् इत्यनुमानं लब्धम्। एवमन्यदपि स्वयमूह्यम्। अत्र भाष्यम्—

---

१. ग — **अपि चेश्वरस्य....पुरुषाणामीश्वरत्वपरा** उपलभ्यते, घ — **अपि....परा** नोपलभ्यते।

२. ग — **प्रधान इति भावः**, घ — **प्रधानेऽन्तर्भावः**।

अविद्याऽऽदयः क्लेशाः, कुशलाकुशलानि कर्माणि, तत्फलं विपाकः, तदनुगुणा वासना आशयाः। ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते। स हि तत्फलस्य भोक्तेति। यथा जयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते। यो ह्यनेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः। कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः। ते हि त्रीणि बन्धनानि छित्त्वा कैवल्यं प्राप्ताः। ईश्वरस्य च तत्सम्बन्धो न भूतो न भावी। यथा मुक्तस्य पूर्वा बन्धकोटिः प्रज्ञायते, नैवमीश्वरस्य। यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटिः सम्भाव्यते, नैवमीश्वरस्य। स तु सदैव मुक्तः सदैवेश्वर इति। योऽसौ प्रकृष्टसत्त्वोपादानादीश्वरस्य शाश्वतिक उत्कर्षः स किं सनिमित्त आहोस्विन्निर्निमित्त इति ? तस्य शास्त्रं निमित्तम्। शास्त्रं पुनः किन्निमित्तम्? प्रकृष्टसत्त्वनिमित्तम्। एतयोः शास्त्रोत्कर्षयोरीश्वरसत्त्वे वर्त्तमानयोरनादिः सम्बन्धः। एतस्मादेतद् भवति सदैवेश्वरः सदैव मुक्त इति। तच्च तस्यैश्वर्यं साम्यातिशयविनिर्मुक्तम्। न तावदैश्वर्यान्तरेण तदतिशय्यते। यदेवातिशयि स्यात् तदेव तत्स्यात्। तस्माद् यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वरः। न च तत्समानमैश्वर्यमस्ति। कस्माद्? द्वयोस्तुल्ययोरेकस्मिन् युगपत्कामितेऽर्थे नवमिदमस्तु पुराणमिदमस्त्वित्येकस्य प्रसिद्धावितरस्य प्राकाम्यविघातादूनत्वं प्रसक्तम्। द्वयोश्च तुल्ययोर्युगपत्कामितार्थप्राप्तिर्नास्त्यर्थस्य विरुद्धत्वात्। तस्माद् यस्य साम्यातिशयविनिर्मुक्तमैश्वर्यं स ईश्वरः। स च पुरुषविशेष इति।

अस्यार्थः[१]—वक्ष्यमाणा अविद्यादयः **अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः** इति सूत्रेण[२] प्रतिपाद्यमाना अविद्यादयः कुशलाऽकुशलानि इष्टाऽनिष्टसाधनत्वाद्धिताऽहितरूपाणि कर्माणि धर्माऽधर्माः[३]। तत्फलं क्लेशकर्मणोः फलम्। विपाकः विपच्यते साध्यते कर्मभिरिति जात्यायु[४]र्भोगात्मकः। तदनुगुणाः विपाकहेतवः आशयाः, चित्तभूमावाशेरत इत्याशयाः। ते च अविद्यादयः मनसि जागरस्वप्नयोः सांसारिकतया गृहीतेऽन्तःकरणे वर्तमानाः तादात्म्यसम्बन्धेन सन्तोऽपि पुरुषेऽसांसारिके द्रष्टरि अहमर्थे व्यपदिश्यन्ते। वस्तुतो यद्यपि तत्रैव तथापि स्वामित्वरूपभोक्तृत्वस्य पुरुषमात्रनिष्ठत्वात्। तत्रापि **ते व्यपदिश्यन्त** इत्याह। **स हीति**। हि यस्मात् स पुरुषस्तस्य क्लेशादेः फलस्य सुखादेः स्वस्मिन् प्रतिबिम्बितस्य भोक्ता भवतीत्यर्थः। स्वामित्व-

---

१. ग — अस्यार्थः वक्ष्यमाणा अविद्यादयः, घ — अथ भाष्यव्याख्या वक्ष्यमाणेति।

२. ग — सूत्रेण, घ — सूत्रे।

३. ग — धर्माधर्माः, घ — धर्माधर्मौ।

४. ग — भोगात्मकः, घ — भोगाः।

सम्बन्धेनाऽऽधारत्वे दृष्टान्तमाह—**यथे**ति। यथा[१] च राजा जयी पुरुषो धनी इत्यादिवदेव पुरुषः क्लेशादिमान् सुखी-दुःखी इत्यादिविद्वद्व्यवहार इति भावः। विशेषण-विशेष्यभावादितादात्म्यसम्बन्धेन पुरुषे सुखादिमत्त्वधीरेवाविद्येति सिद्धम्। इत्थञ्च भोक्तृत्वसम्बन्धेन क्लेशादिराहित्यं नान्यपुरुषेऽस्ति। किन्त्वीश्वर एवेत्याह—**यो ह्यनेने**ति। क्लेशादिमूलकभोगेनाऽसंसृष्ट इत्यर्थः। अनेनेति विशेषणाद् रामकृष्णादि-भावेन क्रीडतो महेश्वरस्य[२] स्वेच्छापरिगृहीतो विषयभोगोऽन्तर्यामिरूपस्य तु स्वोपाधि-सुखसाक्षितारूपो भोगोऽस्ति।

ऋतं पिबन्तौ सुकृतस्य लोके।

इति श्रुतेरिति ज्ञापितम्। शङ्कते—**कैवल्यमि**ति। यदि क्लेशादिशून्य एवेश्वरः श्रुतिस्मृतिभ्य एष्टव्यः, तर्हि कैवल्यमविद्या[३]निवृत्त्यादिरूपं मोक्षं प्राप्ता बहवो हिरण्यगर्भादयः केवलिनः केवलिनां जीवन्मुक्तानां प्रत्यक्षाः सन्ति। त एवेश्वरतया श्रुत्यर्थाः सन्त्विति भावः। तथा च सांख्यसूत्रम्—

मुक्तात्मनः प्रशंसा उपासा सिद्धस्य वा।

इति परिहरति। **ते ही**ति। हिरण्यगर्भादयः प्राकृतिकादीनि बन्धनानि छित्त्वैव मुक्ताः। न तु क्लेशादिना कदाप्यसंसृष्टाः। ईश्वरस्तु सदैव क्लेशादिभिरसंसृष्टः।

तत्र यः परमात्मा हि स नित्यं निर्गुणः स्मृतः।
कर्मात्मा पुरुषो योऽसौ बन्धमोक्षैः स युज्यते॥

इत्यादिशास्त्रादिति भावः। निर्गुणः आविद्यकगुणशून्यः। ईश्वरस्य तेभ्यो वैलक्षण्यं विवृणोति—**यथा मुक्तस्ये**ति। ज्ञानेन निरस्ताऽविद्यस्येत्यर्थः। प्रज्ञायते निश्चीयते संभाव्यत इति प्रकृतिलीनस्याभिमानसम्भवे पश्चाद्बन्धसंभावनेति भावः। **सदैव मुक्त** इति। कालत्रयेऽपि क्लेशतत्फलरहित इत्यर्थः। **सदैवेश्वर** इति। सदैवाप्रतिहत-सामर्थ्यवानित्यर्थः। नन्वीश्वरे न बाह्यं प्रत्यक्षं भानं रूपादिशून्यत्वात्। नापि मानसं अन्यात्मनोऽन्यमनोऽयोज्यत्वात्। अन्यथा चैत्रस्य मैत्रात्ममानसस्याप्यापत्तेः। नाप्यनुमानं दत्तदोषात्। नापि श्रुतिः, श्रुतिप्रामाण्यसिद्धौ श्रुत्येश्वरसिद्धिः। ईश्वरसिद्धौ च तत्प्रत्यक्ष-पूर्वकतया शास्त्रप्रामाण्यसिद्धिरित्यन्योन्याश्रयं मन्वानो[४] बौद्ध ईश्वरे प्रमाणमस्ति न वेति

---

१. ग — **तथा**, घ — **यथा**।
२. ग — **महेश्वरस्य** (क्रीडतः पश्चात्), घ — **ईश्वरस्य** (**विशेषणात्** पश्चात्) उपलभ्यते।
३. ग — **निवृत्त०**, घ — **निवृत्ति०**।
४. ग — **मन्वानः**, घ — **मन्यमानः**।

पृच्छति—**योऽसावि**ति। जीवेभ्यो भेदसाधकः सदेश्वरत्वादिरूपः प्रकृष्टसत्त्वोपादानात्। प्रकृष्टसत्त्वसम्बन्धात् शाश्वतिकः[1] सहजसिद्धः।

साक्षी चेता केवलो निर्गुणश्च।

इति श्रुत्या निरुपाधिकसच्चिन्मात्रतया सिद्धस्य भगवत ईश्वरत्वं प्रकृतिसम्बन्धोपाधिकमेव कारणोपाधिरीश्वर इत्यादिश्रुतेरिति भावः। **स किं निमित्त** इति? स किं प्रमाणकः? तादृशधर्मवानीश्वरो न केनापि प्रमाणेन सेत्स्यतीति भावः। उत्तरं—**तस्ये**ति। शास्त्रं श्रुत्यादिः। पुनः पृच्छति—**शास्त्रं पुन**रिति। शास्त्रस्यैव प्रामाण्यं कुत इत्यर्थः? उत्तरं—**प्रकृष्टे**ति। ईश्वरस्योपाधिर्यत् प्रकृष्टं सत्त्वं तत्कारणकमित्यर्थः। कालत्रयेऽप्यनभिभूतसत्त्वोपाधिकस्य यथार्थप्रत्यक्षरूपवाक्यार्थज्ञाने बाधकाभावात्। तादृशवाक्यार्थज्ञानजन्यत्वेन शास्त्रस्य[2] प्रामाण्यमित्यर्थः। नन्वेवमन्योन्याश्रयः शास्त्रप्रामाण्ये सिद्धे [3]सत्त्वसिद्धिस्तत्सिद्धौ च तन्मूलकतया शास्त्रप्रामाण्यसिद्धिरिति चेन्न, मन्त्रायुर्वेदप्रामाण्यवदीश्वरसिद्धेः प्रागेव शास्त्रप्रामाण्यसिद्धेः। मन्त्रायुर्वेदवच्च तत्प्रामाण्यमाप्तप्रामाण्यादिति। आप्तस्य वेदकर्तुः प्रामाण्यात् यथार्थज्ञानवत्त्वात् प्रामाण्यं स्वार्थगोचरप्रमाजनकत्वमनुमेयमित्यर्थः। ननु तर्ह्यन्योन्याश्रयस्तत्राह—**मन्त्रे**ति। मन्त्रो विषादिनाशकः। आयुर्वेदचिकित्साशास्त्रं वेदस्थमेव। तत्र संवादेन प्रामाण्यग्रहात् तद्दृष्टान्तेन वेदत्वावच्छेदेन प्रामाण्यमनुमेयमित्यर्थः। तेन नाऽन्योन्याश्रयः प्रामाण्यग्रहार्थमीश्वरनिश्चयस्यानपेक्षणादित्यर्थः।

मन्त्रायुर्वेदवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्।

इति सूत्रतया गौतमेन व्यवस्थापितत्वात्। अत्र तु प्रकृष्टसत्त्वस्य शास्त्रप्रामाण्यनिर्वाहकतामात्रमुक्तमिति न कोऽपि दोषः। **एतयो**रिति। विषयतासंबन्धेन च परमेश्वरत्वे क्रमेण वर्त्तमानयोरे[4]तयोः शास्त्रोत्कर्षयोरनादि[5]निमित्तनैमित्तिकभावः सम्बन्धः। शास्त्रं नैमित्तिकं सत्त्वोत्कर्षश्च [6]निमित्तं कारणत्वादित्यर्थः। निमित्तमाह—**सदैवे**ति। ईश्वरस्याऽद्वितीयत्वमपि प्रतिपादयति—**तच्चे**ति। नास्ति साम्यम् अतिशयश्च यस्मात् तादृशमित्यर्थः। अतिशयनिर्मुक्तौ हेतुमाह—**यदेवे**ति। यस्माद्धेतोर्यदेवातिशयि

---

१. ग — **शाश्वतिक०**, घ — **शाश्वतिकः**।
२. ग — **शास्त्र०**, घ — **शास्त्रस्य**।
३. ग — **सत्त्व०**, घ — **प्रकृष्टत्व०**।
४. ग — **एतयोः** उपलभ्यते, घ — **एतयोः** नोपलभ्यते।
५. ग — **निमित्त०**, घ — **निर्निमित्त०**।
६. घ — **उपाधि०** [**निमित्तं** प्राक्] उपलभ्यते, ग — **उपाधि०** नोपलभ्यते।

निरतिशयं तदेव तदैश्वर्यं स्यादिति योजना। सातिशयत्वे सत्यैश्वर्यमेव न भवति, अप्रतिहतेच्छत्वस्यैवाऽभावात्। अतो यदेव निरतिशयि तदेव मुख्यमैश्वर्यमित्यर्थः। उपसंहरति—**तस्मादि**ति। ऐश्वर्येण यत्र विश्रान्तिः प्राप्यते स ईश्वर इत्यर्थः। साम्यनिर्मुक्तौ हेतुमाह—**न चे**ति। **द्वयोरि**ति। नवम् अल्पकालस्थायि, पुराणं दीर्घकालस्थायि। एवमस्त्वित्येवं रूपेणैकस्मिन्नर्थे क्वचिद् द्वाभ्यां तुल्याभिमताभ्यां कामिते सति एकस्य [1]एकतरस्य सिद्धौ संकल्पसिद्धौ इतरस्येच्छाविघातादूनत्वं न्यूनत्वं स्यात्। अतो न समानाऽनेकेश्वरसंभव इत्यर्थः। ननु उभयोः संकल्पान्नवत्वं पुराणत्वं चोभयमेव भवतु। तत्राह—**द्वयोश्चे**ति। ननु योगीश्वरयोरिव तयोरपि समानसंकल्पसंभवे न विरुद्धार्थे युगपत्कामनाबाधान्नोक्तदोष इत्याशङ्क्य—

एको देवः।

एकमेवाद्वितीयम्।

भूयः सृष्ट्वा पतयस्त्वथेशः सर्वाधिपत्यं कुरुते।

महात्मा न तत्समश्चाभ्यधिकश्च दृश्यते।

इत्यादिश्रुतिभिः,

न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः।

इत्यादिस्मृतिभिश्च समानाधिकप्रतिषेधात्, तथा कल्पनमप्रामाणिकमित्याशयेनोपसंहरति—**तस्मादि**ति। तस्माद् विरुद्धार्थसंकल्पे विसंवादात् समानसंकल्पे च मानाभावात्। यस्य क्लेशाद्यपरामृष्टस्य साम्यातिशयविनिर्मुक्तं श्रुतिस्मृतिपुराणैश्चेति शेषः। तस्य पुरुषविशेषत्वमुपसंहरति—**स चे**ति। संसारिपुरुषेभ्यः सत्यसंकल्पत्वादिना विशिष्यत इति पुरुषविशेषः संसारिपुरुषविलक्षण इत्यर्थः। अत्र प्रकृष्टसत्त्वसंबन्धादेवेश्वरस्योत्कर्षकथनाज्जीवस्यापि मलिनसत्त्वकृत एवाऽपकर्षो न स्वतः। इत्थं चोपाधिभेदाज्जीवेश्वरविभागः स्वतस्त्वभेद एव।

तत्त्वमसि।

आदिवाक्यबोधित इति भाष्यकारस्य गूढाभिसन्धिः।

[2]केचित्तु रामानुजानुसारिण इत्थमभिप्रायमजानन्तो विशेषशब्दादिस्वारस्यमात्रेणान्यथाभावमुपवर्णयन्ति। तथाहि—यद्यप्यात्मन आकाशस्येवोपाधिभेदैर्जीवेश्वरादि-

---

१. ग — **एकतरस्य** उपलभ्यते, घ — **एकतरस्य** नोपलभ्यते।

२. ग — **केचित्तु रामानुजानुसारिण....तथेति संक्षेपः** उपलभ्यते। घ — **केचित्तु....संक्षेपः** नोपलभ्यते।

रूपत्वसंभवेन लाघवात्,

तत्त्वमसि।

आदिश्रुतिबोधितमैक्यमेव। भेदनिन्दया भेदश्रुतितोऽभेदश्रुतेरेव बलवत्त्वात्। अभेदज्ञानस्य मोक्षफलकत्वश्रवणात्। न भेदवाक्यानि त्वारोपितभेदानुवादपराण्येव कार्यकारणोपाधिविशिष्टयोश्च जीवत्वेश्वरत्वे विशिष्टैश्चानुगतधर्मिणः सामान्यात्मनः शुद्धस्य भेदः प्रातिभासिकोऽभेदो वास्तव इति वक्तुं शक्यं, तथापि विशिष्टस्यानतिरेके जीवत्वेश्वरत्वबन्धमोक्षादिसाङ्कर्यप्रसङ्गात्। विशिष्टस्यातिरेके तस्य मिथ्यात्वेन विनाशितया बन्धमोक्षसामानाधिकरण्यानुपपत्तेर्भेदाऽभेदपक्षश्च द्वैतमतेनाविशिष्टः। द्वैतमतेऽपि तत्तदुपाधिविशिष्टयोर्वस्तुतो भेदेऽपि चित्त्वादिनाऽभेदस्याङ्गीकारात्। तस्माद् भेदश्रुतिसिद्धः स्वरूपतोऽन्योन्याभावरूपो भेद एव तयोरस्ति। भेदनिन्दावाक्यानि तु वैधर्म्यलक्षणभेदस्य विभागाऽपरपर्यायस्य निन्दापराणि फेनबुद्बुदादीनामिव किञ्चिद-वच्छेदेन कथञ्चित्प्रतीयमानस्याऽपारमार्थिकत्वात्। आकाशादिदृष्टान्ता अप्येतस्यैवो-पाधिकत्वज्ञापकाः। अभेदवाक्यानि तु दुग्धजलयोरिव सम्मिश्रणस्याग्निविस्फु-लिङ्गादेरिवांशांशिभावेन पारमार्थिकस्याविभागलक्षणस्यैव वाऽभेदस्य बोधकानि। मानानि च तत्र लवणोदकदृष्टान्तवाक्यानि। तस्मान्नाऽखण्डो वाक्यार्थः मानाभावादिति।

तत्र सम्यक्। अयमेव नोऽनर्थो यत् संसार्यात्मदर्शनमित्यादिना वार्त्तिककारै-र्वस्तुतो नित्यमुक्तस्यात्मनः सदा शुद्धस्य कार्यकारणोपाध्यवच्छेद्यत्वरूपः स्वाऽऽभास-द्वारको विशिष्टभाव एव संबंधः। सकलतन्निवृत्तिश्च मोक्ष इति प्रतिपादनान्न बन्धमोक्षयोः सामानाधिकरण्याऽनुपपत्तिः। परम्परयोपाध्यवच्छेद्यस्य शुद्धस्य नित्यत्वात्। अत एव न तन्मताऽविशेषोऽपि परेण। चित्तैकमात्रव्यक्तित्वस्य कार्यकारणोपाधीनां मिथ्यात्वेन विशिष्टमिथ्यात्वादीनां चानङ्गीकारेण साम्याऽसम्भवात्। तस्मादत्र इष्टापत्तिः। केषाञ्चित् स्वबन्धाय कृत्या यथा तथेति संक्षेपः॥ २४॥

[१]तत्र लक्षणमुक्त्वा सार्वज्ञ्यरूपविशेषमाह—

तत्र निरतिशयं सर्वज्ञबीजम्॥ २५॥

तत्रेति। सर्वज्ञेति भावप्रधानो निर्देशः। पदार्थानां सम्यग्ज्ञानमिदमस्याल्पमिद-मस्याधिकमिति तारतम्येन वर्तमानं विवर्द्धमानमेकैकस्यापेक्षयेश्वरे निरतिशयं भवति।

---

१. ग — तत्र लक्षणमुक्त्वा....इत्यास्तां विस्तरः, घ — तत्रानुमानं प्रमाणमित्याशयेनाह—तत्र निरतिशयं सर्वज्ञबीजम्॥ २५॥ तत्र पुरुष-पुरुषविशेषयोर्मध्ये निरतिशयं काष्ठाप्राप्तं ज्ञानं सर्वज्ञस्य भगवतो बीजमनुमापकमित्यर्थः। तथा चायं प्रयोगः—अस्मदादीनां सातिशयं ज्ञानं क्वचित्काष्ठाप्राप्तम्, सातिशयत्वात्, परिमाणवत्। यत्रैव निरतिशयं तारतम्यवर्जितं भवति स सर्वज्ञेश्वरः। स चैक एव अन्यथा व्यवस्थाऽनुपपत्तेरिति दिक्॥ २५॥

तदेव तत्रेश्वरे सार्वज्ञ्याऽनुमापकमित्यर्थः। प्रयोगस्तु सार्वज्ञ्यबीजं सातिशयमस्मदादिज्ञानं क्वचित्काष्ठाप्राप्तं सातिशयत्वात् परिमाणवदिति। यत्र च तत्काष्ठा प्राप्तं सर्वज्ञ एव संसारिपुरुषविलक्षण इति दिक्।

अथवा तत्रानुमानमपि प्रमाणमित्याशयवानाह—**तत्र निरतिशयमि**ति। तत्र ईश्वरे निरतिशयं निर्गतो नास्ति अतिशयो यस्माद् अन्यस्य तादृशमन्यप्रतियोगिकाधिक्यरहितं काष्ठाऽप्राप्तं ज्ञानादिकं सातिशयास्मदादिज्ञानेनोक्तप्रकारेणानुमितम्। तदेव सर्वज्ञस्य भगवतो बीजं प्रमाणत्वाद्बीजमिव बीजमनुमापकम्। निरतिशयं तज्ज्ञानम् क्वचिदाश्रितं ज्ञानत्वात्। अस्मदादिज्ञानवत्। स चाश्रयो लाघवादेको नित्यः संसारिपुरुषविलक्षण इत्येवमनुमापकमिति यावत्। एकत्वे च तत्र न संख्यानानात्वविरोधित्वात्। किन्तु पुरुषद्वयाऽवृत्तिनिरतिशयज्ञानत्वावच्छिन्नाधिकरणतावत्त्वम्। आत्माऽनात्मवृत्तिभिन्नदुःखवदवृत्तिद्वित्वशून्यत्वं वा। अत्र भिन्नानामीश्वरघटादिद्वित्वस्यावृत्त्यन्तमीश्वरजीवद्वित्वस्य वारणाय घटपटादिद्वित्वं चेदृशं प्रसिद्धमिति दिक्। ननु स्वमते तस्य

विज्ञानमानन्दम्।

इत्यादिश्रुतिभिर्विज्ञानादिस्वरूपतैवाङ्गीक्रियते, न विज्ञानाश्रयत्वम्। अतो बाधितमिदमनुमानमिति। चेन्न, स्वमते प्रकाशरूपस्यापि सूर्यादेः प्रभारूपप्रकाशाश्रयत्ववत्। ज्ञानरूपस्यापि तस्य

न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते।

इत्यादिश्रुतिभिर्नित्यज्ञानाश्रयत्वाङ्गीकारेण बाधाऽभावात्। अत एव प्रयोजकत्वमपि न, श्रुतेरेवानुकूलतर्कस्य सत्त्वात्। श्रुत्यैकवचनस्य ब्रह्मशिवनारायणपरमात्मेत्यादिनामावगतिरपीत्यास्तां विस्तरः॥ २५॥

तस्य भगवतः [1]सर्गाद्युत्पन्नसत्यलोकादिमात्राधिकारिब्रह्मविष्णुरुद्रादिभ्यो भेदं

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यै[2]ते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥

[3]इत्यादिश्रुतितो गुरुभक्तेरप्यवश्यकर्तव्यताज्ञापनाय सर्वगुरुत्वं चाह—

स पूर्वेषामपि गुरुः कालेनाऽनवच्छेदात्॥ २६॥

---

१. ग — सर्गाद्युत्पन्नसत्यलोकादिमात्राधिकारिब्रह्मविष्णुरुद्रादिभ्यः, घ — ब्रह्मादिभ्यः।

२. ग — एव, घ — एते।

३. ग — इत्यादिश्रुतितो गुरुभक्तेरप्यवश्यकर्तव्यताज्ञापनाय सर्वगुरुत्वं चाह, घ — इति श्रुतेः ईशभक्तिं समत्वेनोक्ताया पुरुषभक्तेरप्यावश्यकतया ज्ञापनायादिगुरुत्वं चाह।

स पूर्वेषामिति। स ईश्वरः पूर्वेषामपि सर्गादौ उत्पन्नानां ब्रह्मादीनामपि प्राणिनामस्मदादीनामपि जीवानां गुरुः गृणात्युपदिशत्यपूर्वमर्थं दर्शयति, गुं मृत्युं रुध्नाति परिपालनोपदेशादिना वेति गुरुः। पिता अन्तर्यामिविधया ज्ञानोपदेष्टा च।

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै।

इत्यादिश्रुतेः। कुतः ? कालेनाऽनवच्छेदात्। अनाद्यनन्तत्वादित्यर्थः। द्विपरार्द्धादिकालाऽऽयुषोऽपरिगणनादिति यावत्। तथा[1] चायं पूर्णत्वात् परमगुरुः। अन्ये चास्यैव ज्ञानशक्त्यवतारा इति ज्ञाने अर्चिता एव भवन्तीति भावः। एतदभिप्रेत्यैवात्र, पितेति पदमपहाय गुरुपदमुपात्तमिति संक्षेपः।

अयमत्र निष्कर्षः—श्रुतिस्मृतिपुराणेषु सर्वेषां नाम्नां केवलपरत्वप्रतिपादनाद् गुणातीतः परमात्मैव [2]ब्रह्मविष्ण्वादिपदार्थः। ये तु सत्यलोका[3]दिब्रह्मादयस्ते जीवविशेषा एव, न तु परमेश्वरस्य लीलावताराः।

अथाशरीरस्य ब्रह्मण एतास्तनवो वायुरादित्यः कालोऽपः प्राणोऽन्नं ब्रह्मा विष्णू रुद्र इत्येके अन्यमभिध्यायन्त्येके अन्यम्।

इत्यादिमैत्रायणीश्रुतावन्यत्र च श्रुतौ[4]

ब्रह्मणो मायिकोऽपि देहो नास्ति अग्न्यादिदेहा एव देहाः।

इति निर्देशेन ब्रह्मणो मायिकलीलाविग्रहस्या[5]प्यभावादज्ञापनात्। अत एव कालीपुराणादौ नृसिंहवराहशरभानां परस्परोपमर्द्यत्वं, शिवस्य नारायणोपदेश्यत्वं मोहपारवश्यादिकम्, अन्यत्र च नारायणस्य शिवोपदेश्यत्वं, वृन्दाशापाद्याक्रान्तत्वं, मोहपारवश्यादिकं, शिवनारायणोर्द्वयोरपि चतुर्मुखोपदेश्यत्वं, चतुर्मुखस्याधिक्यञ्च श्रूयते। चतुर्मुखस्य ब्रह्मणो

---

१. क ख घ — **तथा चायं....गुरुपदमुपात्तमिति संक्षेपः**, ग — **ब्रह्मादयो हि सर्गाद्युत्पत्तिकालेन द्विपरार्द्धादिकालेन च परिच्छिद्यन्ते। अस्य च परिच्छेदकः कालो न श्रूयते, न वा संभवति कारणत्वाऽधिष्ठातृत्वादीनामत्र विश्रामात्। अत ईदृशेनैव तेषां निर्वाहात्। पूर्वसर्गोत्पन्नानां तेषां सर्वेषां साद्यन्तानामनाद्यनन्तो भगवान् परमात्मैव तेभ्यो विलक्षणो गुरुः श्रुतिस्मृतिप्रमाणादिति भावः।**

२. क ख घ — **ब्रह्मविष्ण्वादि०**, ग — **ब्रह्मादि०**।

३. क ख घ — **आदि०**, ग — **आदिषु**।

४. क ख घ — **श्रुतौ**, ग — **स्वतः**।

५. क ख — **अप्यभावादज्ञापनात्**, ग — **अप्यभावज्ञापनलीलावताराभावज्ञापनात्**, घ — **अप्यभावज्ञापनात्**।

यो ब्रह्माणम्।

इत्यादिभ्यो[१] जीवत्वं श्रुतिस्मृतिषु[२] स्फुटमेव। तस्मान्न ते लीलावताराः, किन्तु जीवविशेषा एव उपासनार्थं परमेश्वरा उच्यन्ते इति केचित्।

तन्न सम्यक्। [३]भक्तानुग्राहकलीलाविग्रहबोधकतापिन्यादिविरोधात्। किन्तु

[४]भूयः सृष्ट्वा पतयस्तथेशः सर्वाधिपत्यं कुरुते महात्मा।

इति श्रुतेस्तल्लोकाधिपतित्वेन ब्रह्मविष्णु[५]रुद्रादीनां नानाविधानां स्रष्टृत्वेन परमात्मनः श्रवणात्। नृसिंहरामगोपालतापिनी[६]कैवल्यादिश्रुतिषु लीलाविग्रहस्याप्याम्नानाच्च। ब्रह्मविष्णुरुद्रा द्विविधाः—श्रौताः पौराणाश्चेति। तत्र ये श्रौतास्ते साक्षात् परमेश्वरस्यावताराः। निरवद्यत्वादिश्रवणात्। ये पुनः पौराणाः, ते पुनरविद्यावद्विषयकर्मतत्फलवत्त्वात् संसारिपुरुषविशेषा एव। रागित्वादीनां जीवलिङ्गानां बहुशः श्रवणात्। अत एव न साक्षात् परमेश्वरस्यावतारा यद्यपि, तथापि शक्तिशक्तिमदभेदेनोपासनार्थमेव परमेश्वरस्योच्यन्ते, न तत्त्वतः।

ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तयः।
ततो न्यूनाश्च मैत्रेय देवा यक्षादयस्तथा॥
ब्रह्मविष्णुमहेषानां य परः स महेश्वरः।

इत्यादिस्मृतिभिस्तथाऽवगमात्। अतो येऽपि रामादयस्तेषामवतारास्तेऽपि तथैव। तेषाञ्च सर्वेषां जीवत्वेऽपि परमात्मन्येवाहम्भावादीश्वरावतारत्वं स्मृतिषूच्यते। तेऽपि परमेश्वरशक्तिविशेषरूपतया प्रायः पूर्णत्वाल्लीलयैव बहुविधरूपेणाविर्भवन्ति तिरोभवन्ति चेत्यास्तां विस्तरः। सूचितञ्चैतत् प्रकृतसूत्रेण भगवतः सर्वज्ञत्वेन गुरुत्वप्रतिपादनात्। ब्रह्मादीनाञ्च शिष्यत्वेन[७] स्वतोऽज्ञत्वज्ञापनादित्यपरे वर्णयन्ति। तदपि न सम्यक्। भक्तिप्रवर्तकतन्त्रपुराणेतिहासादीनामानर्थक्यप्रसङ्गात्। अतो वस्तुतो विचित्रानेकशक्तिमत्त्वेनेश्वरत्वात् सर्वसमर्थस्य भक्तानुग्रहादिनिमित्तं तत्तद्रूपेण स्वेच्छयैव

---

१. क ख घ — **इत्यादिभ्यः**, ग — **इत्यादिना**।
२. क ख घ — **श्रुतिस्मृतिषु**, ग — **श्रुतिषु**।
३. क ख घ — **भक्तानुग्राहक०** उपलभ्यते, ग — **भक्तानुग्राहक०** नोपलभ्यते।
४. क ख घ — **भूयः**, ग — **त्रयः**।
५. क ख घ — **रुद्रादीनां**, ग — **रुद्राणाम्**।
६. क ख घ — **कैवल्यादिश्रुतिषु**, ग — **विष्णुपुराणादिषु**।
७. घ — **न** [**शिष्यत्वेन** पश्चात्] उपलभ्यते, क ख ग — **न** नोपलभ्यते।

महदल्पकार्यकर्तृत्वमेवोचितम्। अन्यथा विचित्रानन्तशक्तिमत्त्वादिरूपेश्वरत्वानुपपत्तेः। अतो द्वैविध्ये मानाभावादवतारिणोऽवतारेभ्योऽधिकत्वेन गुरुत्वव्यपदेशस्यापि सम्भवात्। मैत्रायणीयश्रुतौ तु स्वादृष्टारब्धभोगार्हशरीराभावस्यैव विवक्षणान्न कोऽपि दोष इति न तथा। तथाहि—यद्यपि

एकमेवाद्वितीयम्।
एको देवः सर्वभूतेषु गूढः।
सर्वव्यापी सर्वभूतान्तरात्मा।

इत्यादिश्रुतिभिर्निर्गुण एकरूप एव तथापि

एको वशी सर्वभूतान्तरात्मा।
एकं रूपं बहुधा यः करोति।
अजायमानो बहुधा विजायते।

इत्यादिश्रुतिभिरन्तर्यामिबहिर्यामिभेदेन द्विविधः। तत्राऽन्तर्यामी अन्तः स्थित्वा प्रेरकः।

एष एवात्माऽन्तर्याम्यमृतः।

इति श्रुतेः।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।

इति स्मृतेश्च। स च चिदचितोः प्रेरकत्वाच्चिदन्तर्यामी, अचिदन्तर्यामी चेति द्विविधः। उपासकानां सविग्रहः प्रतिभाति। अन्येषां तु चिन्मात्ररूपेणापि प्रतिभाति। बहिर्यामी बहिः स्थित्वा नियामकः। यथाऽवतारादिः प्रसिद्धः शास्त्रलोकयोः। सोऽपि नित्यविभूतिनिलयो लीलाविभूतिनिलयश्चेति द्विविधः। तत्राद्योऽवतारी प्रागुक्तः। द्वितीयोऽपि व्यूहावतारभेदेन द्विविधः। तत्र व्यूहो वेदादिप्रदातृसृष्ट्यादिमात्रसम्पादकगुणद्वयमात्रव्यञ्जकविग्रहवान्। स एव ब्रह्मादिरूपः सन् सर्वदेहेषु व्याप्य स्थितः। सर्गस्थितिप्रलये ब्रह्म स्वयं भवति।

षाड्गुण्यपरिपूर्णोऽसौ वासुदेवः सनातनः।
त्रिधा कृत्वात्मनो रूपं चतुर्धा कुरुते जगत्॥
अन्तर्यामित्वमापन्नः सर्गं सम्यक् करोति हि।

इत्यादिस्मृतेः। अवतारस्तु स्वसङ्कल्पपूर्वकपराधीनव्यक्तीकृतदेहो भक्तवात्सल्याद्यनेकगुणोल्वणः।

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।
सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसि॥

इत्यादिभगवदुक्तेः।

सोऽपि विभवार्चादिभेदेन द्विविधः। तत्र विभवावतारो गमनागमनसंश्लेषविश्लेष-योग्यं यथा भवति तथा दिव्यं देहं प्रकटयन् स्थितः। सोऽपि स्वरूपावेशभेदेन द्विविधः। तत्र स्वरूपावतारः सर्वेश्वरः स्वीया[१]प्राकृतरूपमितरसजातीयतया प्रकटयन् स्थितः। सोऽपि मनुजामनुजभेदेन द्विविधः। तत्र मनुजो रामकृष्णादिर्नराकृतिः।

गूढं परं ब्रह्म मनुष्यलिङ्गम्।

इत्यादिप्रमाणात्। अमनुजस्तद्व्यतिरिक्तो देवतिर्यगादिः यथोपेन्द्रमत्स्यादिः। आवेशाऽवतारोऽपि स्वरूपशक्त्यावेशभेदेन द्विविधः। तत्र स्वरूपावेशाऽवतारः, केषुचिच्चेतनेषु स्वेन सन्निधीभूय स्थितः। शक्त्यावेशावतारः, तथैव शक्त्या सन्निधीभूय स्थितः। तत्राद्यः कपिलानन्तव्यासपरशुरामप्रभृतिः। द्वितीयः पृथुधन्वन्तरिप्रभृतिः।

स्वशक्तिलेशादृतभूतसर्गः।

इत्यादिस्मृतेः। एवं

यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्॥

इत्यादिना भगवतोक्ता, आधुनिका अपि महानुभावा मन्तव्याः। अर्चावतारस्तु अर्चकपराधीनात्मस्थितिः। सोऽपि गृहायतनभेदाद् द्विविधः। तत्र गृहार्च्चावतार उपासकैर्गृहदेवालयादौ पूज्यत्वेन स्थापिता मन्त्रादिसंस्कृता मूर्त्तिः। अवतारत्वं तु तस्मिन् मन्त्रादिबलतः सन्निधीभूय भगवतोऽवस्थानात्। आयतनार्चावतारस्तु शालग्रामादिषु स्वसंकल्पादिना सन्निधीभूय स्थितः। अत एव तेषां परमात्मत्वेन पूजातः फललाभ उच्यते शास्त्रेषु। अयं विशेषः, यद्यपि

चराचरेषु सर्वेष्वपि स एव शक्त्या सन्निहितः।

इति सर्वस्य तदात्मत्वमुक्तं विष्णुपुराणादिषु

एकः समस्तं यदिहाऽस्ति किञ्चित् तदच्युतो नास्ति परं ततोऽन्यत्।
सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम्॥

इत्यादिना। तथापि विचित्रकार्यानुकूलशक्त्या तेष्वसन्निधानान्न तेषामवतारत्व-व्यपदेशः, किन्तु जीवत्वेनास्मदादितुल्यानामपि पृथुप्रभृतीनामेव विचित्रशक्तिदर्शनात्। कृष्णादीनां तु न शक्त्यावेशमात्रेण तथात्वम्। उक्तप्रमाणविरोधात्।

---

१. क ख घ — **अप्राकृत०**, ग — **प्राकृतम्**।

सच्चिदानन्दविग्रहं पञ्चपदं वृन्दावनभूरुहतलासीनम्।

इत्यादिश्रुत्या स्वरूपविभवावतारत्वज्ञापनाच्च। एवं ब्रह्मविष्णुरुद्राणामपि बोध्यम्। शास्त्रप्रामाण्यात्। अवतारत्वादेव च ब्रह्मादीनां रामादीनां[१] च लोकवत्तु लीलाकैवल्यन्यायेन स्वीयमैश्वर्यं प्रकटयितुं मनुष्यादिलिङ्गैर्व्यवहरणेऽपि शिष्यत्वेऽपि च न हानिः। जीवलिङ्गानां तेषामन्यथासिद्धत्वेन जीवत्वासाधकत्वात्। अत एव तत्रैकतरालम्बनेनान्यतरस्यापकर्षं वर्णयतां दुर्गतिरपि। एतदभिप्रायेणैव श्रूयते वायुपुराणादिषु—

तपसा तोषयित्वा तु पितरं परमेश्वरम्।
ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत्॥
कल्पान्तरे पुरा ब्रह्मा विष्णुरुद्रौ जनान ह।
विष्णुश्च भगवाँस्तद्वद् ब्रह्माणमसृजत् पुनः॥
नारायणं पुनर्ब्रह्मा ब्रह्माणं च पुनर्भवः।
एवं कल्पेषु कल्पेषु ब्रह्मविष्णुमहेश्वराः॥
परस्परस्माज्जायन्ते परस्परजयैषिणः।
तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः॥
प्रभावः कथ्यते तेषां परस्परसमुद्भवात्।
अयं परस्त्वयं नेति संरम्भाभिनिवेशिनः॥
यातुधाना भविष्यन्ति पिशाचाश्च न संशयः।

इत्यादिना। एवं गीतायां राम[२]कृष्णादीनामपकर्षप्रतिपादने श्रूयते निन्दा—

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।

इत्यादिना। स्वरूपविभवा[३]वतारत्वेन तद्भेदापकर्षादिप्रतिपादनस्यान्याय्यत्वादित्यभिप्रायात्। एतेन यथा भूमौ बीजाङ्कुरद्रुमाः। द्रुमे च फलशलाटवः। तथा शुद्धचैतन्ये परमात्मनि ईशसूत्रविराजः, विराजि च मत्स्यकूर्मकृष्णादयोऽस्मदादयश्च। यथा फलान्तर्गते बीजे द्रुमप्रसवसामर्थ्यमस्ति, न शलाट्वन्तर्गते। एवं कृष्णादिषु जगत्सृष्टिसामर्थ्यं, नास्मदादिषु। यथा बीजादयो भूमात्राः सत्ताविशिष्टशक्तियोगाद् भूवापूरिता अङ्कुरादिभावं प्रतिपद्यन्ते। एवमीशादयोऽपि चिन्मात्रा एव सन्तो मायाशक्तियोगाच्चिदा-

---

१. क ख घ — **रामादीनां**, ग — **रामकृष्णादीनाम्**।

२. ग — **अपि** [कृष्णादीनां-पश्चात्] उपलभ्यते, क ख घ — **अपि** नोपलभ्यते।

३. क ख घ — **अवतारत्वेन**, ग — **अवतारत्वं न**।

पूरिताः सूत्रादिभावम्। तत्रास्मदादीनां कृष्णादिभावः **कीटभृङ्गन्यायेन** भावनाजन्यः। विराजादि[१]भावस्तु **लवणोदकन्यायेन** मनःप्रणिधानप्राप्यः। उपादानोपादेयभावस्याभावसद्भावाभ्यां तथाऽवगमादिति कल्पनं न प्रामाणिकमित्यपि मन्तव्यम्। ईशलिङ्गानां बलवत्त्वादित्यास्तां विस्तरः॥ २६॥

इदानीं परमेश्वरं निरूप्य तत्प्रणिधानं व्याख्यातुं प्रणिधानाङ्ग[२]मन्त्रमाह—

तस्य वाचकः प्रणवः॥ २७॥

तस्येति। तस्य निरुपाधिकस्येश्वरस्य प्रणवः, अखण्डोङ्कारः वाचकः रूढ्या बोधकं नाम संज्ञारूपकम्।

अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः।
तस्योङ्कारः स्मृतो नाम तेनाहूतः प्रसीदति॥

इति योगियाज्ञवल्क्यादिस्मृतेः।

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।

इति भगवदुक्तेश्च। तत्र[३] अदृष्टविग्रहः अश्रुतशरीरः, भावग्राह्यः [४]भक्तिमात्रग्राह्यः। अत एव मनोमयः मनोऽभिलषिताकारः। अथवा तस्य [५]त्वेच्छया[६]ङ्गीकृतविग्रहावच्छिन्नस्य ब्रह्मादिमूर्त्तित्रयात्मकत्वेन श्रुतस्येश्वरस्य प्रणवः, अश्च उश्च मश्चेत्या[७]कारात्मा [८]अखण्डोङ्कारः।

अकारं चाप्युकारं च मकारं च प्रजापतिः।
वेदत्रयात् समुद्धृत्य ॐङ्कारं निर्ममे पुरा॥

इति मनुनो[९]क्तेः। वाचकः प्रत्येकशक्त्या बोधकं नाम योगिकम्।

अकारं ब्रह्माणम् उकारं विष्णुं मकारं रुद्रम्।

---

१. क ख घ — **भावस्तु**, ग — **भावः**।

२. ग — **साक्षात्तत्र प्रमाणं** [मन्त्रं पश्चात्] उपलभ्यते, क ख घ — **साक्षात्तत्र प्रमाणं** नोपलभ्यते।

३. ग — **तत्र** [**च** पश्चात्] उपलभ्यते, क ख घ — **तत्र** नोपलभ्यते।

४. ग — **मात्र०** [**भक्ति०** पश्चात्] उपलभ्यते, क ख घ — **मात्र०** नोपलभ्यते।

५. क ख — **तु**, ग घ — **स्व०**।

६. क ख घ — **अङ्गीकृतविग्रहावच्छिन्नस्य ब्रह्मादिमूर्त्तित्रयात्मकत्वेन श्रुतस्येश्वरस्य**, ग — **ब्रह्मादिरूपिणः**।

७. क ख — **आकारात्मा**, ग घ — **अकारोकारमकारात्मा**।

८. क ख घ — **अखण्ड०**, ग — **सखण्ड०**।

९. क ख — **उक्तेः**, ग घ — **उक्तः**।

इति श्रुतेः। तत्र प्रतिपाद्यस्येशस्यैकत्वेऽपि पदार्थतावच्छेदकानां भेदेन द्वन्द्वः। तस्यैव प्रातिभासिकभेदेन वा द्वन्द्वः। तत्र भेदाभेदयोस्तु मानम्।

ब्रह्माणमेव विष्णुमेव रुद्रमेव विभक्तांस्त्रीणि वा विभक्तानि।

इत्यादिश्रुतिः। अखण्डार्थपक्षे तु तस्य जीवपरयोरभेदरूपाखण्डार्थस्य परमात्मनः प्रणवः, अखण्ड एवोङ्कारः वाचकः। अकारस्य जीवे, मकारस्य ब्रह्मणि, उकारस्याऽभेद इति प्रत्येकशक्त्या बोधकं नाम यौगिकमेव।

अकारेण ममात्मानमन्विष्य मकारेण ब्रह्मणा अनुसंदध्यादुकारेणा-विचिकित्सन्नि।

इत्यादिश्रुतेः। अत्र समस्तं व्यस्तं—

त्वां शरणद गृणाम्योम्।

इति पदमिति स्मृतेः। सर्वेषां पक्षाणां युक्तत्वेऽप्ययं पक्षो युक्ततमः।

तत्त्वमसि।

इत्यादिमहावाक्यबोधिताभेदस्य लाभात्। तापिन्या[१]दौ तथैव व्युत्पादनाच्च। अत एवाखण्डात् सखण्ड एवोङ्कारो मनुनाप्यादृतः। तन्त्रे च—

हंस इत्यजपां नित्यं श्वासप्रश्वासगां बुधः।
विपरीतां तु तां कृत्वा सोऽहमेकत्वसिद्धये॥
अन्योन्यं सहयोर्लोपात् सिद्ध्यत्योङ्कारशब्दकः।
अपूर्वोऽयमुपास्याथ ब्रह्म सद्यो भवेन्नरः॥
केवलोऽयं यतेरेव सहकञ्चुकितः पुनः।
उपास्योऽयं मनुष्याणां सर्वेषां यतिनां मतः॥

इत्यभेदार्थकाऽजपामूल उक्तः। अस्मिन् पक्षे च अश्वासावुश्चेत्यादिकर्मधारय एव। अभेदस्य प्रतिपादयिषितत्वात्। अत्रायं निष्कर्षः। प्रणवो न गवादिपदवत् केवलं रूढं नाम। अवयवशक्त्याऽवयवार्थस्यापि बोधनात्। नापि पाचकादिपदवद् यौगिकमेव। रूढ्याऽखण्डितार्थस्यापि बोधनात्। नापि पङ्कजादिपदवद्योगरूढम्। यौगिकार्थान्वितरूढ्यर्थावच्छिन्नस्यैकस्या[२]बोधनात्। नापि चैत्रादिपदवच्[३]छरीरशक्त-

---

१. क ख — आदौ, ग घ — आदिषु।

२. क ख घ — अबोधनात्, ग — बोधनात्।

३. क ख ग — शरीर० उपलभ्यते, घ — शरीर० नोपलभ्यते।

विष्ण्वादिपदपर्यायाणाम्। अकारादीनामपि शरीरशक्तानामात्मनि लाक्षणिकत्वात्। तदात्मोङ्कारो लक्षकं नाम

सर्वं वेत्ति विष्णुः।

इत्यादौ ज्ञानाश्रयत्वस्य[१] शरीरे बाधेन विष्ण्वादिपदानामात्मन्येव शक्त्यङ्गीकारात्। तत्पर्यायाणां[२] अकारादिपदानामात्मनि [३]शक्तेरेवाङ्गीकारात्। ॐङ्कार-निविष्टाकारादीनां शास्त्रगृहीतसङ्केतेन अज्ञातार्थज्ञापकानामसति बाधके बलवत्तरे[४] लाक्षणिकत्वायोगाच्च।

न विधौ परः शब्दः।

इति न्यायात्। तस्मान्मण्डपादिपदवद् रूढयौगिकं समुदायशक्त्यवयवशक्तिभ्यां प्रत्येकमेव रूढ्यर्थावयवार्थयो[५]र्बोधजननात्। यथा मण्डपपदं मण्डपे शेते इत्यादौ समुदायशक्त्या स्थण्डिलमेव बोधयति, न मण्डपायिनम्[६]। मण्डपं भोजयेत्यादौ त्ववयवशक्त्या मण्डपायिनमेव बोधयतीति न स्थण्डिलम्[७]। एवं प्रणवोऽपि समुदायशक्त्या निरुपाधिकमेवेश्वरं बोधयति। प्रत्येकशक्त्या ब्रह्मादीन् अभेदश्च बोधयतीति दिक्।

अत्र प्रणवस्य वाचकत्वकथनादीश्वरो वाच्य इति लब्धम्। सोऽयं वाच्यवाचक-भावः स्वरूपसम्बन्धविशेषोऽतिरिक्तो विभागरूपो[८] वा। योऽर्थः स शब्दः, यः शब्द सोऽर्थ इति शब्दार्थयोराहार्याऽन्योन्याभेदाध्यासरूपेणेश्वरसङ्केतेन

ओमित्येतदक्षरमिदं सर्वम्।

ॐमित्येकाक्षरं ब्रह्म।

इत्यादिश्रुतिस्मृतिमूलकेन द्योत्यते। न तु नैयायिकानामिव जन्यते। ईश्वरस्य स्वतन्त्रतया सर्गान्तरे तदीयसङ्केतभेदेन शब्दार्थभेदप्रसङ्गात्। एतन्मते च सत्कार्य-

---

१. क ख घ — **ज्ञानाश्रयत्वस्य** ग — **ज्ञानादेः**।
२. क ख घ — **तात्पर्याणां**, ग — **तत्पर्यायाणाम्**।
३. क ख घ — **शक्तेरेव**, ग — **एव शक्तेः**।
४. क ख घ — **बलवत्तरे**, ग — **लाघवे**।
५. क ख घ — **बोधजननात्**, ग — **बोधनात्**।
६. ग — **तत्रायोग्यत्वात्** [**मण्डपायिनं**पश्चात्] उपलभ्यते, क ख घ — **तत्रायोग्यत्वात्** नोपलभ्यते।
७. ग घ — **भोजनबाधात्** [**स्थण्डिलं** पश्चात्] उपलभ्यते, क ख — **भोजनबाधात्** नोपलभ्यते।
८. क ख घ — **विभागरूपः**, ग — **अविभागरूपः**।

वादस्याऽङ्गीकारात्। सम्बन्धस्य सदा समानरूपतया [१]प्रलयोऽपि विद्यमानस्य सर्गान्तरे प्रकाशनान्न दोष इति संक्षेपः।

ननु भवत्वेवं वाच्यवाचकभावस्तथापि कथं प्रणवस्यैवात्राऽऽदरः। न[२] च परमात्ममन्त्रत्वविशेषादिति वाच्यम्। सगुणशिवरामादीनामपि परमात्मत्वेनैवोपास्यतया तत्तदाराधनसाधनप्रणवान्यमन्त्राणामपि परमात्ममन्त्रत्वस्य तत्तद्रूपाकर्षणरूपफलस्य च अधिकस्य तत्तत्तापिन्यादिषु प्रतिपादनात्। अतस्तद्वाचकस्तन्मन्त्र इत्येव वक्तुं युक्तमिति चेत् सत्यम्। यद्यप्येवं तथापि तद्यथा—

शङ्कुना सर्वाणि पर्णानि संतृणात्येवमेवोङ्कारेण सर्वा वाक् संतृण्णा।

इति श्रुत्या

ऋग्वेदः स्यादकाराद्य उकारान्तं यजुर्मतम्।
सामवेदो मकारान्तः सर्वग्राही ततो ध्रुवः॥
षडङ्गन्यायमीमांसा पुराणं स्मृतिपूर्वकम्।
वेदेऽन्तर्भूतमेव स्यात् सर्ववेदाश्च तारगाः॥
अहयोर्मध्यगा वर्णा लक्षौ कषलगौ यतः।
अकारः प्रकृतिस्तत्र हकारः प्रकृतिर्मता॥
तथा प्रणवमोङ्कारो जीवात्मा पुरुषः स्मृतः।
उकारः प्रकृतिरूपत्वात् प्रकृतिः सहरूपिणी॥
पुम्प्रकृत्यात्मका वर्णास्तस्मादम्मध्यगाः सदा।
क्षराऽक्षरपरो देवो मकारः परमेश्वरः॥

इत्यादिस्मृत्या च सर्वेषामानुपूर्वीविशेषविशिष्टवर्णरूपाणां मन्त्राणां प्रणव एवान्तर्भावितत्वात्। तदाराधनेनैव सर्वाराधनतत्फले स्त इत्यभिप्रेत्य

एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कारः यश्छन्दसां ऋषभो विश्वरूपः। ओमितीदं सर्वं, सर्वे वेदा यत् पदमामनन्ति, एतदालम्बनं श्रेष्ठं धनुर्गृहीत्वोपनिषदं महास्त्रं प्रणवो धनुः।

एतद्वै महोपनिषत्[३]।

---

१. क ख — प्रलयः, ग घ — प्रलये।

२. क ख घ — न च परमात्ममन्त्रत्वविशेषादिति वाच्यं, ग — परमात्ममन्त्रत्वादिति चेन्न।

१. क ख — महोपनिषत्, ग — महोपनिषद् उपनिषदमावर्तयेत्, घ — महोषभो विश्वरूपः रूपमिति।

ब्रह्मसंस्थोऽमृतत्वमि[१]ति प्रणवेनैव तस्मिन्नवस्थिता ॐङ्कारे परे ब्रह्मणि पर्यवसितो भवेत् प्रणवमेवानुसन्दध्यात्।

इत्यादिश्रुतिभिः श्रेष्ठत्वमभिसन्धाय तस्यैव मुमुक्षुजनाराध्यत्वप्रतिपादनात्। उदाहृतयाज्ञवल्क्यस्मृतौ

मनोमयस्तेना[२]हृतः।

इति पदाभ्यां ध्यानविशेषयोगेन तत्तद्रूपाकर्षकत्वज्ञापनाच्च। सर्वमन्त्ररूपत्व-सर्वमन्त्रफलदातृत्वादिहेतुभिः सर्वाधिकोऽयमेवेति।

तस्य वाचकस्तन्मन्त्र इति विहाय **तस्य वाचकः प्रणव** इत्युक्तम्। अन्ये मन्त्राश्चैतन्मन्त्रव्याख्यारूपा अधिकारिविशेषाराध्यरूपा इत्यनवद्यम्। उपाधि-भेदेनाऽप्युपास्यभेदो व्यावहारिकोऽपि नास्ति। नात्र काचन भिदास्ति।

नैवात्र काचन भिदाऽस्ति।

इत्यादिश्रुतेरिति सूचयितुं[३] तस्येति व्यस्तैकवचननिर्देशः। तस्य वाचक ॐमिति विहाय **तस्य वाचकः प्रणव** इति निर्देशस्तु ॐमित्यस्यातिरहस्यत्वेन गोप्यत्वाय। अथ कस्मादुच्यते प्रणवः? यस्मादुच्चार्यमाण एव ऋग्यजुसामाऽथर्वाङ्गिरसः ब्रह्म ब्राह्मणेभ्यः प्रणामयति नामयति च। तस्मादुच्यते प्रणव इति। प्रणवशब्दं व्युत्पादयन्त्याः श्रुत्या अनुसारात् तत्तदर्थकमन्त्रान्तरेणापि बह्वीभावसूचनायेति दिक्। यद्यप्येवं तथापि, **तज्जप** इत्यत्र लक्षितलक्षणया प्रणवोपस्थापितस्य ॐमित्यस्यैव मुख्यतया ग्रहणम्। अथ कस्मादुच्यते ॐङ्कारः?

यस्मादुच्चार्यमाण एव प्राणानूर्ध्वमुत्क्रामयति, तस्मादुच्यते ओंकारः।

इत्यादिश्रुत्या तस्यैव विशिष्टफलदत्वेन मन्त्रराजत्वेन चाभिषिक्तत्वादिति दिक्॥ २७॥

एवं वाचकमुक्त्वा तेनैव समाधिगम्यस्य परमात्मनो मानान्तराऽविषयस्य भावनं तदनुसन्धानं विना न सम्भवतीति तदनुसन्धानरूपं जपं स्वजन्यादृष्टेन दुरितनिवृत्त्यात्म-प्रकाशायावश्यमावर्त्तनीयम्। प्रथमतस्तदनु चानुग्रहद्वारा आत्मप्रकाशकमर्थभावनरूपं प्रणिधानमाह—

तज्जपस्तदर्थभावनम्॥ २८॥

---

१. क ख ग — इति, घ — एति।

२. क ख — आहृतः, ग घ — आहूतः।

३. क ख घ — सूचयितुं, ग — ज्ञापयितुम्।

तज्जप इति। [१]तस्य प्रणवस्य जपः विधिवदुच्चारणं, तदर्थस्य प्रणवार्थस्य अचिन्त्यैश्वर्यशक्तियुक्तस्य परमात्मनो भावनं प्रकृतितत्कार्यपुरुषेभ्यो विवेकेनानु-संधानम्—

व्यक्ताव्यक्ते च पुरुषस्तिस्रो मात्राः प्रकीर्तिताः।
अर्धमात्रा परं ब्रह्म ज्ञेयमध्यात्मचिन्तकैः॥

इत्यादिगरुडवाक्येभ्यः। अथवा तदर्थस्य परमात्मनः पूर्णस्य भावनं जीवाभेदेन पुनः पुनश्चेतसि निवेशनम्।

तमेतमात्मानं ॐमिति ब्रह्मणैकीकृत्य ब्रह्म वात्मनोमित्येकीकृत्य।

इति श्रुतेः। वस्तुतस्तु—

अकारेण ममात्मानमन्विष्य मकारेण ब्रह्मणाऽनुसंदध्यात् उकारेणाऽविचिकित्सितः।

---

१. क ख घ — **तस्य प्रणवस्य जपः....अचिन्त्यैश्वर्यशक्तियुक्तस्य,** ग — तस्य प्रणव-पदशक्यस्योमित्यस्य प्रणवपदस्वारस्यादन्येषामपि मन्त्राणां वाग्भवादीनामष्टाक्षरादीनां च मोक्षहेतूनां जपः विधिवदुच्चारणं वाचिकोपांशुमानसभेदेन त्रिविधं निरूपितमीश्वरगीतादौ—

यः शब्दो बोधजनकः परेषां शृण्वतां स्फुटम्।
स्वाध्यायो वाचिकः प्रोक्त उपांशोरथलक्षणम्॥
ओष्ठयोः स्पन्दमात्रेण परस्याश्रुतिबोधकः।
उपांशुरेष विज्ञेयः सहस्रं वाचिकाज्जपात्॥
यत्पदाक्षरसंगत्यापरिस्पन्दनवर्जिता।
चिन्तनैः सर्ववर्णानां मानसं तं जपं विदुः॥

इति। इदं च मन्त्रपरमेव न स्तोत्रादिपरम्। मानसस्तोत्रपाठस्य तन्त्रे—

मनसा यः स्मरेत् स्तोत्रं वचसा मनुं जपेत्।
उभयं निष्फलं याति भिन्नभाण्डोदकं यथा॥

इत्यादिना निन्दनात् मन्त्रस्य वाचिकजपनिषेधस्त्वत्र मन्त्रजपोऽत्युच्चैर्न कर्त्तव्य इत्यर्थको न तु सर्वथा वाचिको नैव कार्य इत्यर्थकः। उदाहृतस्मृत्या वाचिकस्यापि परिगणनात्। जपविधिश्चोक्तस्तन्त्रादौ यथा—**उत्थायात्मनि साक्षिणि स्थितिमतः सच्चित्सुखात्मा भवेत्, उक्त्वा पूर्वकृतं स्वसंविदि बहिः शुद्धस्ततः स्वासनः। गुर्वादेः कृतसन्ततिर्धुतमहाविघ्नो वपुः, संहरन्नूनं तच्च विधाय सृष्टिमुखतो विन्यस्य सन्मातृकाः॥ १॥** संहारादिकं मातृका **अपि विभूत्यादीन् स्वमन्त्रान्, ततोऽन्यस्मिन्नस्य विधाय हृद्यभिमतं नैवातिदीर्घं मनुम्। नो वा ह्रस्वतरं जपेद्विधियुतः सत्कामश्च विधिर्निष्कामस्य मतो विशिष्टफलदो विध्यन्वितोऽयं द्वयोः॥ २॥ श्रुतेर्मतं सम्यगेतदागमेषु निरूपितम्। मन्त्रार्थज्ञानतस्तच्च पशुभावनिवृत्तये॥ ३॥ वैफल्यं गदितं तेषां पशुभावे यतः शिवैः। तस्माज् ज्ञात्वैव कुर्वीत जपयोगमिति स्थितिः॥ ४॥** तदर्थभावनं तदर्थस्य प्रणवार्थस्य नित्येश्वरस्य।

इत्यादिश्रुतेस्तदर्थस्य जीवपरमात्मनोर[1]भेदस्यैतन्मते द्रव्यगुणयोरिवाविनाभावरूपस्य भावेन [2]चिन्तनमित्यर्थः। [3]जपपूर्वकं भावनं कर्त्तव्यम्—

प्रणवेन परं ब्रह्म ध्यायीत नियतो यतिः।

जपँश्च प्रणवं नित्यं ब्रह्मविष्णुशिवात्मकम्॥

कोटिसूर्यसमं तेजो ध्यायेदात्मनि निर्मलम्।

इत्यादिस्मृतेः। तदेवं भक्तियोगेन भगवदनुग्रहस्ततः परवैराग्यादसंप्रज्ञातसमाधिलाभः॥ २८॥

किञ्च, जप इत्यनेन मन्त्रयोगः, अर्थभावनमित्यनेन विवेकज्ञानाऽभ्यासरूपो ज्ञानयोगः, अभेद[4]भावरूपोऽद्वैतयोगश्च संगृहीतः। त्रिविधस्याप्येतस्य प्रणिधानस्य क्लृप्तकारणताकस्वोचितकर्मादिषु समाध्यन्तसाधनं विनाप्यनुपदमेव वक्ष्यमाणरीत्या साक्षात्परम्परया वा धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयसाधनत्वमस्तीत्यावश्यकमभिप्रेत्य फलान्तरमाह—

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च॥ २९॥

तत इति। ततस्त्रिविधयोगरूपादीश्वरप्रणिधानात् प्रत्यक्चेतनाधिगमः। प्रतीपं विपरीतमञ्चति विजानातीति प्रत्यगत्र भ्रान्तो जीवपदाभिधेयः। चेतनोऽत्र

नित्यो नित्यानां चेतनश्चेतनानाम्।

इतिश्रुतिप्रमित ईशपदाभिधेयः। तयोरधिगमः साक्षात्कारः। स च तत्र जीवस्य स्वस्य, नास्मि न मे [5]नाऽहमित्याद्याकारो दृढः साक्षात्कैवल्यहेतुः।

---

१. क ख घ — **अभेदस्यैतन्मते**, ग — **अभेदरूपाखण्डार्थस्य**।

२. क ख घ — **चिन्तनं**, ग — **भावनम्**।

३. क ख घ — **जपपूर्वकं भावनं....परवैराग्यादसम्प्रज्ञातसमाधिलाभः**, ग — **अथातो वैराग्यसंस्कृते शरीरे ब्रह्मयज्ञनिष्ठो भवेदित्याद्युपक्रम्य स एव तत्त्वमसीत्यात्माऽवगम्योऽहं ब्रह्मास्मीत्यादिश्रुतिभिरप्यभेदज्ञानस्यैव महाफलत्वब्रह्मयज्ञत्वयोः प्रतिपादनात्। एवं तदर्थस्य सगुणस्यापि भक्तवात्सल्याद्यनेकगुणोल्वणत्वादिना ध्यानं कार्यम्। तेन शीघ्रमेवेष्टसिद्धिर्भवतीति भावः। प्रमाणं चात्र भगवद्गीतादि।**

४. क ख घ — **भाव०**, ग — **भावन०**।

५. ग — न कर्त्ताऽस्मि, न मम रागादयो धर्माः। न वाऽभिमानवानहंकारः। **त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्। तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिव** इति श्रुतेरिति भावः। तन्मते भोक्ता भोगः द्रष्टा श्रुतौ तु भोगाश्रयः। अतो न तद्विलक्षणोक्तिविरोधः [**नाहं**- पश्चात्] उपलभ्यते, क ख घ — **न कर्त्ताऽस्मि....तद्विलक्षणोक्तिविरोधः** नोपलभ्यते।

तमेव विदित्वाऽतिमृत्युमेति।

इत्यादिश्रुतेः। विरोधिविषयकत्वेन स्वाज्ञानोच्छेदक्षमत्वाच्च। ईशस्य च सर्व-कल्याणगुणपूर्णः सर्वनियन्ता प्रकृतितत्कार्यतदभिमानिपुरुषेभ्यो भिन्न इत्याकारः परोक्षो वासुदेवः सर्वमित्याकारो वा यथाधिकारं परोक्षोऽपरोक्षो वा दृढो भक्तानुग्रहार्थमभि-व्यक्तसाक्षात्कारोऽ[1]परोक्षोऽर्जुनमुचुकुन्दप्रह्लादादीनां श्रीकृष्णनरसिंहरूपो वा यथा-धिकारं यद्यपि न साक्षात्कैवल्यहेतुः सम्भवति। अविरोधित्वेन तस्य तदज्ञान-नाशेऽसमर्थत्वात्। तथापि स प्रत्यगात्मनः स्वात्मसाक्षात्कारद्वारा वस्तुतस्तदज्ञानादेव तदभजनात्, जाततत्कोपेन स्वाज्ञानधाराभिर्विविधबन्धदर्शनात् तद्विषयकाज्ञानमेव स्वाज्ञानद्वारा सर्वानर्थहेतुरिति तदज्ञाना[2]पनयनेन स्वाज्ञानोच्छेदद्वारा वा कैवल्यहेतुः।

ब्रह्मविदाप्नोति परम्।

ज्ञात्वा देवं मुच्यते सर्वपाशैः।

इत्यादिश्रुतिभिर्बहुशस्तस्यापि मोक्षहेतुत्वबोधनात्। पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययाविति सूत्रयता[3] व्यासेन तथा ज्ञापनाच्च। वस्तुतस्तयोरधिगम-**स्तत्त्वमस्या**दिवाक्यबोधिताभेदसाक्षात्कारस्तत्त्वम्पदार्थयोः शुद्धयोर्न भेद इत्याकारः। शुद्ध[4]स्त्वम्पदार्थो जगत्कर्तृतत्पदार्थाऽविनाभूत इत्याकारो वा विशिष्टाद्वैतसम्मतः।

भवन्ति ज्ञानिनो नित्यं सर्वतश्च निरागमाः।

ऐकात्म्यं नाम कश्चिद्धि कदाचित् प्रतिपद्यते॥

इत्यादिमहाभारतवाक्यैस्तस्यैव दुर्लभत्वेनो[5]पाधेयत्वज्ञापनात्। अपूर्वाबाधि-तार्थविषयकत्वेनाविद्योच्छेदक्षमत्वाच्च। तदा[6] तदुभयसाक्षात्कारं प्रति समानविषयतया तदुभयार्थभावनस्य युक्तितो हेतुत्व[7]लाभेऽपि केवलं यथाकथञ्चिदप्याचरितमीश्वरभा-वनरूपेश्वरप्रणिधानमेवाऽऽशुप्रसादादिद्वारा तदुभयसाक्षात्कारहेतुर्भवतीत्यभिप्रेत्य—

स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्।

---

१. क ख घ — **अपरोक्षोऽर्जुन०....नरसिंहरूपः** उपलभ्यते, ग — **अपरोक्षो....नरसिंहरूपः** नोपलभ्यते।

२. क ख ग — **अपनयनेन**, घ — **अपनयने**।

३. ग — **भगवता** [सूत्रयता पश्चात्] उपलभ्यते, क ख घ — **भगवता** नोपलभ्यते।

४. क ख ग — **त्वं**, घ — **तु**।

५. क ख घ — **उपाधेयत्व०**, ग — **उपादेयत्व०**।

६. क ख ग — **तदा**, घ — **तत्र**।

७. क ख घ — **लाभे**, ग — **अलाभे**।

ध्याननिर्मथनाभ्यासाद् देवं पश्येन्निगूढवत्॥

इत्यादिश्रुतिभिः। तस्मात्

सर्वेषु कालेषु मामनुस्मर।

इत्यादिभगवद्वाक्यैरेव तदुभयादिसाक्षात्कारसाधनतयाऽवगतमिति मुख्यतया अत्रा[१]दरितम्। तस्य च न केवलं मोक्षरूपामुष्मिकफलसाधनतदुभयसाक्षात्कार एव फलम्। अपि त्वैहिकामुष्मिकफलतत्साधनप्रतिबन्धकानां विविधान्तरायाणामभावादिरपीत्याह—**अप्यन्तरायाभावश्चे**ति। वक्ष्यमाणानामन्तरायाणामभावो विनाशः। चकाराद् विविधभोगहेतवः सिद्धयश्च भवन्तीत्यर्थः।

तस्य ह न देवाश्च नाऽभूत्या ईशते आत्मा ह्येषां भवतीति।
यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन सम्पन्नो महीयते॥

इत्यादिश्रुतेः। तत्रापि।

ब्रह्मोडुपेन प्रतरेत विद्वान् स्त्रोतांसि सर्वाणि भयावहानि।

इति श्रुतेः। साक्षादन्तरायाऽभावफलकस्य जपस्यात्मसाक्षात्कारो दृष्टद्वारा फलं जनयन् सिद्धिमवाप्नोति।

जपतो नास्ति पातकम्

इत्यादिस्मृतिभिस्तथा प्रतिपादनात्। अर्थभावनस्य त्वन्तरायाभावो नान्तरीयकं फलम्।

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः॥

इत्यादिस्मृतिभिस्तथा ज्ञापनात्। वृद्धास्तु प्रत्यक्चेतनपदं केवलजीवपरं नयन्तस्तत्साक्षात्कारस्यैवादृष्टद्वारार्थभावनफलत्वं विघ्ननिवृत्तेश्च जयफलत्वं, समुदितस्य समुदित[२]फलत्वं प्राहुः॥ २९॥

अन्तरायानाह—

व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनाऽलब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः॥ ३०॥

व्याधीति। ये चित्तं तत्फलसाधनेभ्यो योगादिभ्यो विक्षिपन्ति ते विक्षेपा ऐहिकामुष्मिकफलप्रतिबन्धरूपा योगाद्यन्तराया नव। तत्र व्याधिः, धातुरसेन्द्रियनिमित्तो ज्वरादिः। स्त्यानं, चित्तस्य लघुत्वेऽपि चाञ्चल्यादिना कर्मानर्हता। संशयः, सिद्ध्यति न

---

१. क ख घ — आदरितं, ग — आदृतम्।

२. ग — वा [फलत्वं-पश्चात्] उपलभ्यते, क ख घ — वा नोपलभ्यते।

वेत्युभयकोटिको विपर्ययः। प्रमादः, कामादिः। आलस्यं, योगानुष्ठाने प्रवृत्तिविरोधिकफादिना कायगुरुत्वं तमसा[1] चित्तगुरुत्वञ्च। अविरतिः, विषयतृष्णा। भ्रान्तिदर्शनं, इदं कर्म न सिद्ध्यति न वेत्येककोटिको विपर्ययः। अलब्धभूमिकत्वं, समाधिभूम्यलाभः। मधुमत्यादयः समाधिभूमयो वक्ष्यन्ते। अनवस्थितत्वं, लब्धायां भूमौ चित्तस्याऽस्थिरत्वम्। पूर्वभूमौ हि स्थिरं चित्तमुत्तरां भूमिं जयेत्। तस्मादस्थिरत्वं दोषः॥ ३०॥

न केवलमेते योगादिसाधनान्तरायाः, किन्तु दुःखादिरूपाऽन्तरायानपि कुर्वन्तीत्याह—

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः॥ ३१॥

दुःखेति। दुःखं शारीरं मानसञ्चाध्यात्मिकम्। तत्र शारीरं व्याधिवशात्। द्वितीयं कामादिवशात्। व्याघ्रसर्पादिजनितमाधिभौतिकम्। ग्रहपीडादिजमाधिदैविकम्। दौर्मनस्यं इच्छाविघातात् क्षोभो मनसि। अङ्गमेजयत्वं अङ्गानां कम्पः। श्वासः बाह्यवायोर्नियमेनाऽन्तःप्रवेशः समाध्यङ्गरेचकविरोधी। प्रश्वासः कौष्ठ्यस्य वायोर्नियमेन बहिर्गमनं पूरकविरोधी। एते विक्षेपसहभुवः। विक्षेपेषूत्पन्नेषु भवन्तीत्यर्थः॥ ३१॥

अथ कृष्यादिवद् बह्वायाससाध्यानां कर्मणां साङ्गानामेव यथोचितफलदातृत्वेन यथा[2]कथञ्चित् क्रियमाणानां[3] फलदातृत्वाभावाच्छ्रमाद्यनेक[4]दुःखफलकत्वदर्शनाद् वर्णाश्रमाभिमानादिनिबन्धनत्वेन परमश्रेयोऽ[5]पघातित्वाच्च नातिप्राशस्त्यं, न वा विद्वदुपादेयत्वं युक्तम्। किन्तु भगवद्भजनस्यैवाग्निवादपूर्णस्याप्य[6]स्य,

स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्।

इति वदता भगवता महा[7]फलत्वप्रतिपादनात्। यथाऽग्निकणोऽतिस्वल्पोऽपि [8]तृणराशिं ज्वालयँस्तेनै[9]व वर्द्धितः पूर्णः सर्वाणि सूचितानि[10] कार्याणि जनयति। तथा भगवतो यथाकथञ्चिन्नामोच्चारणादिरूपमपि प्रणिधानम् अजामिलादेरिव पापराशिं

---

१. क ख घ — **तमसा चित्तगुरुत्वं** उपलभ्यते, ग — **तमसा चित्तगुरुत्वं** नोपलभ्यते।
२. ग — **अपि** [**कथञ्चित्**पश्चात्] उपलभ्यते, क ख घ — **अपि** नोपलभ्यते।
३. क ख घ — **क्रियमाणानां** उपलभ्यते, ग — **क्रियमाणानां** नोपलभ्यते।
४. क ख घ — **दुःखफलकत्वदर्शनात्**, ग — **दुःखफलकं तद्दर्शनात्**।
५. क — **अपघातित्वात्**, ख ग घ — **घातित्वात्**।
६. क ख घ — **अस्य**, ग — **तस्य**।
७. क ख घ — **फलत्व०**, ग — **फल०**।
८. क ख घ — **तृण०**, ग — **महातृण०**।
९. क ख घ — **एव**, ग — **इव**।
१०. क ख घ — **सूचितानि**, ग — **स्वोचितानि**।

नाशयत्[1] तेन नाशेनैवाधिकं सम्पाद्यमानं श्रद्धादिना पूर्णं भजनीय इच्छासहकृतं सर्वाभिलषितं साधयति। तस्मात् प्रणिधानमेवावश्यकम्। तच्च चतुर्विधम्—परममुख्यं, मुख्यं, मुख्यजातीयं, मुख्यकल्पञ्चेति।

तत्राद्यं गोपीनामिव तद्गुणगणश्रवणादिना द्रुतचेतसो[2] द्रुतताम्रस्येव दृढ-तदाकारता[3]तद्विषयकवृत्तिप्रवाहरूपं प्रेम

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।

इत्यादिनोक्तम्। अनेन प्रेमभक्तियोगो दर्शितः। स च परमेश्वरचरणार-विन्दविषयकैकान्तिकात्यन्तिकप्रेमप्रवाहोऽनवच्छिन्न इत्यर्थः।

द्वितीयं तदसामर्थ्ये[4] बहिःप्रवृत्ति[5]स्वभावस्य मनसः प्रत्याहारेण पुनः पुनर्भगव-त्यात्मनि निवेशनरूपोऽभ्यासो निदिध्यासनाख्यः

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय॥

इत्याद्युक्तम्। तृतीयन्तु तद[6]सामर्थ्येऽपि तत्प्रतीतिफलकनामोच्चारणैकादश्यु-पवासादिरूपं कर्म

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।

इत्यादिनोक्तम्। चतुर्थं तत्राऽप्यसामर्थ्ये स्वभावत एव कृतानामपि कर्मणां फलेच्छां त्यक्त्वा परमेश्वरे परमगुरावर्पणम्

साधु वाऽसाधु वा कर्म यद्यदाचरितं मया।
तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्॥

इति संकल्पविशेषरूपम्।

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥

इत्यादिनोक्तं भगवद्गीताद्वादशाध्याये। अत्र च प्रणिधानशब्देनो[7]क्तम्। तत्र

---

१. क ख घ — **नाशयत्**, ग — **नाशयति**।
२. क ख घ — **द्रुतचेतसः** उपलभ्यते, ग — **द्रुतचेतसः** नोपलभ्यते।
३. क ख घ — **तद्विषयकवृत्तिप्रवाह०** उपलभ्यते, ग — **तद्विषयकवृत्तिप्रवाह०** नोपलभ्यते।
४. क ख घ — **तदसामर्थ्ये** उपलभ्यते, ग — **तदसामर्थ्ये** नोपलभ्यते।
५. क ख घ — **स्वभावस्य**, ग — **शीलस्य**।
६. क ख घ — **असामर्थ्ये**, ग — **सामर्थ्ये**।
७. क ख घ — **उक्तं**, ग — **ज्ञापितम्**।

निदिध्यासनं समानविषयतया साक्षात्कार[१]जनकत्वसाधनं कर्मादि योगेभ्यश्चान्तरङ्ग-मित्यभिप्रेत्य, अर्थभावनशब्देन पूर्वमादृतं यद्यपि तथाप्यदृष्टद्वारा कृपातिशयफल-कादन्तरायाभावफलकाच्[२]च। तस्मात् परमं मुख्यं भक्तियोगं सर्वोपायफलभूतमयमत एव तदुभयफलकं प्रेमाख्यमभ्यासमाह—

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥ ३२ ॥

तत्प्रतिषेधेति। तेषां विक्षेपाणां प्रतिषेधार्थमनायासेन नाशार्थं[३] एकस्मिँस्[४]तत्त्वे मुख्यभगवति, अभ्यासः [५]गोपीनामिव तद्गुणगणश्रवणादिना द्रवीभूतस्य चेतसो मूषानिक्षिप्तद्रुतताम्रस्येव दृढतदाकारतारूपप्रेम

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।

इत्यादिना भगवत्सूचितः कार्य इत्यर्थः। यद्बलादनायासेन सम्पन्नायां जीवन्मुक्तौ विक्षेपाः प्रशममुपयान्ति।

न वासुदेवभक्तानामशुभं विद्यते क्वचित्।

इत्यादिस्मृतेः। अथवा एकं सजातीयविजातीयस्वगतभेद[६]रहितं तत्त्व-मनारोपितमखण्डार्थ इति यावत्। तस्य अभ्यासः तदेकमजरममृतमभयमिति वृत्तिप्रवाहः कार्य इत्यर्थः।

अत्रात्मव्यतिरेकेण द्वितीयं यो न पश्यति।
आत्मरामः स योगीन्द्रो ब्रह्मीभूतो भवेदिह॥
आत्मक्रीडस्य सततं सदात्ममिथुनस्य च।
आत्मन्येव सुतृप्तस्य योगसिद्धिरदूरतः॥

---

१. क ख घ — जनकत्व०, ग — जनकत्वात्।

२. ग — एतादृशनिश्चयविशेषस्यैव च सर्वपापप्रायश्चितरूपता सूचिता। महाभारते आश्वमेधिके व्यासेन युधिष्ठिरं प्रति—**युधिष्ठिर! तव प्रज्ञानसम्यगिति मे मतिः। न हि कश्चित् स्वयं मर्त्यः स्ववशः कुरुते क्रिया॥ ईश्वरेण नियुक्तोऽयं साध्वसाधु च मानवः। करोति पुरुषः कर्म तत्र का परिदेवना॥ आत्मानं मन्यसे चाथ पापकर्माणमन्ततः शृणु। तत्र यथा पापमयं कृष्येत भारत। तपोभिः क्रतुभिश्चैव दानेन च युधिष्ठिरः। तरन्ति नित्यं पुरुषाः येऽस्य पापानि भारत॥** [च पश्चात्] उपलभ्यते, क ख घ — **एतादृश....भारत** नोपलभ्यते।

३. ग — **भाविप्रतिबन्धार्थं** च [**नाशार्थं** पश्चात्] उपलभ्यते, क ख घ — **भावि....च** नोपलभ्यते।

४. क ख — **तत्त्वे मुख्यभगवति**, ग — **मुख्ये तत्त्वे भगवति**, घ — **तत्त्वे मुख्ये भगवति**।

५. क ख घ — **गोपीनामिव....दृढतदाकारता०** उपलभ्यते, ग — **गोपी....कारता०** नोपलभ्यते।

६. क ख घ — **रहितं**, ग — **शून्यम्**।

अभियोगात् सदाभ्यासात् तत्रैव च विनिश्चयात्।
पुनः पुनरनिर्वेदात् सिद्ध्येद् योगो न चान्यथा॥

इति स्कन्दोक्तेः। तस्मात् [१]सगुणात्मवदाकाराकारधारावाहिवृत्तिप्रवाहः सविकल्पो निर्गुणगोचरो धारावाहिको निर्विकल्पको वा कार्योऽनायासेन मोक्षमिच्छतेति यावत्॥ ३२॥

तस्य[२] चित्तस्यासूयादिमलवतो योगासम्भवात् तन्निरासोपायं चर्यायोगमाह—

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्॥ ३३॥

मैत्रीति। अत्र सुखादिशब्दास्तद्वत्पराः। तथा च सुखितेषु[३] मैत्रीं सौहार्दम् ईर्ष्याकालुष्यनिवर्त्तकं, दुःखिषु[४] करुणां [५]दयामसूयाकालुष्यनिवर्त्तिकां, पुण्यवृत्तिषु[६] हर्षं द्वेषनिवर्त्तकम्, अपुण्यशब्दितपापिषु[७] उपेक्षाम् अमर्षकालुष्यनिवर्त्तिकां भावयेत्। तदेवं चर्यायोगेन चित्तमलनिरासकेन मुख्यादिषु[८] यथाक्रममुक्तभावनारूपेण सात्त्विको[९] धर्मो

---

१. क ख घ — सगुणात्म०....मोक्षमिच्छतेति यावत्, ग — मोक्षमिच्छता सगुणभगवद्गोचरं प्रेम निर्गुणनिर्विकल्पकं वा सम्पाद्यमिति भावः। केचित्तु अभ्यासवैराग्याभ्यामन्तरायनिवृत्तौ कर्तव्यायां अभ्यासदार्ढ्यार्थमाह—तत्प्रतिषेधेति। तेषामन्तरायाणां प्रतिषेधार्थमेकस्मिन् कस्मिंश्चिदभिमते तत्त्वेऽभ्यासः चेतसः पुनर्निवेशनं कार्यमित्यर्थमाहुः। तच्चिन्त्यं यथाऽभिमतध्यानाद्वेत्यनेनैव तदर्थलाभात् पौनरुक्त्यप्रसंगाभावादिति दिक्।

२. क ख घ — तस्य चित्तस्यासूयादिमलवतो योगासम्भवात्, ग — सोऽयमसूयादिमलवतश्चित्तस्य न सम्भवति।

३. क ख घ — सुखितेषु मैत्रीं सौहार्दम् ईर्ष्याकालुष्यनिवर्त्तकं, ग — सर्वप्राणिषु सुखसंभोगापन्नेषु मम मित्राणां सुखित्वमिति मैत्रीं सौहार्दं परोत्कर्षासहनरूपेर्ष्याकालुष्यनिवर्त्तकं भावयेत्।

४. क ख घ — दुःखिषु, ग — दुःखितेषु।

५. क ख घ — दयामसूयाकालुष्यनिवर्त्तिकां, ग — कथं तु नामैषां दुःखनिवृत्तिः स्यादिति दयां परापकारचिकीर्षारूपाऽसूयाकालुष्यनिवर्त्तिकां भावयेत् नोपेक्षां च वा हर्षम्।

६. क ख घ — पुण्यवृत्तिषु हर्षं द्वेषनिवर्त्तकं, ग — पुण्यवृत्तिषु मुदितां पुण्यानुमोदेन हर्षम् इष्टलाभजनितोत्साहरूपम्।

७. क ख घ — अपुण्यशब्दितपापिषु उपेक्षाम् अमर्षकालुष्यनिवर्त्तिकां भावयेत्, ग — अपुण्यशब्दितपापेषु उपेक्षाम् औदासीन्यम् अनुकूलप्रतिकूलचिन्ताराहित्यरूपं परलाभासहनरूपामर्षकालुष्यनिवर्त्तकं भावयेत् नानुमोदनं न वा द्वेषम्।

८. क ख — मुख्यादिषु, ग — सुखादिषु, घ — सुख्यादिषु।

९. क ख घ — सात्त्विकः, ग — शुक्लः।

जायते[१]। तेन च शुक्लेन[२] धर्मेण चित्तं प्रसन्नं भवति। प्रसादे च स्थितिपदं लभते। एतच्च पुष्कलं विरक्तस्यैव सम्भवतीति मुख्यचर्यायोगो वैराग्यमेवेति संक्षेपः ॥ ३३ ॥

एवं[३] मैत्र्यादिभावनया प्रसन्नस्य चित्तस्य स्थित्युपायं हठयोगमाह—

प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ॥ ३४ ॥

प्रच्छर्दनेति। कौष्ठ्यस्य[४] वायोः प्रच्छर्दनम्, एकतरनासापुटेन मात्राप्रमाणेन शनैः शनैर्बहिर्निःसारणम्। विधारणं रेचितस्य वायोर्बहिरेव स्थापनं कुम्भकं, न तु सहसा प्रवेशनम्। तथा चात्र पूरकवर्जनाद्रेचितपूरितशान्तप्रत्याहारोत्तराधरसमभेदेन सप्तकुम्भकेषु मध्ये रेचितकुम्भकोऽयं प्रथमाभ्यासेऽनेकनियमानपेक्षतया प्रशस्तः[५]। सर्वमेतदग्रे प्राणायामप्रकरणे स्फुटीभविष्यति। तदेताभ्यां प्राणजये चित्तजयस्तयोर[६]विनाभावात् प्राणायामस्य सर्वपापनाशकत्वात् पापनिवृत्त्या च चित्तमेकत्र लक्ष्ये स्थिरं भवति। वा शब्दः सूत्रे वक्ष्यमाणोपायविकल्पार्थः। प्राणायामस्य हठयोगत्वमुक्तं स्मृतौ—

हकारेण तु सूर्योऽसौ ठकारेणेन्दुरुच्यते।
सूर्याचन्द्रमसोरैक्यं हठ इत्यभिधीयते ॥
सूर्यचन्द्राख्ययोः प्राणायामयोरैक्यलक्षणः।
हठयोगो योगबीजं प्राणायामः प्रकीर्त्तितः ॥

इति ॥ ३४ ॥

लक्ष्ययोगस्वरूपमुपायान्तरमाह—

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धिनी ॥ ३५ ॥

---

१. क ख घ — **जायते**, ग — **उपजायते**।

२. क ख घ — **शुक्लेन धर्मेण**, ग — **विगतरागद्वेषमलम्**।

३. क ख घ — **एवं मैत्र्यादिभावनया....हठयोगमाह**, ग — **द्वे बीजे चित्तवृक्षस्य प्राणस्य न वासने। एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि नश्यत** इत्यादिनाऽवशिष्टेन वासनाक्षयः प्राणसंशयश्च चित्तनिग्रहस्योपायावुक्तौ। तत्र वासनाक्षयोपायः शुभवासनोत्पादनरूपो वासनायोगोऽनेन सूत्रेण कथितः। इदानीं हठयोगाख्यं प्राणसंशयमाह।

४. ग घ — **प्राणस्य** [**कौष्ठ्यस्य** पूर्वं] उपलभ्यते, क ख — **प्राणस्य** नोपलभ्यते।

५. क ख घ — **प्रशस्तः**, ग — **प्रशस्ततम इति ज्ञापितम्**।

६. ग — प्रभोर्मनसो जये बहिरिन्द्रियाणामिव प्रभोः प्राणस्य जय एव मनसो निरोधसम्भवाच्च। तदुक्तं योगग्रन्थेषु **इन्द्रियाणां मनोनाथो मनोनाथश्च मारुतः। तस्मिन् क्षीणे च तत् क्षीणं तच्चिकित्स्यं प्रयत्नत** इत्यादिः [**अविनाभावात्** पश्चात्] उपलभ्यते, क ख घ — **प्रभोः....प्रयत्नत इत्यादिः** नोपलभ्यते।

विषयवतीति। नासाग्रादौ चित्तस्य संयमरूपाल्लक्ष्ययोगाद्दिव्यगन्धादिसाक्षात्कारो भवति। सेयं विषयवती प्रवृत्तिर्विश्वासमुत्पाद्य परमेश्वरादावतिसूक्ष्मे मनसः स्थितिं[१] सम्पादयतीत्यर्थः। तथा च शास्त्रीयानुभवविषये जाते श्रद्धया योगिनो ध्यानादौ स्थिरा[२] भवतीत्ययं लक्ष्ययोगः।

या हि नासादिदेशेषु दृष्टिः पुंसां स्थिरा भवेत्।
स लक्ष्ययोग आख्यातो योगे श्रद्धाकरः परः॥

इति स्मृतेरिति॥ ३५॥

ब्रह्मयोगं शिवयोगञ्चाह—

विशोका वा ज्योतिष्मती॥ ३६॥

विशोकेति। अष्टदलादौ नादाख्ये ब्रह्मणि मनसः संयोगाद्[३] विशोका बहुतर-साधनाद्यायासकृतदुःखशून्या[४] ज्योतिष्मती ज्योति[५]र्विषया नादगतचिदानन्दविषया संविन्मनसः स्थितिहेतुरित्यर्थः। तथा ह्ययम[६]त्र क्रमः। हृदयाधोऽधोमुखमष्टदलं कमलं रेचकेणोर्ध्वमुखं विभाव्य तत्र सूर्यमण्डलं द्वादशकलात्मकं जागरितस्थानम् अकारं, तदुपरिचन्द्रमण्डलं षोडशकलात्मकं स्वप्नस्थानम् उकारं, तदुपरि वह्निमण्डलं दशकलात्मकं सुषुप्तिस्थानम् मकारं, तदुपरि नादाख्यं तुरीयं ब्रह्म विभावयेदिति ब्रह्मयोगः। तदुक्तं[७] गीतासारे—

अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः।
ध्वनेरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः॥
तन्मनो विमलं याति तद्विष्णोः परमं पदम्।

हंसोपनिषदि चोक्तः—

हंसानुसंधानफलभूतोऽनेकविधः सफलः। अस्यैव जपकोट्या

---

१. क ख घ — **स्थितिं सम्पादयति**, ग — **स्थितिहेतुः**।
२. क ख ग — **स्थिरा**, घ — **स्थिरः**।
३. क ख घ — **संयोगात्**, ग — **संयमात्**।
४. क ख घ — बहुतरसाधनाद्यायासकृतदुःखशून्या, ग — विगतः शोकस्तमप्रधानरजः परिणामरूपं दुःखं संसारहेतुर्मोहविशेष इष्टलाभानर्हता ज्ञानादिरूपो वा यस्याः सा सर्वदुःखमोहनिवर्त्तिका।
५. क ख घ — विषया, ग — प्रकाशो नादगतश्चिदानन्दो विषयो विद्यते यस्याः सा।
६. क ख घ — अत्र क्रमः, ग — क्रमोऽत्र।
७. क ख घ — तदुक्तं गीतासारे....परमं पदम्, ग — उक्तो हंसोपनिषत्प्रभृतिषु।

नादम[1]नुभावयति यस्तस्य दशविध उपजायते। चिणीति प्रथमः, चिणिचिणीति द्वितीयः, घण्टानादस्तृतीयः, शङ्खनादश्चतुर्थः, पञ्चमस्तन्त्रीनादः, षष्ठस्तलनादः, सप्तमो वेणुनादः, अष्टमो भेरीनादो, नवमो मृदङ्गनादो, दशमो मेघनादः। नवमं परित्यज्य दशममेवाऽभ्यसेत्। तस्मान्मनोविलीने मनसि गते संकल्पविकल्पे दग्धपुण्यपापे सदाशिवो मशक्त्यात्मना सर्वत्राऽवस्थितः शान्तः प्रकाशयति।

इत्यादिना। अतः संगृहीतः कालिदासेनापि[2]—

आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिगतं[3] तव रूपमीशे।
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्या॥

इति। अथवा भ्रूमध्यादौ ज्योतीरूपे प्रत्यगात्मनि बहिर्दृष्टिबन्धेन मनसः संयमाद् विशोका। हठयोगादाविवायासकृत[4]क्लेशरहिता ज्योतिष्मती साक्षिविषया संविन्मनसः स्थैर्यहेतुरिति शिवयोगः। अयमेव शाम्भवी मुद्रेत्युच्यते। तदुक्तम्—

अन्तर्लक्ष्या बहिर्दृष्टिर्निमेषोन्मेषवर्जिता।
एषा हि[5] शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता॥

इति। सा च, योगासनचाञ्चरीभूचरीखेचर्यऽगौचरीनिर्वाणमुद्राभिः सिद्ध्यति। प्रकारस्तु गुरुमुखादवगन्तव्यः। यद्यप्यनेनाऽऽत्मसाक्षात्कारेण कृतार्थत्वान्नास्य स्थितिविशेषतयोपन्यासो युक्तस्तथापि कृताऽऽत्मसाक्षात्कारेणाऽपि परवैराग्यार्थमभ्यासापेक्षणात् तथोक्तम्। स्वविषयस्थैर्यहेतुत्वाच्चाऽन्यविषयकस्थैर्यहेतोः पूर्वयोगाद्भेद इति संक्षेपः॥ ३६॥

अवान्तरवासनायोगमाह—

वीतरागविषयं वा चित्तम्॥ ३७॥

वीतेति। वीतरागं निर्वासनं यत् सनकादीनां चित्तं तद्विषयं तद्विभावनपरं

---

१. क ख घ — **अनुभावयति**, ग — **अनुभवति**।
२. क ख घ — **कालिदासेनापि**, ग — **तान्त्रिकैः**।
३. क ख — **परिगतं**, ग घ — **परिणतम्**।
४. क ख घ — **क्लेशरहिता ज्योतिष्मती**, ग — **क्लेशरहितत्वात् स्वयमनुभवरूपतया द्वैतदृष्टिकृतक्लेशनाशकत्वाच्च विशोकाख्या ज्योतिष्मती**।
५. क ख घ — **हि**, ग — **तु**।

कुर्यात्। निर्वासनवासितमन्तःकरणं कुर्यादिति यावत्। अनेनात्र योगिनो मुमुक्षालाभेन वासनायोगो दर्शितः। उक्तञ्च स्मृतौ—

सत्त्वावलम्बनं यत्तद् बीजं चित्त[१]विशोधने।
भवेत् स वासनायोगो योगान्तरविवर्द्धकः॥

इति[२]। [३]अन्यापि चित्तं स्वभावतः सत्त्वप्रधानमपि तमसा पिहितमस्ति। तत् सात्त्विकभावनया तमोविगमे लब्धवृत्तिकं भवति। तेजःप्रतिबन्धजलशैत्यवदिति विनैव साधनान्तरं योगिनो मोक्षसुखनिष्ठासम्भवात्। अयं शुभो वासनायोगो विरुद्धवासना-निवर्त्तक इति॥ ३७॥

वासनायोगस्यावान्तरं भेदमाह—

स्वप्ननिद्राज्ञानालम्बनं वा॥ ३८॥

स्वप्नेति। अत्र ज्ञानशब्दो[४] ज्ञेयपरः। स्वप्ने[५] भगवतो यद्रूपं प्रियमाराधयन्नेव प्रबुद्ध, एवं निद्रादौ यत्सुखमनुभूयते तद[६]वलम्बनं तद्विभावनपरं चित्तं कुर्यात्। पूर्ववासनाप्राप्तसत्त्व[७]प्रधानमेवान्तःकरणं कुर्यादिति यावत्[८]॥ ३८॥

ध्यानयोगमाह—

यथाऽभिमतध्यानाद्वा॥ ३९॥

---

१. क ख घ — **विशोधने**, ग — **निरोधने**।
२. क ख घ — **इति**, ग — **इत्यादिना**।
३. क ख घ — **अन्यापि....निवर्त्तक इति** उपलभ्यते, ग — **अन्यापि....इति** नोपलभ्यते।
४. ग — **ज्ञायत इति व्युत्पत्त्या** [ज्ञानशब्दः पश्चात्] उपलभ्यते, क ख घ — **ज्ञायत इति व्युत्पत्त्या** नोपलभ्यते।
५. ग — **तथा च स्वप्ननिद्रयोरवस्थाविशेषयोर्यद्ज्ञेयसत्त्वं तदालम्बनं चित्तमित्यर्थः। तत्र** [**स्वप्ने** प्राक्] उपलभ्यते, क ख घ — **तथा....तत्र** नोपलभ्यते।
६. क ख — **अवलम्बनं**, घ — **आलम्बनं**, ग — **आलम्बनं तद्विषयम्**।
७. क ख घ — **प्रधानं**, ग — **प्रधानगतम्**।
८. ग — एते सर्वे लक्ष्ययोगस्यैवावान्तरभेदाः मन्तव्याः। मनसः स्थैर्यार्थमेकतरमात्रविषया-ऽऽदरादिति दिक्। अथवा स्वरूपज्ञानं स्वप्रज्ञानं पूर्वोक्तनिद्रारूपं च ज्ञानं एतयोरन्यतरस्य चिन्तनं वा चित्तं स्थितिनिबन्धनं भवतीत्यर्थः। अयं च ज्ञाने स्वप्रदृष्ट्या संसारिषु सुषुप्तिदृष्ट्या वा चित्तस्य स्थितिर्भवतीति यावत्। तथा चोक्तम्—**दीर्घस्वप्नमिमं विद्धि दीर्घं वा चित्तविभ्रमम्। दीर्घं वाऽपि मनोराज्यं संसारं रघुनन्दन॥ ब्रह्माद्यं स्थावरान्तं च प्रसुप्तं यस्य मायया। तस्य विष्णोः प्रसादेन यदि कश्चित् प्रमुच्यते॥ चराचरं लय इव प्रसुप्तमिह पश्यताम्। किं मृषा व्यवहारेषु न विरक्तं भवेन्मन** इत्यादि [**यावत्** पश्चात्] उपलभ्यते, क ख घ — **एते....मन इत्यादि** नोपलभ्यते।

यथेति। किम्बहुना, हरि[१]रामादिरूपं परमेश्वरं बाह्यं चन्द्रसूर्यादिज्योतिर्वा यदेवेष्टं तदेव ध्यायेत्। तस्मादपि ध्यानाल्लब्धस्थितिकस्य चित्तस्य साधनान्तरं विनापि केवले परमात्मनि स्थितौ योग्यता भवतीत्यर्थः। अयमेव ध्यानयोग उक्तो योगग्रन्थेषु।

विना देशादिबन्धेन वृत्तिर्याऽभिमते स्थिरा।
ध्यानयोगो भवेदेव चित्तचाञ्चल्यनाशकः॥

इत्यादिना। यद्वा यथाभिमतानां तीर्थदेवलोकवर्णतत्त्वादीनां यथाभिमतेषु स्व[२]-देहादिषु ध्यानाद् भावनाविशेषान्मनसः स्थितिर्भवतीत्यर्थः। तत्र यद्यपि ब्रह्मविदो ब्रह्म-मयत्वादिना सर्वमेव तीर्थं प्रतिलोमकूपं च तीर्थानि भवन्तीति तथापि युञ्जानेन चित्त-शुद्ध्यर्थं प्रथमतस्तीर्थादिकमवश्यं भावनीयम्। तद्यथा मूर्द्धनि सहस्रारे अयोध्या, हृदये अनाहते मथुरा, मूलाधारे माया, भ्रूमध्ये आज्ञाचक्रे काशी, स्वाधिष्ठाने काञ्ची, मणिपूरे अवन्ती, कण्ठे विशुद्धे द्वारका, नासाग्रे प्रयागः, ईडायां गङ्गा, पिङ्गलायां यमुना, सुषुम्नायां सरस्वती। अन्यासु नाडीषु नर्मदाद्याः सर्वा अपि सरितः सन्तीति। तत्र तत्राधाराधेयभावेनाभेदेन वा तत्तत्तीर्थं भाव्यं तत्तत्तीर्थयात्रार्थम्। एवं शिरसि कण्ठादधो नाभिपर्यन्तं नाभेरधश्चरणपर्यन्तं ग्रामत्रयम्। शिरः श्मश्रुहृदयकक्षादिषु सलोकेषु देशेषु चतुर्दशाख्यानि ललाटादिषु रोमशून्येषु नवोषराश्च सन्ति। पुर्यादिसविधे चोपपुर्यादीनि सन्तीति तीर्थभावना। एतत्[३] स्पष्टं वराहपुराणादौ—

ब्रह्मरन्ध्रादयोऽयोध्या सहस्रारं तु तद्विदुः।
मथुराऽनाहतं चक्रं हृदये योगिनो विदुः॥
मूलाधारं भवेन्माया सर्वा[४]धारयी ततः।
आज्ञाचक्रं स्मृता काशी जाबालश्रुतिमूर्द्धिनि॥
स्वाधिष्ठानं स्मृता काञ्ची मणिपूरमवन्तिका।
विशुद्धिद्वारका प्रोक्ता सप्तपुर्यो यथाक्रमम्॥
आकटेः पादपर्यन्तं शालग्रामं प्रकीर्त्तितः।
आकण्ठात् कटिपर्यन्तं प्रोच्यते हरिमन्दिरम्॥
आशिरः कण्ठपर्यन्तं नन्दिग्रामं प्रचक्षते।
दण्डकं गुह्यलोमानि सैन्धवं श्मश्रुलोमकम्॥

---

१. क ख घ — रामादि०, ग — हरादि०।
२. क ख घ — देहादिषु, ग — देहे।
३. क ख घ — एतत् स्पष्टं....परं स्मृतं इत्यादि उपलभ्यते, ग — एतत्....इत्यादि नोपलभ्यते।
४. क ख — आधारयी, घ — आधारमयी।

चिबुके जम्बुमार्गं च हृदये पुष्करं स्मृतम्।
उत्पलावर्त्तकं वामां भ्रुवं दक्षां च नैमिषम्॥
कुरुक्षेत्रं सनन्दर्क्षं तत्कक्षां कुरुमण्डलम्।
सव्यकक्षामर्बुदञ्च विदुः केशान् हिमालयान्॥
नवारण्यानि चैतानि शरीरे सन्ति देहिनाम्।
रेणुका कण्ठकूपे स्यान्नासिकायां तु शूकरम्॥
भ्रुवोर्मध्ये स्थिता काशी तदधो नन्दकाननम्।
वामपाणितले काशी कालेशश्च तथोत्तरे॥
वटेशः पादयोः कालञ्जरं स्यात्तु ललाटके।
नाभिदेशे महाकाल ऊषरा नवकीर्तिताः॥
सव्ये नासापुटे कोका गुदे कुब्जाम्बुकं स्मृतम्।
दक्षेऽर्बुदगिरिर्दन्तबिलं स्यान्मणिकर्णिका॥
प्रयागे नासिकाग्रे तु स एव वट उच्यते।
ईडा वामे स्थिता गङ्गा पिङ्गला यमुना नदी॥
वाणीं सुषुम्नां विद्यात्तु परा नाड्यः परा सरित्।
शालग्रामस्तु पादाग्रे शूकरं दक्षनासिका॥
पुरीतन्मथुरा प्रोक्ता गयाक्षेत्रं मुखं स्मृतम्।
लिङ्गं निष्कर्मणं लोहार्गलं दन्ता विनायकः॥
जिह्वाग्रे वा हनूसन्धिः प्रभासस्तु प्रकीर्त्तितः।
ब्रह्मखं बदरीक्षेत्रं गुह्यान्येवं चतुर्दश॥
सप्त पुर्यस्त्रयो ग्रामा नवारण्योषरास्तथा।
चतुर्दशैव गुह्यानि मुक्तिद्वाराणि भूतले॥
क्षमातीर्थं तपस्तीर्थं तीर्थमिन्द्रियनिग्रहः।
सर्वभूतदया तीर्थं ध्यानतीर्थमनुत्तमम्॥
एतानि पञ्च तीर्थानि सत्यषष्ठानि देहिनाम्।
वसन्ति सर्वदेहेषु तेषु स्नानं परं स्मृतम्॥

इत्यादि। अथ देवभावना। तत्र स्वप्रकाशचैतन्यानन्दरूपः पुरुषः शिवः। सत्त्वादिगुणका प्रकृतिः शक्तिः। तदुभयोपादानकत्वात् तन्मयं सर्ववस्तु। एवञ्च चित्ते वासुदेवः, बुद्धौ चतुर्मुखः, अहंकारे शङ्करः, मनसि चन्द्रः, श्रोत्रे दिक्, त्वचि वायुः,

चक्षुषोः सूर्यः। तत्रापि दक्षिणेऽक्षिणि यः पुरुषरूपः स इन्द्रस्वरूप ईश्वरः। वामे यः स इन्द्राणी स्वरूपिणी ईश्वरी। मध्ये च तयोः सम्मिलनात्तत्रैव नयनतेजोरूपौ भावनीयौ तौ दम्पती। एवं रसनायां वरुणः। घ्राणे अश्विनीकुमारौ, वाचि अग्निः, पाण्योरिन्द्रः, पादयोरुपेन्द्रः, पायौ यमः, उपस्थे प्रजापतिः। तत्र तत्राधाराधेयभावेनानुग्राह्यानुग्राहकभावेनाऽभेदेन वा सा सा देवता भाव्या। एवञ्च तत्तद्व्यापारफलयोः पूर्णता भवतीति देवताभावना। अथ लोकभावना। पादमूले पातालं, पार्ष्णिप्रपदयो रसातलं, गुल्फद्वये महातलं, जंघाद्वये तलातलं, जानुद्वये सुतलं, ऊरुद्वये वितलं, [१]तलञ्च जघने, नाभौ भुवर्लोकम्, उरसि स्वर्लोकं, मूर्द्धनि सत्यलोकं, बाह्वादिषु शक्रादिदेवताश्चैवं सर्वमयं शरीरं तत्तल्लोकाँश्चेश्वरीयशरीरतया भावयेदिति निष्कर्षः।

अथ वर्णभावना। सा च मातृका[२]न्यासरीत्या। अथ षट् चक्राणि। तत्र गुदाद् द्व्यङ्गुलोपरि मेण्ढ्राद् द्व्यङ्गुलादधः कन्दस्थानम्। तदुपरि तप्तचामीकरप्रभं त्रिकोणं कामरूपम्। तत्त्रिकोणस्य वामकोणे ईडा, दक्षिणे पिङ्गला, मध्ये सुषुम्रा, सुषुम्ना मध्ये[३] चिन्त्रिणी[४] वर्णमयी तद्वर्णविन्यासात् कमलाकारचक्रनिष्पत्तिः। तथाहि—कामरूपोपरि मूलाधारनामकं चक्रम्। तच्च सुवर्णाभं लंबीजान्वितेन सावित्रीसहितब्रह्मसरस्वतीसहितगणेशाद्यधिष्ठितेन षट्पञ्चाशच्छिवशक्तिमिथुनवता चतुष्कोणेन पृथिवीस्वरूपेण कर्णिकाकारेण मध्ये भूषितं—व-श-ष-[५]सामेकं चतुर्दलम्। तन्मध्ये भास्वराकारम् अधोमुखं चित्स्वरूपिण्या सार्द्धत्रिवलाकारेण स्थितया विद्युत्प्रभया कुण्डलिन्या स्वमुखेन तन्मध्ये मुद्रयित्वा वेष्टितं स्वयम्भूनामकं शिवलिङ्गम्। एतच्च भावितं सकलयोगसिद्धीः पृथिवीजयादिकं ब्रह्मगणेशादि[६]प्रतीतिञ्च वितरति। यच्च हृदयनाभिप्रदेशादिकं कुण्डलिन्या अधिष्ठानमुक्तं तन्मूलाधारादुत्थितायास्तस्या हृदयादौ प्रकटीभावाभिप्रायेणातो न कोऽपि विरोध इत्यास्तां विस्तरः। तदुपरि लिङ्गमूले स्वाधिष्ठाननामकं चक्रम्। तच्च सन्माणिक्यसमप्रभं, वंबीजान्वितेन लक्ष्मीसहितविष्ण्वधिष्ठितेन द्विपञ्चाशन्मिथुनवता अर्द्धचन्द्राकारेण शुभ्रेण जलस्वरूपेण कर्णिकोत्तमे

---

१. क ख — तलं, ग — अतलमहीतलं, घ — महीतलम्।
२. क ख घ — न्यास०, ग — विन्यास०।
३. क ख ग — मध्ये, घ — सुषुम्नामध्ये।
४. क ख — चिन्त्रिणी, ग घ — चित्रिणी।
५. क ख ग — सामेकं, घ — सात्मकम्।
६. क ख — प्रतीतिं, ग घ — प्रीतिम्।

मध्ये भूषितं ब-भ-म-य-र-लाऽऽत्मक-षड्दलं भावुकानां विष्णुप्रीतिजलजयादिकारकम्। अथ नाभौ मणिपूरनामकं चक्रम्। तच्च विद्युत्प्रभं वंबीजान्वितेन पार्वतीसहितशङ्कराधिष्ठितेन द्विसमधिकषष्टिसंख्याकमिथुनवता त्रिकोणेन उद्यदादित्यप्रभेण तेजःस्वरूपेण कर्णिकोत्तमेन मध्ये भूषितं डादिकान्तवर्णात्मकदशदलं स्वभावुकानां [१]शंकरप्रीतितेजोजयादिकारकम्। अथ हृदये अनाहतनामकं चक्रम्। एतदेव षोडशारषोडशाधारादिनापि आगमादौ प्रसिद्धम्। तच्च धूम्रवर्णं यंबीजान्वितेन प्रकृतिसहितेनेश्वराधिष्ठितेन चतुष्पञ्चाशन्मिथुनवता षट्कोणेन बाणनामकशिवलिङ्गलक्षितेन वायुस्वरूपेण कर्णिकोत्तमेन मध्ये भूषितं कादिठान्त[२]वर्णात्मकद्वादशदलम्। एतच्च भावितं प्रकृतीश्वर[३]प्रतीतिवायुजयादिकारकं कण्ठे विशुद्धनामकं चक्रम्। तच्च श्वेतम् अंबीजान्वितेन अर्द्धनारीश्वरस्वरूपसदाशिवाद्यधिष्ठितेन द्विसप्ततिमिथुनवता वृत्ताकारेण सुधांशु[४]प्रभेण कर्णिकोत्तमेन मध्ये भूषितं [५]स्वरीयवर्णात्मकषोडशदलं भावितं भावुकानां सदाशिवप्रीतिनभोजयादिकारकम्। भ्रूमध्ये आज्ञानामकं चक्रम्। तच्च मुक्ताकारं हंबीजान्वितेनाविद्यासहितजीवाधिष्ठितेन शृङ्गाटकाकारेण चतुःषष्टिस्त्रीपुरुषवता मनोरूपेण कर्णिकोत्तमेन मध्ये भूषितं हकार[६]लकारात्मकवर्णद्वयदलं भैरवानन्दनाम्ना इतरेण शिवलिङ्गेनोपलक्षितं स्वभावुकानामात्मप्रीतिमनोजयादिकारकं पादादिजानुपर्यन्तं पूर्वोक्तलं[७]बीजात्मकविशेषणविशिष्टं पृथ्वीस्थानम्। एवमाजान्वोः पायुपर्यन्तं अपां स्थानम्। आपायोर्हृदय[८]पर्यन्तं तेजःस्थानम्। आहृन्मध्याद् भ्रूपर्यन्तं वायुस्थानम्। तदूर्ध्वम् आकाशस्थानमिति याज्ञवल्क्यगीतादावुक्तम्। सर्वत्र सर्व[९]सत्ताङ्गीकाराद्भावनातो विशेषोपपत्तेरविरुद्धं ज्ञातव्यम्।

मूर्द्धनि सहस्रदलं कमलम्। तच्च शशिप्रभस्य पुरोः[१०] परमात्मनः स्थानम्।

---

१. क ख घ — **शंकर०**, ग — **भवानीशंकर०**।
२. क ख ग — **वर्णात्मक०**, घ — **वर्णात्मकम्**।
३. क — **प्रतीति०**, ख ग घ — **प्रीति०**।
४. ग घ — **नभःस्वरूपेण** [**प्रभेण** पश्चात्] उपलभ्यते, क ख — **नभःस्वरूपेण** नोपलभ्यते।
५. क ख ग — **स्वरीयवर्णात्मक०**, घ — **स्वरवर्णात्मकम्**।
६. क ख ग — **लकार०**, घ — **क्षकार०**।
७. क ख — **बीजात्मक०**, ग — **बीजान्वितत्वादि०**, घ — **बीजात्मकम्**।
८. क ख घ — **पर्यन्तं**, ग — **अन्तम्**।
९. क ख घ — **सत्ता०**, ग — **सत्त्व०**।
१०. क ख — **पुरोः**, ग घ — **गुरोः**।

ललाटमध्येऽहंकारस्य ललाटोपरि बुद्धितत्त्वस्य तदुपरि प्रकृतेः सहस्रदले पुरुषस्य स्थानमिति प्रपञ्चितं योग[१]ग्रन्थेषु विस्तरभयान्न लिख्यते[२]।

अथानाहतसविधे कन्दमध्यात् समुत्थितं द्वादशाङ्गुलनालं चतुरङ्गुलमधोमुखमप्यूर्ध्वमुखत्वार्थं ऊर्ध्व[३]मुखं भाव्यम्। दहरनामकमष्टदलं कमलम्। तत्र प्राणायामप्रेरितः पूर्वकर्मवासनाबद्धो विज्ञानौजः स्वरूपो जीवो दिवानिशं भ्रमति। तत्र भ्रमणक्रमः। पूर्वदलस्य वामोर्ध्वमूलमारभ्य पत्राग्रपर्यन्तं त्रिंशच्छ्वासपर्यन्तमाकाशतत्त्वमाश्रित्य जीवो भ्रमति। अथ षष्टिश्वासपर्यन्तं वायुतत्त्वं। नवति श्वासान्तं तेजस्तत्त्वम्। विंशत्यधिकशतश्वासान्तं वारितत्त्वम्। पञ्चाशदधिकशतश्वासान्तं पृथिवीतत्त्वम्। एवमेकैकस्मिन् पत्रार्द्धे सार्द्धचतुःशतश्वासा भवन्ति। एवमपरार्द्धे पत्राग्रादाऽऽरभ्यामूलपर्यन्तं प्रथमं सार्द्धशतश्वासान् पृथिवीतत्त्वम्। ततो विंशत्यधिकशतश्वासान् वारितत्त्वम्। नवतिश्वासाँस्तेजस्तत्त्वम्। षष्टिश्वासान् वायुतत्त्वम्। त्रिंशच्छ्वासान् आकाशतत्त्वमाश्रित्य भ्रमति। एवं सम्पूर्णपत्रे नवशतानि श्वासानां भवन्ति। एवमेव दलाष्टकभ्रमणे शतद्वयाऽधिकसप्तसहस्रसंख्याकाः श्वासाः भवन्ति। एवंविधभ्रमणेन वारत्रयमहोरात्रे भ्रमते। तेन षट्शताधिकैकविंशतिसहस्रसंख्याकाः श्वासा भवन्ति। आह चैवं गोरक्षनाथोऽपि—

षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः।
हंस हंसेत्यमुं मन्त्रं जीवो जपति सर्वदा॥
हकारेण बहिर्याति सकारेण विशेत् पुनः।

इत्यादि। एतावद्भिः श्वासैः षष्टिघटिका भवन्ति। तथाहि—गुरुदशाक्षरोच्चारणकालेन प्रायशः साधारणजनस्यैकः श्वासो भवति। षष्टिश्वासैरेकः यत्नो भवति। षष्ट्यधिकशतत्रयसंख्याकैः श्वासैरेका घटिका भवति। षष्टिघटिकाभिरहोरात्रम्। षष्ट्यधिकशतत्रयाहोरात्रैर्वत्सरः। एवं प्रतिपुरुषं श्वासनिर्गमवैचित्र्याद् वत्सरादि पृथगिति मन्तव्यम्। अत एव प्राणायामैरायुर्वृद्धिः। अत एव कल्पायुषोऽपि शत[४]वर्षायुषः प्रोच्यन्तो अस्मत्कल्पस्य तदीयश्वासघटितसंवत्सरशतकत्वात्। ज्योतिःशास्त्रसिद्धायुर्दाय एतत्क्रमेणैव। अत एव कदाचित् साधारणवत्सरक्रमेण न मिलत्यपि।

---

१. क ख घ — ग्रन्थेषु, ग — प्रकरणादिषु।
२. क ख घ — लिख्यते, ग — तन्यते।
३. क ख घ — मुखं, ग — मुखतया।
४. क ख घ — वर्ष०, ग — कल्प०।

अथ पूर्वादिदिग्दलचरे श्वसने यादृशी मनोवृत्तिर्भवति तादृशी तत्र [१]तच्छ्वसनसञ्चारज्ञानायोच्यते। तथा च हंसोपनिषदि—

[२]एषोऽसौ परमहंसो भानुकोटिप्रतीकाशो येनेदं व्याप्तं तस्याष्टधा वृत्तिर्भवति। पूर्वदले पुण्ये मतिर्भवति। आग्नेये निद्रालस्यादयो भवन्ति। याम्ये क्रौर्य्ये मतिः। नैर्ऋत्ये पापे मनीषा। वारुण्यां क्रीडायां मतिः। वायव्ये[३] गमनादौ बुद्धिः। सौम्ये रतिप्रीतिः। ऐशान्ये[४] द्रव्यादानम्। मध्ये वैराग्यम्। केसरे जाग्रदवस्था। कर्णिकायां सुप्तम्। लिङ्गे सुषुप्तिः। पद्मत्यागे तुरीयम्।

इत्यादि। अत एव कृताभ्यासा योगिन आकाशतत्त्ववहनसमनन्तरमेव पत्रान्तरगमनावान्तरकालीने पत्रद्वयान्तरीये श्वसनसंचारे जायमाने क्षणमात्रं ब्रह्मानन्दोद्बोधे प्रादुर्भूते तत्र मनः स्थिरीकुर्वन्ति। यथा मनः पत्रद्वयान्तर एव श्वसनविशिष्टो जीवः स्थिरो भवति। ततश्चानवरतं ब्रह्मानन्दोद्बोधो भवति। अत एवैश्वर्यादिलक्षणेन्द्रादिगुणार्थिनो योगिन इन्द्रादिदल एव श्वसनविशिष्टं जीवं स्थिरीकुर्वन्ति। स्थिरीकरणोपायस्तु तत्तद्दलश्वसनसञ्चारकालीनायाः पूर्वोक्तायास्तत्तद्दिक्[५]पालनानुरूपाया इन्द्रोऽहमित्याकारिकायाश्च मनोवृत्तेरनवरतमाश्रयणम्। यावच्चेन्द्राद्यनुरूपा मनोवृत्तिराश्रीयते, तावत्तद्देवदिग्दलश्वसनविशिष्टो जीवस्तिष्ठति। एवमेव वक्ष्यमाणाऽऽकाशादिगुणविशिष्टा यावत्पर्यन्तं मनोवृत्तिस्तावत्पर्यन्तं तत्तत्त्व एव तथाभूतो जीवस्तिष्ठतीति गुरुपरम्परागतयोगिनां सङ्केतः। आकाशादितत्त्ववहनपरीक्षा त्वेवम्। यदाकाशतत्त्वमाश्रित्य जीवः श्वसनप्रेरितः प्राचीनकर्मविशेषवासनाविशेषादिबद्धो रज्जुबद्धः श्येनादिरिव भ्रमति, तदा नासाविवरनिर्गतश्वसनः अनुष्णाशीतस्पर्शो वर्तुलाकारो द्वादशाङ्गुलादपि दीर्घः। नासाग्रस्थितकरतलादिव्यापका[६]यासो रक्तश्वेतश्यामादि[७]सम्मिलितोद्भूतकर्बुरवर्णो जायते। नासाग्रस्थिते च दर्पणे श्वाससम्बन्धेनोत्पन्नाया मलिनच्छायायाः क्रमाद्दर्पणमध्ये संकोचभागच्छन्त्या वर्तुलाकारतया परिणामो वर्णश्च कर्बुरः स्फुटमभिव्यज्यते। एवं

---

१. क ख घ — **तत्**, ग — **तत्र**।
२. क ख घ — **एषः**, ग — **यः**।
३. क ग घ — **वायव्ये**, ख — **वायवे**।
४. क ख घ — **ऐशान्ये**, ग — **ऐशाने**।
५. क ख — **पालन०**, ग घ — **पाल०**।
६. क ख ग — **आयासः**, घ — **आयामः**।
७. क ख घ — **सम्मिलित०**, ग — **सम्मिलन०**।

वायुतत्त्ववहने श्वसनोऽसावनुष्णाशीतस्पर्शः षट्कोणाकारो नवाङ्गुलो नासाग्रस्थित-करतलादौ तिर्य्यग्वहन्नाधिगतो धूम्रवर्णश्च जायते। पूर्ववद्दर्पणमलिनच्छायायाः संकुचन्त्या षट्कोणाकारता धूम्रवर्णश्च प्रकटमुपलक्ष्यते। एवं तेजस्तत्त्ववहने श्वसन ऊष्णो रक्तस्त्रिकोणाकारः षडङ्गुलो नासाग्रस्थितकरतलादेरूर्ध्वभाग[१]स्पर्शो जायते। दर्पणच्छायायाश्च रक्तता त्रिकोणता चोपलभ्यते। एवं जलतत्त्ववहने श्वसनः शीतलोऽर्द्धचन्द्राकारः श्वेतवर्णः षडङ्गुलादपि न्यूनगतिः। नासाग्रस्थितकरतलादेरधोभाग[२]स्पर्श उपजायते[३]। दर्पणमलिनच्छायायाश्चार्द्धचन्द्राकारता श्वेतवर्णश्चोपलक्ष्यते। एवं पृथिवीतत्त्ववहने श्वसनोऽनुष्णाशीतस्पर्शः पीतवर्णश्चतुष्कोणो गुरुर्नासाग्रस्थितकरतलादौ मध्येऽभिव्यक्तोऽल्पगतिश्च जायते। दर्पणमलिनच्छायासु चतुष्कोणाकारतापीत-वर्णश्चोपलक्ष्यत इत्यादि गुरूपदेशतोऽवगन्तव्यम्। वहननाड्यौ तूत्सर्गत ईडापिङ्गले। तत्रेडा वामनाडी। तस्यां श्वसनप्रवाहश्चन्द्रसंज्ञः। शक्तिरूपः शीतलत्वात्। पिङ्गला दक्षिणा नाडी। तस्यां श्वसनप्रवाहो दिवाकरसंज्ञः शिवरूपः। उष्णत्वात्। अतो रात्रौ शैत्यप्रधानसमये दक्षिणनाड्या दिवसे उष्णप्रधानसमये वामनाड्या यदि श्वासं सर्वदा वाहयति योगी, तदा कालं जयति। रात्रौ शैत्यादिना दिवा च रौद्रादिना नाऽभिभूतो भवति। एवं यदि वामनाडीवहनसमये भोजनमैथुनादि क्रूरं कर्म, दक्षिणनाडीवहनसमये कर्त्तव्यं भवति, तदा वामनासाविवरमुद्रणवामपार्श्वशयनादिना दक्षिणनाड्यां वहनं श्वसनस्य सम्पादनीयम्। एवं दक्षिणनाडीवहनसमये यात्रादिशुभं कर्म वामनाडी-वहनसमये कर्त्तव्यं भवति, तदा दक्षिणनासाविवरमुद्रणदक्षिणपार्श्वशयनादिना वामनाड्यां वहनं सम्पादनीयम्। तेन योगिनः सिद्धिर्भवतीति संक्षेपः ॥ ३९ ॥

चित्तस्थितिजयस्य ज्ञापकं सिद्धियोगं समाध्यनुकूलमाह—

परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥ ४० ॥

परमेति। अस्य स्थिरचित्तस्य योगिनः परममहत्त्वान्तः परममहत्त्वं येषां विय-त्पुरुषादीनां तत्पर्यन्तो वशीकारः अप्रतिघातः[४] केनाप्यप्रतिबन्ध्यता। सैव क्षुत्पिपासादि-

---

१. क — **स्पर्शः**, ख ग घ — **स्पर्शी**।
२. क ख — **स्पर्शः**, ग घ — **स्पर्शी**।
३. क ख घ — **उपजायते**, ग — **जायते**।
४. क ख घ — **अप्रतिघातः केनाप्यप्रतिबन्ध्यता**, ग — **अप्रतिघातो जायते सर्वत्र स्वतन्त्रता भवतीति यावत्**।

पीडा[1]प्रतिबन्धद्वारा समाधिसाधिका चित्तजयस्य च ज्ञापिकेति भावः। अयमेव सिद्धि[2]योगः—

प्राणस्पन्दनिरोधाद्यैरुपायैर्दृढता परा।
सिद्धियोगो भवेदत्र योगः सिद्धिकरः परः॥

इत्यादिना॥ ४०॥

सम्प्रज्ञातस्य विषयं प्रदर्शयन्नसम्प्रज्ञाताऽपरपर्यायं लययोगमाह—

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनतासमापत्तिः॥ ४१॥

क्षीणवृत्तेरिति। अभ्यासवैराग्याभ्यामपगमवृत्त्यन्तरस्य चित्तस्य ग्रहीतृग्रहण-ग्राह्येषु, ग्रहीता पुरुषः स्थूलसूक्ष्मभेदेन[3], ग्रहणं गृह्यतेऽर्थोऽनेनेतीन्द्रियम्, एवं ग्राह्यं च ग्रहीतृग्रहणग्राह्याणि। तेषु या तत्स्थतदञ्जनता तत्स्थेन उपरागेण तदञ्जनता तन्मयता सम्यक् तदाकारता समापत्तिः सम्यगापत्तिर्लयः सम्प्रज्ञातलक्षणो योगो भवतीत्यर्थः। अत्र स्थूलसूक्ष्मवस्त्वर्थग्राह्यपदेनैवेन्द्रियलाभेऽपि तदर्थं[4]ग्रहपदस्योपादानं गोबली-वर्दन्यायेन। आनन्दस्य तु ह्लादापराख्यस्यान्तःकरणधर्मत्वेन ग्राह्यपदार्थेऽन्तर्भूत-स्येन्द्रियादेरवान्तरविभाजकधर्मस्याऽभावान्न पृथगुक्तिः। इत्थञ्च **वितर्कविचारानन्दे**ति सूत्रेणोक्तस्य सवितर्कादिभेदेन चतुर्विधस्य सम्प्रज्ञातस्य लाभः। ग्राह्यपदेन वितर्क-विचारानन्दानां ग्रहीतृपदेनाऽस्मितायाश्च लाभादिति भावः। उपरागेण तदाकारतायां दृष्टान्तमाह—**अभिजातस्येव मणे**रिति। निर्मलस्य स्फटिकादेर्यथा जपाकुसुमाद्यु-परागेण रक्ताद्याकारता तथेत्यर्थः। यद्यपि ग्राह्यसमापत्तेः प्रथमभूमित्वात् सूत्रे ग्राह्यक्रमेणैव निर्देशो युक्तस्तथापि ग्रहीतृसमाधेर्मुख्यत्वज्ञापनाय ग्रहीतृक्रमेणैव प्रथमतो निर्देशःकृत इति दिक्॥ ४१॥

तत्र ग्राह्यग्रहणगोचरा समापत्तिः स्थूलसूक्ष्मार्थविषयकत्वात् सवितर्कसविचार-

---

१. क ख घ — **प्रतिबन्ध०**, ग — **प्रबन्ध०**।
२. ग — **उक्तः योगग्रन्थेषु** [योगःपश्चात्] उपलभ्यते, क ख घ — **उक्तः योगग्रन्थेषु** नोपलभ्यते।
३. क ख घ — **स्थूलसूक्ष्मभेदेन, ग्रहणं गृह्यतेऽर्थोऽनेनेतीन्द्रियं**, ग — **ग्रहणं गृह्यतेऽर्थोऽनेनेति स्थूलसूक्ष्मभेदेन द्विविधमिन्द्रियम्**।
४. क ख घ — **ग्रह०**, ग — **ग्रहण०**।

भेदेन द्विविधा। पुनर्विकल्पस्य सङ्कीर्णत्वासङ्कीर्णत्वाभ्यां सवितर्क[१]निर्वितर्कभेदेन चतुर्धा भवति। तत्र सवितर्कायाः स्वरूपमाह—

तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः ॥ ४२ ॥

तत्रेति। तत्र तासु मध्ये सवितर्का समापत्तिरेषा ज्ञातव्या, या शब्दार्थज्ञानानां विकल्पैः परस्पराभेदभ्रमैः संकीर्णा मिश्रिता। तथा हि—गौरित्युक्ते शब्दार्थज्ञानानि परस्परं त्रीण्यभिन्नानि लोके भासन्ते। तत्र समाहितस्य योगिनः समाधिप्रज्ञायां समारूढा गवाद्यर्था यदि परस्पराभेदभ्रमरूपैर्विकल्पैरनुविद्धा एव भान्ति तदा सा विकल्पसङ्कीर्णा विकल्पविषया सवितर्कसंज्ञा भवतीत्यर्थः ॥ ४२ ॥

निर्वितर्कामाह—

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥ ४३ ॥

स्मृतीति। गवादिपदानां सङ्केतो लोके विकल्पितेष्वेव गृह्यते। तस्य स्मृत्या शाब्दज्ञानं पदार्थानुमितिश्च विकल्पित एव जायते। तत्र स्मृतिपरिशुद्धौ अर्थमात्र-तात्पर्यवता चित्तेन अर्थमात्राभ्यासात् सङ्केतस्मृतेस्त्यागे सति सविकल्पकत्वाभावात् स्वरूपशून्येव, न वस्तुतः स्वरूपशून्याऽतोऽर्थमात्रस्य अविकल्पितार्थस्य निर्भासो भानं यत्रेत्यर्थमात्रविषया सा समापत्तिर्निर्वितर्केत्यर्थः ॥ ४३ ॥

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥ ४४ ॥

एतयैवेति। एतयैव [२]सवितर्कनिर्वितर्कया च समापत्त्या सूक्ष्मविषया, सूक्ष्मं तन्मात्राहङ्कारादिर्विषयो यस्याः सा तत्र सूक्ष्मेषु विशिष्टेषु स्ववाचक[३]शब्दज्ञाना-भ्यासभेदेना[४]नुविद्धे विकल्पितेषु या समापत्तिः सा सविचारा। तेष्वेव[५] विशेषणशून्ये-ष्वर्थमात्रेषु या समापत्तिः सा निर्विचारेति भावः ॥ ४४ ॥

नन्वस्या ग्राह्यग्रहणसमापत्तेः किम्पर्यन्तं सूक्ष्मविषयत्वं तत्राह—

सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम् ॥ ४५ ॥

---

१. ग — **सविचारनिर्विचार०** [निर्वितर्क० पश्चात्] उपलभ्यते, क ख घ — **सविचार-निर्विचार०** नोपलभ्यते।

२. क ख ग — **सवितर्क०**, घ — **सवितर्कया**।

३. क घ — **शब्दज्ञानाभ्यासभेदेन**, ख ग — **शब्दज्ञानाभ्यामभेदेन**।

४. क ख — **अनुविद्धे**, ग घ — **अनुविद्धेषु**।

५. क ख घ — **तेष्वेव विशेषणशून्येष्वर्थमात्रेषु या समापत्तिः**, ग — **तदन्या सूक्ष्मार्थमात्र-निर्भासा**।

सूक्ष्मेति। अस्याः समापत्तेः सूक्ष्मविषयत्वं उक्तप्रकारम् अलिङ्गपर्यवसानम्। लयं गच्छतीति लिङ्गं महत्तत्त्वादि। न लिङ्गं अलिङ्गं प्रधानम्। तत्पर्यन्तमेव। अतः सूक्ष्मस्याभावात् पुरुषस्य सत्त्वेऽप्य[1]कारणत्वे कार्याधिकसौक्ष्म्याभावादसंग्रह इति दिक्॥ ४५॥

तदे[2]व [3]**निर्वितर्के**त्यादिसूत्रेण चतुर्धा विवृतस्य[4] सम्प्रज्ञातस्य **क्षीणवृत्ते**रित्यादिसूत्रेण ग्राह्यग्रहणभेदेन विशिष्टाऽविशिष्टभेदेन चावान्तरविभागः कृतः। इदानीं सामान्यविशेषात्मना विभक्तस्य[5] सबीजसमाधिरूपं सामान्यलक्षणनिर्बीज[6]समाध्यन्तरसाध्यकसाधनगोचरप्रयत्नावश्यकत्वज्ञापनायाह—

ता एव सबीजः समाधिः॥ ४६॥

ता एवेति। ता एव ग्रहीतृग्रहणग्राह्येषु सामान्यविशेषभावेनोक्ताः समापत्तय एव सबीजः दुःखादेरनात्मसंस्काररूपैर्बीजैः सह वर्तमानः समाधिः। समाधीयते प्रत्यङ्मात्रैकाग्रीक्रियते चित्तमनेनेति भावनाविशेषः सम्प्रज्ञात इत्यर्थः॥ ४६॥

आनन्दादिसमापत्तीनां निर्विचारफलत्वान्निर्विचारायां विशेषं कञ्चिदाह—

निर्विचारवैशारद्येऽध्यात्मप्रसादः॥ ४७॥

निर्विचारेति। पूर्वं समाधिभिरपगतपापस्यान्तःकरणस्य निर्विचार[7]वैशारद्ये निर्विचारस्य सूक्ष्मार्थगोचरनिर्विकल्पस्य समाधेर्वैशारद्ये प्रवाहरूपपाटवे सति, अध्यात्मप्रसादः आत्मानं बुद्धिमधिकृत्य वर्त्तमानः प्रसादः ह्लादाख्यानन्दसाक्षात्कारयोग्योऽत्यन्तसत्त्वोद्रेको भवतीत्यर्थः॥ ४७॥

मुख्यं फलमाह—

ऋतम्भरा तत्र प्रज्ञा॥ ४८॥

ऋतम्भरेति। तत्र तस्मिन्निर्विचारवैशारद्ये सति, ऋतम्भरा ऋतं सत्यं पुरुषयाथार्थ्यं बिभर्त्तीति ऋतम्भरा सत्यमेव गृह्णती प्रज्ञा भवतीत्यर्थः॥ ४८॥

---

१. क ख घ — **अकारणत्वे**, ग — **अकारणत्वेन**।
२. क ख — **एव**, ग घ — **एवम्**।
३. क ख घ — **निर्वितर्क०**, ग — **वितर्क०**।
४. क ख — **विवृतस्य**, ग — **विभक्तस्य**, घ — **विकृतस्य**।
५. घ — **तस्य** [**विभक्तस्य** पश्चात्] उपलभ्यते, क ख ग — **तस्य** नोपलभ्यते।
६. क ग — **समाधि०**, ख घ — **समाध्यन्तर०**।
७. क ख ग — **वैशारद्य०**, घ — **वैशारद्ये**।

अत एव तस्याः क्लृप्ताभ्यो विषयतो विशेषमाह—

श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्॥ ४९॥

श्रुतानुमानेति। सा तु समाधिजा प्रज्ञा श्रुतानुमानप्रज्ञाभ्यां श्रुतं श्रवणं शाब्द-बोधः अनुमानं मननं यौक्तिकं ज्ञानं, तद्रूपप्रज्ञाभ्याम् अन्यविषया अतिरिक्तविषया। कुतः ? विशेषार्थत्वात्। विशेषो निर्विकल्पः अज्ञातो विषयो यस्याः सा तथात्वात्। शब्दानुमानयोः पदार्थतावच्छेदकव्यापकतावच्छेदकपुरस्कारेणैव धीजनकत्वनियमेन तद्ग्रहणायोग्यविशेष्यमात्रविषयकत्वादिति यावत्।

वेदान्तिनस्तु शब्दस्य शक्त्या पदार्थतावच्छेदकपुरस्कारेणैव धीजनकत्वनियमः। न तु लक्षणयाऽपि। अतो लक्षणया केवलस्य ब्रह्मणः शब्दगम्यत्वेऽपि न क्षतिः। तथा च महावाक्यार्थ[1]प्रयोजकीभूतानुभवजनकावान्तरवाक्यस्थपदजन्यस्मृतिकारणीभूतानुभव-जनकत्वमसम्प्रज्ञातयोगस्य स्वजन्यधर्मद्वारेति न कोऽपि विरोधः। न वा महावाक्यार्थ-बोधानुपपत्तिरपीति भाव इति प्राहुः।

इदन्तु बोध्यम्। यद्यपि

तं त्वौपनिषदं पुरुषं पृच्छामि।

इत्यादिश्रुतेरुपनिषन्मात्रगम्यमेवात्मतत्त्वम्।

दशमस्त्वमसि।

इत्यादिवाक्याद् दशमा[2]दिसाक्षात्कारदर्शनात्।

तत्त्वमसि।

आदिवाक्यैरप्यपरोक्षप्रमा च सम्भवति। योग्यपदार्थनिरूपितत्वम्पदार्थाभेद-परकशब्दत्वादिना शब्दस्यापरोक्षधीजनकत्वेऽतिप्रसङ्गाभावाद्या[3]गादिवाक्यानां त्वम्प-दार्थाभेदपरत्वाभावात्।

धार्मिकस्त्वमसि।

इत्यादिवाक्यानान्तु योग्यपदार्थनिरूपितत्वम्पदार्थाभेदपरत्वाभावात्। तस्मात् तानि विषयाजन्यधीजनकत्वेन परोक्षज्ञानजनकानि।

तत्त्वमसि

---

१. क ख घ — **प्रयोजकीभूत०**, ग — **धीजनक०**।
२. क ख घ — **आदि०** उपलभ्यते, ग — **आदि०** नोपलभ्यते।
३. क ख ग — **यागादि०**, घ — **योगादि०**।

आदिवाक्यन्तु निरुक्तरूपेणापरोक्षधीजनकमेव। ततो जातायामप्यपरोक्षप्रमायां विपरीत[१]भावनारूपदोषसत्त्वे फलं न सम्भवतीति प्रतिबन्धनिरासाय निदिध्यासनादि-कम[२]प्यावश्यकमिति प्रतिबन्धनिवृत्तिफलकत्वमेव वक्तुमुचितं न ज्ञानफलकत्वम्, भावनायाः प्रमाणान्तरत्वापातात्। कामिनीं भावयतो व्यवहितकामिनीसाक्षात्कारस्येव भावनाजन्यत्वेनात्मसाक्षात्कारस्याप्रमात्वप्रसङ्गाच्च। मूलीभूतानुभवस्तु सुषुप्तेर्मोक्षाद्वा सम्भवत्येवेति न सर्वथा ज्ञाने भावनाविशेषरूपनिदिध्यासनापेक्षा, तथापि [३]दशमवाक्य-सहकृतेन मनसा चक्षुषा वा अपरोक्षप्रमाजननेन दृष्टान्तासिद्धेः। निरुक्तरूपेण शब्दस्या-परोक्ष[४]ज्ञानजनकत्वे मानाभावात्। इन्द्रियजन्यज्ञानस्यैवाऽपरोक्षत्वप्रतिपत्तेः।

मनसैवानुद्रष्टव्यम्।

इति श्रुतेश्च। श्रुत्या प्राक् [५]त्वम्पदतत्पदवाच्यत्वादिना प्रमितयोर्जीवपरमात्मनोर-विनाभावादिरूपाभेदस्य च मनसैव भावनासहकारेणापरोक्षप्रमा भवतीति भावना समाधेर्ज्ञानफलकत्वकथनमेवैतन्मतानुसारेण युक्तमेवेति दिक्।

न वा भावनाजन्यत्वेऽप्यात्मसाक्षात्कारस्याप्रामाण्यम्। अबाधितार्थविषयत्वा-दुक्तसाक्षात्कारस्य तु बाधितार्थविषयत्वादेवाप्रामाण्यं न भावनाजन्यत्वेनेति भावः ॥४९॥

नन्वनादिना विषयभोगसंस्कारेणातिबलीयसाभिहता समाधिप्रज्ञा स्थितिं न लभेतेत्यत आह—

तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ॥ ५० ॥

तज्जेति। समाधिप्रज्ञाजन्यः संस्कारो व्युत्थानसंस्कारस्य प्रतिबन्धी बाधक इत्यर्थः। कथमेतदिति चेत् प्रज्ञासंस्कारस्य तत्त्वसंस्पर्शित्वादिति ध्येयम् ॥ ५० ॥

ननु सम्प्रज्ञातसमाधिप्रज्ञासंस्कारप्रबलं चित्तं तत्प्रज्ञापरम्परामेव कुर्यात्। तथा च कथं निर्बीजसमाधिं कुर्यात्? तत्राह—

तस्यापि निरोधे सर्वनिरोधान्निर्बीजः ॥ ५१ ॥

तस्यापीति। पुरुषख्यात्यनन्तरं वैराग्यसंस्कारप्रचयेन तस्य सम्प्रज्ञातसमाधि-प्रज्ञासंस्कारस्य अपिशब्दात् प्रज्ञायाश्च निरोधे सति सर्ववृत्तिनिरोधात् सर्वासां चित्तवृत्तीनां

---

१. क ख — **भावना०**, ग घ — **भावनादि०**।
२. क ख घ — **अपि** उपलभ्यते, ग — **अपि** नोपलभ्यते।
३. क ख — **दशम०**, ग घ — **दशमे**।
४. क ख घ — **ज्ञान०**, ग — **धी०**।
५. क ख घ — **त्वम्पदतत्पद०**, ग — **तत्तत्पद०**।

स्वकारणे प्रविलयाद् निर्बीजः मिथ्याज्ञानवासनारूपसंस्कारबीजरहितोऽसम्प्रज्ञातसमाधिर्भवति। यस्मिन् सति पुरुषः स्वरूपमात्रनिष्ठः केवलो भवति॥ ५१ ॥

[१]इति श्रीनारायणतीर्थकृतायां योगसिद्धान्तचन्द्रिकायां
प्रथमः समाधिपादः॥ १ ॥

१. क ख — इति श्रीनारायणतीर्थकृतायां योगसिद्धान्तचन्द्रिकायां प्रथमः समाधिपादः, ग — इति श्रीपरमहंसपरिव्राजकाचार्यवर्यश्रीरामगोविन्दतीर्थपूज्यपादशिष्यश्रीनारायणतीर्थविरचितायां पातञ्जलसूत्रवृत्तौ गूढार्थद्योतिकायां योगसिद्धान्तचन्द्रिकायां समाधिपादः प्रथमः समाप्तः, घ — इति समाधिपादविवृतिः।

द्वितीयः साधनपादः

निरूपितः समाधिरतः परं साधनानि निरूप्यन्ते द्वितीये। तत्रादौ निरोधसाधनीभूतयोरभ्यासवैराग्ययोः साधनीभूतायां चित्तशुद्धौ हेतुं चित्तमाकर्षयतां बाह्येन्द्रियाणां निग्रहे वा साधारणहेतुं क्रियायोगमाह—

तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥ १ ॥

तप इति। तप उपवासादिना कायशोषणम्। उक्तमीश्वरगीतायाम्—

उपवास[१]पराकादिकृच्छ्रचान्द्रायणादिभिः।
शरीरशोषणं प्राहुस्तापसास्तप उत्तमम्॥

इति। स्वाध्याय उपनिषदाद्यावृत्तिः। उक्ता च तत्रैव—

वेदान्तशतरूद्रीयप्रणवादिजपं बुधाः।
सत्त्वशुद्धिकरं पुंसां स्वाध्यायं परिचक्षते॥

इति। प्रणिधानं स्तुत्यादिजनिता भक्तिः। उक्ता च तत्रैव—

स्तुतिस्मरणपूजाभिर्वाङ्मनःकायकर्मभिः।
सुनिश्चला भवेद्भक्तिरेतदीश्वरपूजनम्॥

इति। स्तुतिरत्र गुणमात्रकथनं पूजा चासनपाद्याद्यर्पणम्। एताभिर्जनिता भक्तिरीश्वरपूजनम्। तच्च सर्वक्रियाणां परमेश्वरे परमगुरावर्पणम्। तत्फलसंन्यासो वा। तत्राद्यं—

कामतोऽकामतो वाऽपि यत् करोमि शुभाशुभम्।
तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्॥

इत्यादिस्मृतिभिर्व्याख्यातम्। द्वितीयं तु कर्मफलानां भोक्ता परमेश्वर[२] इति चिन्तनम्—

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥

इत्यादिना बोधितम्। एतानि निरुक्तार्थ[३]भावनाविशिष्टभक्ति[४]योगभिन्नत्वात्

---

१. क ख ग — **पराकादि०** घ — **परकादि०**।
२. घ — **एव** [**परमेश्वरः** पश्चात्] उपलभ्यते, क ख ग — **एव** नोपलभ्यते।
३. क ख — **भावना०**, ग — **भावन०**, घ — **भाव०**।
४. क ख ग — **योग०**, घ — **योगे**।

क्रियायोगः। वागादिव्यापारमात्रत्वात्। क्रियायोग इत्येकवचननिर्देशात्, कायवाङ्मनोव्यापारः समुच्चित एव क्रियायोगो विशिष्ट[१]फल इति ज्ञापितम्[२]। यद्यपि योगाङ्गेषु नियमे शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि पञ्चो[३]क्तानि, तथापि प्रकृतत्रयाणां दृष्टादृष्टद्वाराऽऽशु कायेन्द्रियमनोजपादिविशिष्टफलश्रवणाद् दर्शनाच्च ततः पृथगुक्तिरिति मन्तव्यम्॥ १॥

क्रियायोगफलमाह—

समाधिभावनार्थः क्लेशतनूकरणार्थश्च॥ २॥

समाधीति। समाधेर्भावनमुत्पादनमर्थःफलं यस्य स तथोक्तः। महत्सु क्लेशादिषु सत्सु समाधिर्न सिद्ध्यति। तत्र क्रियायोगः क्लेशादीन् तनूकृत्य समाधिं भावयति। तनूकरणमिह सूक्ष्मीकरणम्। श्लक्ष्णं दभ्रं कृशं तन्विति कोशात्। च्विप्रत्ययेन च स्वोचितफलाधायकानामतनूनां तनूवत्करणं स्वोचितफलेष्वभिभवमात्रं, न स्वरूपतो हानिः। वर्णाश्रमाद्यभिमानादिमूलकेन क्रियायोगेनाविवेकोच्छेदासम्भवादिति ज्ञापितम्। तथा च क्रियायोगेन सञ्जातः समाधिर्विवेकज्ञानमुत्पाद्य सवासनमिथ्याज्ञानं नाशयतीति निष्कर्षः॥ २॥

अथ के क्लेशाः कियन्तो वेत्यत आह—

अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः॥ ३॥

अविद्येति। क्लेशा अविद्यादयः। ते च विभागबलात् पञ्चेत्यर्थः॥ ३॥

उत्तरेषां चतुर्णां नाशेऽपि ज्ञानमेवाऽसाधारणं कारणमिति ज्ञापनायाऽविद्याकार्यत्वेनाविद्यात्मकत्वमाह—

अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्॥ ४॥

अविद्येति। उत्तरेषामस्मितादीनाम् अविद्या वक्ष्यमाणलक्षणा क्षेत्रं प्रसवभूमिः। तेषाम[४]वान्तरभेदमाह—**प्रसुप्ते**ति। प्रसुप्तास्तनवो विच्छिन्ना उदाराश्च तेषाम्। तत्र विदेहप्रकृतिलयानां प्रसुप्ताः। तत्त्वज्ञानाभावेन शक्तिरूपेणा[५]वस्थानात्। ते हि पुनरुद्भवन्ति। क्रियायोगिनां तनवः क्रियायोग काल एव तेषामभिभवात्। विषयसङ्गिनां विच्छिन्ना

---

१. क ख घ — फलः, ग — फलदः।
२. क ख घ — ज्ञापितं, ग — ज्ञापितः।
३. क — उक्तानि, ख ग घ — उक्ताः,।
४. क ख — अवतार०, ग घ — अवान्तर०।
५. क ख ग — अवस्थानात्। ते, घ — अवस्थामात्रे।

उदाराश्च भवन्ति। यथा कस्यचिद्यत्र रागस्तत्र क्रोधो विच्छिन्नोऽपि राग उदार एव। ततोऽन्यत्र तु क्रोध उदारो[१] रागो विच्छिन्न एवेति द्रष्टव्यम्। उक्तञ्च[२]—

प्रसुप्तास्तत्त्वलीनानां तन्ववस्थास्तु योगिनाम्।
विच्छिन्नोदाररूपाश्च क्लेशा विषयसङ्गिनाम्॥

इति॥ ४॥

तत्राविद्यालक्षणमाह—

अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखाऽऽत्मख्यातिरविद्या॥ ५॥

अनित्येति। अतस्मिँतद्बुद्धिरित्यविद्यायाः सामान्यलक्षणम्। तस्या एव भेदप्रतिपादनम्—**अनित्येति।** अत्र भाष्यम्—

अनित्ये कार्ये नित्यख्यातिः। तद्यथा, ध्रुवा इयं पृथिवी, ध्रुवा सचन्द्रतारका द्यौः, अमृता दिवौकस इति। तथा अशुचौ परमबीभत्से काये शुचिख्यातिः। उक्तञ्च—'स्थानाद् बीजादुपष्टम्भान्निःस्यन्दान्निधनादपि। कायमाधेयशौचत्वात् पण्डिता ह्यशुचिं विदुरि'ति। अशुचौ शुचिख्यातिर्दृश्यते—नवेव शशाङ्कलेखा कमनीयेयं कन्या, मध्वऽमृतावयवनिर्मितेव, चन्द्रं भित्त्वा निःसृतेव ज्ञायते, नीलोत्पलपत्रायताक्षी हावभावगर्भाभ्यां लोचनाभ्यां जीवलोकमाश्वासयन्तीवेति। कस्य केन सम्बन्धः। भवति चैवमशुचौ शुचिविपर्यासप्रत्ययः। एतेनापुण्ये पुण्यप्रत्ययः। तथैवानर्थे चार्थप्रत्ययो व्याख्यातः। तथा दुःखे सुखख्यातिं वक्ष्यति—'परिणामतापेति' सूत्रे। तथाऽनात्मन्यात्मख्यातिः। बाह्योपकरणेषु चेतनाचेतनेषु भोगाधिष्ठाने शरीरे पुरुषोपकरणे वा मनसि अनात्मन्यात्मख्यातिरिति तथैव तत्रोक्तम्। व्यक्तमव्यक्तं वा सत्त्वमात्मत्वेन मन्यमानस्तस्य सम्पदम् अनुनन्दत्यात्मसम्पदं मन्यमानस्तस्य व्यापदमनुशोचत्यात्मव्यापदं मन्यमानः सर्वो ह्यप्रतिबद्ध इत्येषां चतुष्पदा भवत्यविद्या मूलमस्य क्लेशसन्तानस्य कर्माशयस्य च विपाकस्य चेति। तस्याश्चामित्रागोष्पदवद्वस्तुसतत्त्वं विज्ञेयम्। यथा नामित्रो मित्राभावो न मित्रमात्रं किन्तु तद्विरुद्धः सपत्नः। यथा वाऽगोष्पदं न गोष्पदाभावो, न गोष्पदमात्रं, किन्तु देश एव ताभ्यामन्यद्वस्त्वन्तरम्। एवमविद्यापि न प्रमाणं, न वा प्रमाणाभावः, किन्तु विद्याविपरीतं ज्ञानान्तरमविद्येति।

---

१. घ — अपि [उदारः पश्चात्] उपलभ्यते, क ख ग — अपि नोपलभ्यते।

२. क ख ग — उक्तञ्च, घ — तदुक्तम्।

भाष्यार्थस्तु अनित्ये कार्ये कालनिष्ठाभावप्रतियोगिनि विकारेऽहङ्कारादौ नित्यख्यातिः तादृशाभावाप्रतियोगित्वधीः। उदाहरति—**ध्रुवे**ति। परमबीभत्से कुत्सितेऽपवित्रे। कायस्याशुचित्वे स्मृतिं प्रमाणयति—**उक्तञ्चे**ति। स्थानं मलमूत्राद्युपहतं मातुरुदरम्। बीजं शुक्रशोणिते। उपष्टम्भो मातृभुक्तान्नादिरसः। निःस्यन्दो नवद्वारेण रोमकूपादिभिः क्षरणम्। निधनं मरणम्। रात्रावन्येऽशुद्धिहेतवः स्पष्टाः। तथा स्नानादिभिः शौचाधानादपि सदा स्वतोऽशुचित्वमनुमीयत इत्याह—**आधेयशौचत्वादि**ति। ननु शरीरमशुचि, तथापि तत्र शुचिख्यातौ किं प्रमाणमित्याकाङ्क्षायामाह—**अशुचौ शुचिख्यातिर्दृश्यत** इति। नवीनशशाङ्कवदियं कन्या कमनीया। मधुनः अमृतस्यावयवैरंशैर्निर्मितेव ज्ञायते निश्चीयते। भावो मानसो विकारः। तज्ज्ञापिका चेष्टा हावः। कस्य[1] स्त्रीकायस्य निकृष्टस्य केन चन्द्रकलादिनाऽतिनिर्मलेनाभिसम्बन्धः साधर्म्यं नास्त्येव। उपसंहरति—**भवती**ति। एतेन अशुचौ शुचिख्यातिव्याख्यानेन, अपुण्ये [2]जैनसम्मततप्तशिलारोहणादौ [3]कर्ममीमांसासम्मतवक्ष्यमाणकृष्णशुक्लेतिचतुर्थचरणसूत्रे यज्ञीयहिंसादौ [4]वामागमसम्मततीर्थपानादौ वा पुण्यप्रत्ययः। तथाऽनर्थे अर्जन-[5]रक्षणादिना दुःखबहुलतया अपुरुषार्थे धनादौ अर्थप्रत्ययः। पुरुषार्थप्रत्ययोऽप्यविद्यात्वेन व्याख्यातः। शुच्यशुचिशब्दयोर्भोगोत्कृष्टसाधनासाधनमात्रोपलक्षकत्वादित्यर्थः। भाष्योक्तमप्यविद्याद्वयमन्यासामपि संसारहेतूनामविद्यानामुपलक्षकमतो न न्यूनता। तत्रेत्युत्तर[6]ग्रन्थे तृतीयामविद्यां व्याख्यातुमादौ वक्ष्यमाणसूत्रमुखेन [7]तस्या उदाहरणं प्रदर्शयति—**तथा दुःख** इति। तथेत्यस्येत्यत्र सुखख्यातिरित्यनेनान्वयः। **वक्ष्यती**ति। अर्थादिति शेषः। **तत्रे**ति। जगद्रूपे दुःखे इत्यर्थः। चतुर्थीमविद्यां व्याचष्टे—**तथाऽनात्मनी**ति। तस्या उदाहरणं—**बाह्ये**ति। बाह्यस्य देहस्योपकरणेषु पुत्रादिष्वहंबुद्धिः। तथा विषयभोगावच्छेदकतयान्तःकरणस्योपकरणे अन्तःकरणेऽहंबुद्धिरित्यर्थः। इमामेव चतुर्थीमविद्यामादाय प्रपञ्चोऽविद्याकार्य इत्युच्यते। अहं कर्त्तेत्याद्यभिमानस्यैव धर्माधर्मोत्पत्तिद्वाराऽखिलजगद्धेतुत्वादिति। अत्र पञ्चशिखाचार्यसंवादमाह—**तथैत**-

---

१. क ख — **कस्य स्त्रीकायस्य**, ग घ — **शृंगारलीलाकस्य**।

२. क ख घ — **जैनसम्मत०** उपलभ्यते, ग — **जैनसम्मत०** नोपलभ्यते।

३. क ख घ — **कर्ममीमांसा....यज्ञीय०** उपलभ्यते, ग — **कर्म....यज्ञीय०** नोपलभ्यते।

४. क ख घ — **वामागमसम्मततीर्थपानादौ** उपलभ्यते, ग — **वाम....आदौ** नोपलभ्यते।

५. क ख ग — **रक्षणादिना**, घ — **रक्षणादौ**।

६. क ख — **ग्रन्थे**, ग घ — **ग्रन्थेन**।

७. क ख — **तस्याः**, ग घ — **तस्य**।

दिति। यथा मयोक्तं तथा अत्र चतुर्थ्यविद्याविषये पञ्चशिखेनाप्येतदुक्तमित्यर्थः। व्यक्ताव्यक्तं व्याकृताव्याकृतं स्थूलसूक्ष्मरूपं बुद्धिसत्त्वमात्मतया गृहीत्वा तस्य सत्त्वस्य सम्पतिं सत्यसंकल्पादिकं शुभवासनादृष्टादिकं चाऽऽत्मसंपदं मन्वानः, तथा तस्य विपत्तिमिच्छाविघातादिरूपं चानुशोचत्यात्मविपत्तिं मन्वानः। एवंविधो यः स सर्वोऽप्यविद्येत्येतदुक्तमित्यन्वयः।

ननु शुक्तिरजतादिभ्रमरूपाणामविद्यानां कथमत्र गणना न कृतेत्याशङ्कायामाह—**एषे**ति। पशोरिव चत्वारि पदानि पादा अशांवस्था इति चतुष्पात्। एवम्भूतैषा संसारस्य मूलं भवतीत्यर्थः। तथा च संसाराहेतुतया नान्यासामत्र [१]गणनमित्याशयः। ननु [२]विग्रहवतोऽविद्याशब्दस्य विद्याभिन्नत्वं विद्याशून्यत्वम्, अत्युत्तमविद्यात्वं, वार्थः स्यान्न तु विपरीतख्यातिरित्याशङ्क्याह—**तस्याश्चे**ति। तस्याश्चाविद्यायाः, वस्तुसतत्त्वं वस्तु-स्वरूपता प्रत्ययान्तरत्वमिति यावत्। न त्वभावोऽमित्राऽगोष्पदशब्दार्थवदित्यर्थः। दृष्टान्तं विभजते—**यथे**ति[३]। **न मित्राभाव** इति। अत्राभावशब्देन [४]संसर्गान्योन्याभावौ ग्राह्यौ। **न मित्रमात्रमि**ति। नास्ति मित्रं यस्मादिति व्युत्पत्त्या केवलमित्यर्थः। किन्तु तद्विरुद्धो मित्रविरुद्ध इत्यर्थः। तथा च निरूढलक्षणेति भावः। किन्तु देश एवेति। विपुलो देशविशेषोऽगोष्पद इति परिभाषितः[५]। प्रमाणं विद्या ज्ञानान्तरमिति। एतेनाविद्याशब्दस्य ज्ञानविशेषे रूढत्वावधारणादस्मिन् दर्शने वेदान्तिनामिव न प्रकृत्यवान्तरभेदो, न वा सांख्यानामिवाविवेकोऽविद्याशब्दार्थः, किन्तु यथार्थानुभवनाश्यं सामान्यतोऽहमित्या-द्याकारं विपरीतं विशिष्टज्ञानमेवेति समर्थितम्। अयं भावः, प्रवाहरूपेणानादि-भ्रमैरेवावरणादिकार्यसम्भवाद् अनादिभावरूपत्वेन नित्यत्वात् प्रकृतेरिदानीमेतस्याविद्या उत्पन्ना नष्टेत्यादिधीविषयत्वायोगाच्च, न मलिनसत्त्वप्रधाना प्रकृतिरविद्या, नाप्य-विवेकः। तस्य ज्ञानाभावरूपस्य कार्यं प्रति हेतुत्वायोगात्। धर्मिप्रतियोगिज्ञानाज्ञानाभ्यां व्याघातापत्त्या न जानामीति धीविषयत्वायोगाच्च। तस्माद्भेदाभेदोदासीना बुद्ध्यादौ सामान्यतोऽहंधीरेवाविद्या। अतोऽत्यन्तमेकतावगाहिन ईश्वरोऽहमहं भोगीत्येवं बुद्धि-गुणदोषावगाहिनश्चास्मिताप्रत्ययाद्भेद इति दिक्।

वेदान्तिनस्तु पापादेरपि विनिगमकाभावेनावरकत्वादिप्रसक्तिगौरवाद् भ्रमादेः

---

१. क ख घ — **गणनं**, ग — **गणम्**।
२. क ख घ — **विग्रहवतः**, ग — **विग्रहतः**।
३. क ख — **यथेति**, ग घ — **यथा वाऽमित्र इति**।
४. क ख ग — **संसर्ग०**, घ — **संसर्गाभाव०**।
५. घ — **इति भावः [परिभाषितः** पश्चात्] उपलभ्यते, क ख ग — **इति भावः** नोपलभ्यते।

कार्यत्वेन सोपादानत्वावश्यकत्वाच्च तदेवोपादानं, न जानामीत्यपरोक्षानुभवसिद्धमधिष्ठानज्ञाननाश्यमनिर्वचनीयमविद्यापदवाच्यं कल्प्यते। युक्तश्चायं पक्षः। माया चाविद्या च स्वयमेव भवति। नित्यनिवृत्तापि मूढैरात्मेव दृष्टा।

भूयश्चान्ते विश्वमायानिवृत्तिः।

इत्यादिश्रुत्या,

नाऽसद्रूपा न सद्रूपा माया नैवोभयात्मिका।
सदसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनी॥

इति स्मृत्या,

[1]चैतन्याभाससंयुक्तं शरीरद्वयकारणम्।
आत्माऽज्ञानं तदव्यक्तमव्याकृतमितीर्यते॥
न सन्नासन्न सदसद्भिन्नाऽभिन्नं न चात्मनः।
न सभागं न निर्भागं न चाप्युभयरूपकम्॥
ब्रह्मात्मैकत्वविज्ञानहेयमिथ्यात्वकारणात्।

इति वार्त्तिकोक्त्या च प्रकृत्यवान्तरभेदस्यैवाविद्यापदवाच्यत्वप्रतिपादनादिति प्राहुः।

तन्न सम्यक्। जगत्कारण[2]प्रकृतेरिव विद्याबाध्यत्वेनाविद्यात्वाङ्गीकारेऽखिलप्रपञ्चस्यैवाऽविद्यात्वप्राप्तावेकस्य [3]ज्ञानेनाविद्यानाशाद[4]न्यैरपि प्रपञ्चाननुभवप्रसङ्गात्। अबाध्यत्वे तु विद्यावैफल्यम्। अविद्यानिवर्त्तकत्वाभावात्। विनोपादाननिवृत्तिं भ्रमस्यात्यन्तिकोच्छेदासम्भवाच्च। न चैकाज्ञानपक्षेऽज्ञाननिवृत्तेर्भविष्यत्त्वान्नानाऽज्ञानपक्षे च जीवभेदेन प्रपञ्चभेदाङ्गीकारान्महापटनाशे खण्डपटवदेकाज्ञाननाशे खण्डप्रपञ्चाङ्गीकाराज्ज्ञानप्रपञ्चाननुभवप्रसङ्ग इति वाच्यम्। एकाज्ञानपक्षस्य

तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्।

इत्यादिश्रुतिबाधितत्वात्। नानाज्ञानपक्षीयसिद्धान्तस्य च कल्पनामात्रत्वात्। स्वप्नादिदृष्टान्तस्य च

तद्धेदं तर्ह्यव्याकृतमासीत्,

---

१. क ख घ — **चैतन्याभाससंयुक्तं....वार्त्तिकोक्त्या** उपलभ्यते, ग — **चैतन्य....कोक्त्या** नोपलभ्यते।
२. क ख घ — **प्रकृतेः**, ग — **प्रवृत्तेः**।
३. घ — **तत्त्व०** [ज्ञानेन प्राक्] उपलभ्यते, क ख ग — **तत्त्व०** नोपलभ्यते।
४. क ख ग — **अन्यैरपि प्रपञ्चाननुभवप्रसंगात्**, घ — **अन्येषां प्रपञ्चभानं न स्यात्**।

तन्नामरूपाभ्यामेव व्याक्रियत।

इत्यादिश्रुत्या,

वैधर्म्याच्च न स्वप्नादिवत्।

इति भगवद्बादरायणसूत्रेण च निरासान्न तद्दृष्टान्तैरपि स्वार्थसिद्धिः। तस्माद् भ्रमपरम्परैवाविद्या, सा चान्तःकरणस्यैव धर्मः। शुक्तिरजतस्वप्नमनोरथादयोऽपि मनः-परिणामा एव बाधाबाधाभ्यां सदसद्रूपाः। तथाहि—ते नात्यन्तसन्तः। प्रतिपन्नधर्मिणि निषेधधीरूपबाधदर्शनात्। नाप्यत्यन्तासन्तः। प्रतीयमानत्वात्। अत्यन्तासतो नृशृङ्गादेर-भावात्। अतः सदसदात्मकाः। न च विरोधः। प्रकारभेदेनाविरोधात्। यथा हि लौहित्यं बिम्बरूपेण सत् स्फटिकगतप्रतिबिम्बरूपेण चासदिति[१] दृष्टम्। एवं रजताद्यापण-स्थत्वादिरूपेण सत्, शुक्त्याद्य[२]ध्यस्तत्वादिरूपेण चासत्। [३]दृश्यमेव सर्वं जगत्स्वरूपेण सत्, चेतनेऽध्यस्तरूपेण चासदित्यतः सर्वजगद्भानं सदसत्ख्यातिरेव। [४]तथैतदाह भगवान् कपिलः—

सदसत्ख्यातिर्बाधाबाधाभ्याम्।

इति। तस्मान्नानिर्वचनीयख्यातिरित्यभिमानः। एवं भ्रमपरम्परैवाविद्येत्यभिमा-नोऽन्यथाख्यातिवादिनोर्न्यायवैशेषिकयोरख्यातिवादिनां [५]कर्ममीमांसकानामात्मख्या-तिवादिनां योगाचारप्रभृतीनां [६]त्रयाणां बौद्धानां च असत्ख्यातिवादिनां [७]माध्यमिकप्रभृ-तीनामपि।

एतन्न सम्यक्। [८]अज्ञानान्वयव्यतिरेकविरोधात्। दूरादिवशाद्धि रज्जुत्वादिना रज्ज्वाद्यनवगमे भुजगाद्यध्यासो, न तु रज्जुत्वादिनाऽवगमे। तथावगमे त्वध्यासनिवृत्ति-रेवेत्यन्वयव्यतिरेकयोः सर्वानुभवसिद्धत्वात्।

---

१. क ख — **चाऽसदिति**, ग घ — **सदिति**।
२. क ख ग — **अध्यस्तत्वादिरूपेण**, घ — **अध्यस्तत्वेन**।
३. क ख घ — **दृश्यं**, ग — **इत्थम्**।
४. क ख ग — **तथा**, घ — **तत्**।
५. क ख घ — **कर्म०** उपलभ्यते, ग — **कर्म०** नोपलभ्यते।
६. क घ — **त्रयाणां बौद्धानां च** उपलभ्यते, ख ग — **त्रयाणां बौद्धानां च** नोपलभ्यते।
७. क ख ग — **माध्यमिकप्रभृतीनामपि**, घ — **माध्यमिकानामिति**।
८. क ख ग — **अज्ञानान्वयव्यतिरेकविरोधात्**, घ — **अज्ञानान्वयव्यतिरेकात्मख्यातिवादिनां योगाचारप्रभृतिकविरोधात्**।

ननु ना[१]धिष्ठिताज्ञानं कारणं, किन्तु रागादिदोषेणाधिष्ठानप्रतिपत्तिप्रतिबन्धादध्यासः। रागादिश्च [२]पूर्वपूर्वाध्यासात्। तथा च पूर्वपूर्वाध्यासाद् रागादि, रागादितश्चोत्तरोत्तराध्यास इति बीजाङ्कुरवदनादित्वाच्चानवस्थान[३]दोषः, एवमदृष्टहेतुकत्वेऽपीति।

चेन्न। अनन्तरागाणामदृष्टानां च दोषत्वकल्पने गौरवात्। तद्धेतुतयैकदोषकल्पने लाघवात्। स च दोषः—

एकमेवाद्वितीयं ब्रह्म।

इति,

अथात आदेशो नेति नेति।

इत्यादिश्रुतिभिः,

अनिर्वाच्योऽज्ञानेनावृतं ज्ञानम्[४]।

इत्यादिस्मृतिभिश्चाज्ञानादिपदवाच्यः स्वरूपत एवैकः[५]। दिनद्वयादावपि तदेव ममाज्ञानमित्यपरोक्षानुभवात्। तस्मादनाद्यज्ञानमेवाविद्या सर्वभ्रमहेतुर्न [६]भ्रमपरम्परैवेति वेदान्तिनामभिप्रायादिति चेत्। अत्र वदन्ति। कार्यसामान्यं प्रति क्लृप्तकारणताकानामदृष्टानामध्यासे [७]दोषत्वमात्रकल्पने लाघवम्। धर्मिकल्पनातो धर्मकल्पनालाघवस्य सर्वसम्मतत्वात्। तस्माददृष्टादि[८]जन्या भ्रमपरम्परैवाऽविद्या। दिनद्वयप्रत्यभिज्ञा तु साजात्यावलम्बिनी नातस्तद्विरोधो न वा श्रुतिविरोधः। [९]चैतन्येऽध्यस्तरूपेण सर्वासत्त्वस्य तदर्थत्वादिति संक्षेपः॥ ५॥

अविद्याकार्यभूतामस्मितामाह—

दृग्दर्शनशक्त्योरेकात्मतेवास्मिता॥ ६॥

---

१. क ख — **अधिष्ठित०**, ग घ — **अधिष्ठान०**।
२. क ख घ — **पूर्वपूर्व०**, ग — **पूर्व०** [उभयत्र]।
३. क ख ग — **दोषः**, घ — **दोषाय**।
४. ग घ — **तेन मुह्यन्ति जन्तवः** [ज्ञानं पश्चात्] उपलभ्यते, क ख — **तेन....जन्तवः** नोपलभ्यते।
५. क ख ग — **एवैकः**, घ — **एकैव**।
६. क ग घ — **भ्रम०**, ख — **विभ्रम०**।
७. क — **दोष०**, ख ग घ — **दोषत्व०**।
८. क ख ग — **जन्या**, घ — **जन्य०**।
९. क ख घ — **चैतन्येऽध्यस्तरूपेण सर्वासत्त्वस्य तदर्थत्वादिति संक्षेपः** उपलभ्यते, ग — **चैतन्ये ....संक्षेपः** नोपलभ्यते।

दृगिति। दृक् पुरुषः, दृश्यते इति दर्शनं प्रधानम्। शक्तिशब्दो योग्यतार्थकः। भोक्तृभोग्यत्वयोग्ययोरत्यन्तविविक्तयोर्दृग्[1]दृश्यत्वयोरविद्याकृतैकता आत्यन्तिकं तादात्म्यं, साऽस्मितेत्यर्थः। इव शब्दस्त्वहमस्मीति प्रतीतिकृतत्वं तादात्म्यस्य ज्ञापयति॥ ६॥

अस्मितायाः कार्यं रागं लक्षयति—

सुखानुशयी रागः॥ ७॥

सुखेति। सुखमनुशेते विषयीकरोतीति सुखज्ञस्य सुखानुस्मृति[2]पूर्वकं सुख-तत्साधनेषु तृष्णारूपो गर्द्धो रागसंज्ञकः क्लेश इत्यर्थः॥ ७॥

रागप्रतिघातोत्थतया रागस्य पश्चाद् द्वेषं लक्षयति—

दुःखानुशयी द्वेषः॥ ८॥

दुःखेति। दुःखमनुशेत इति दुःखाभिज्ञस्य दुःखतत्साधनेषु क्रोधो द्वेषसंज्ञकः क्लेश इत्यर्थः[3]॥ ८॥

द्वेषमूलकतया द्वेषस्य पश्चादभिनिवेशं लक्षयति—

स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः॥ ९॥

स्वरसेति। स्वस्य रसेन संस्कार[4]मात्रेण वहतीति स्वरसवाही। अपिशब्द-समुच्चितमविद्वांसं तं तथेति तच्छब्दः परामृशति। रूढः प्रसिद्धः। तथा च यथा अविद्वज्जनस्य तथा विदुषोऽपि स्वरसवाहित्वाद्यः क्लेशोऽस्ति। माऽहमभावी भूवं सदा जीव्यासमिति मरणभयरूपः पूर्वजन्मीयमरणदुःखानुभवहेतुकः सोऽभिनिवेशसंज्ञकः क्लेश इत्यर्थः। अविद्यादयस्तु विदुषि न सन्तीति न तेष्वतिव्याप्तिः। क्लेशत्वकथनेन तथाशिषां हेयभाविदुःखानुत्पादविषयत्वं नात्मसुखविषयत्वमिति ज्ञापितम्। अन्यथा सुखत्वेनेवा[5]ल्पत्वेनापि प्रेयस्त्वकल्पनप्रसङ्गात्। प्रेयस्त्वकल्पनवदात्मत्वेनापि तत्कल्पनौचित्यापातात्। तथा चैतन्मतेऽपसिद्धान्तापत्तिः स्पष्टा। इयं च बलवत्तरा वासना

---

१. क ख घ — **दृश्यत्वयोः**, ग — **दृश्ययोः**।

२. घ — **सुखं मे किमर्थं नष्टमिति पश्चातापानन्तरं** [पूर्वकं पश्चात्] उपलभ्यते, क ख ग — **सुखं.... नन्तरं** नोपलभ्यते।

३. घ — **सुखनाशे दुःखप्राप्तौ च पश्चातापवान् वृत्तिविशेषो रागाख्यो द्वेषाख्यश्च क्लेशो भवतीति यावत्** [इत्यर्थः पश्चात्] उपलभ्यते, क ख ग — **सुखनाशे....यावत्** नोपलभ्यते।

४. घ — **बलवद्** [मात्रेण पश्चात्] उपलभ्यते, क ख ग — **बलवद्** नोपलभ्यते।

५. क ख घ — **अल्पत्वेन**, ग — **आत्मत्वेन**।

यावच्चित्तमनुवर्त्तते, न नश्यति ज्ञानेन। अतस्तत्त्वज्ञस्याविद्यास्मितादिसंस्कारनाशेऽप्यनुवर्त्तत इति दिक्।

एतेषामेवाविद्यादिक्लेशानां पञ्चानां यथासंख्यं तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञाः। एतेषामवान्तरभेदः सांख्ये[1] उक्तः—

भेदस्तमसोऽष्टविधो मोहस्य च तथा दशविधो महामोहः।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः॥

इत्यादिना। अयमर्थः। अष्टसु प्रकृतिमहदहङ्कारपञ्चतन्मात्रेष्वात्मबुद्धिरविद्या तमः। तस्याष्टाऽनात्मगोचरत्वादष्टविधत्वं सर्वस्याप्यैश्वर्यस्याणिमाद्यष्टैश्वर्यान्तर्गतत्वात्। तत्प्राप्तिनिमित्तः सिद्धोऽहमस्मीत्याद्यभिमानविशेषोऽस्मिता मोहः। तस्याष्टविधैश्वर्यगोचरत्वादष्टविधत्वम्। शब्दादिषु पञ्चसु दिव्यादिव्यतया दशविधेषूत्कटदृष्ट्या रागो महामोहः। स च विषयस्य दशविधत्वाद् दशविधः। परेण भुज्यमानेषु शब्दादिषु [2]परप्राप्तेष्वणिमादिषु द्वेषस्तामिस्रोऽष्टादशगोचरत्वादष्टादशविधः। प्राप्तेष्वष्टादशसु विषयेषु तपस्विभ्योऽसुरादिभ्यश्च [3]ग्रहणभयमभिनिवेशोऽन्धतामिस्रः। स चाष्टादशविषयत्वादष्टादशविध इति। सोऽयं पञ्चविधः क्लेशोऽवान्तरभेदाद् द्विषष्टिर्भवतीति संक्षेपः॥ ९॥

तदेवं क्लेशानां चित्तविक्षेपकत्वाद् [4]योगाभ्यास[5]योगकामेन प्रथमं पञ्चप्रकारा अपि क्लेशाः परिहरणीयाः। ते चाज्ञाताः परिहर्तुमशक्या इति तेषामुद्देशं कारणं लक्षणं चाभिधाय स्थूलसूक्ष्मभेदेन पुनर्द्विविधानां तेषां च विभागेन हानोपायं च वदन् प्रथमं सूक्ष्माणां हानोपायमाह—

ते प्रतिप्रसवहेयाः सूक्ष्माः॥ १०॥

त इति। ते विवेकज्ञानदग्धाः सूक्ष्माः क्लेशाः प्रतिप्रसवहेयाः प्रसवविरुद्धः प्रतिप्रसवः, चित्तस्य कृतकृत्यस्यास्मितायां स्वप्रकृतौ लयस्तेन हेयाः नाश्याः। धर्मिनाशादेव तद्धर्माणां संस्काराणामात्यन्तिकनाश इति भावः।

ननु क्लेशसंस्कारा एव संसारहेतवः। तेषां नाश एव मोक्षायापेक्ष्यते, न चित्तनाशः। अतोऽत्र चित्तनाशान्ताऽनुसरणमनुचितमिति।

---

१. क ख घ — **सांख्ये उक्तः**, ग — **कथितः सांख्ये**।
२. क ख — **पर०**, ग घ — **परेण**।
३. क ख ग — **ग्रहणभयं**, घ — **ग्रहणम्**।
४. क घ — **योगाभ्यास०** उपलभ्यते, ख ग — **योगाभ्यास०** नोपलभ्यते।
५. क ख ग — **योग०** उपलभ्यते, घ — **योग०** नोपलभ्यते।

चेन्न, योगिसंकल्पेन भ्रष्टबीजादित इव दग्धबीजशक्तिकादपि कदाचित् पुनरङ्कुरोत्पत्तिप्रसङ्गादिति संक्षेपः ॥ १० ॥

स्थूलानां हानोपायमाह—

ध्यानहेयास्तद्वृत्तयः ॥ ११ ॥

ध्यानेति। तद्वृत्तयः तेषां क्लेशानां वृत्तय स्थूलाः अभिव्यक्तावस्थाः प्रथमं क्रियायोगेनाल्पीकृताः, ध्यानहेयाश्चित्तैकाग्रतालक्षणेन ध्यानेन प्रज्ञासामग्र्या नाश्या[१] इत्यर्थः। यद्यपि प्रथममिदमेव सूत्रमुपन्यस्तुमुचितं स्थूलनाशस्य प्रथमभूमिकत्वात् तथापि चित्तलयस्य मुख्यफलत्वज्ञापनाय, **ते प्रतिप्रसवेति** सूत्रमेवादावुपन्यस्तमिति दिक्॥ ११ ॥

ननु जात्यायुर्भोगहेतवः पुरुषं क्लिश्नन्तः क्लेशाः कर्माशयश्च तथा, न त्वविद्यादयस्तत्कथमेतेषां क्लेशत्वमित्याशङ्क्य कर्मतत्फलमूलत्वेन बन्धकत्वात्तेषां क्लेशत्वमाह—

क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥ १२ ॥

क्लेशेति। क्लेशा अविद्यास्मितारागद्वेषाभिनिवेशा मूलं यस्योत्पादे कार्यकारणभावे च स तथोक्तः कर्माशयः। आशेरते सांसारिकाः पुरुषा अस्मिन्नित्याशयो धर्माधर्मरूपः संस्कारः। स द्विविधः। दृष्टादृष्टजन्मवेदनीयः। दृष्टादृष्टजन्मनी वर्तमानभविष्यती ताभ्यां वेदनीयो भोग्यः, तीव्रसंवेगेन परदेवताराधनादिद्वारा, महदवमानादिना चेह जन्मन्येवानुभवनीयो दृष्टजन्मवेदनीयः। मृदुमध्यवेगेन कृतकर्मणा जन्मान्तरेऽनुभवनीयोऽदृष्टजन्मवेदनीय इति यावत्। तत्र प्रथमः[२] क्रमेण नन्दीश्वरनहुषयोः नन्दीश्वरस्याष्टवार्षिकस्य शिवभजनेन देवत्वादिप्राप्तेः। नहुषस्य महानुभावमहर्षीणामवमानेन सर्पत्वादिप्राप्तेः। एवं द्वितीयोऽन्येषां मन्दानाम्। मनुष्यदेहेन संवत्सरसहस्रादिनिर्वर्त्यभोगस्यासम्भवात्। क्लेशमूल इत्यनेन क्षीणक्लेशानां ज्ञानिनां नास्त्यदृष्टजन्मभोग्यः। ज्ञानेन क्लेशानां कर्मबीज[३]मूलानां नाशात्। नारकिणां तु नास्ति दृष्टजन्मवेदनीय इति ज्ञापितम्॥ १२ ॥

ननु ज्ञानिनां क्लेशादेर्विनाशान्मास्तु धर्माधर्मोत्पत्तिः। [४]प्राकृतानां तु जन्म-

---

१. क ख घ — **नाश्याः**, ग — **नाशाः**।
२. क ख घ — **प्रथमः**, ग — **प्रथमौ**।
३. क ख — **मूलानां**, ग घ — **भूतानां**।
४. क ख — **प्राकृतानां तु जन्मसम्पादिता**, ग घ — **प्राक्तनानन्तजन्मसम्पादिता**।

सम्पादिता, नियतविपाकैस्तु भाविजन्मना भोगः स्यादेव। तेषां दृष्टभोगेन क्षपयितुमशक्यत्वात्। अतः कथं कर्मिभ्यो विशेषस्तत्राह—

सति मूले तद्विपाको जात्यायुर्भोगाः ॥ १३ ॥

सतीति। अविद्यादि[1]रूपे मूले सत्येव तद्विपाकः, तस्य कर्माशयस्य संचितस्य क्रियमाणस्य वा विपाकः, विपच्यते साध्यते कर्मभिरिति विपाकः फलं भवति। स च विपाकस्त्रिविधः। जातिर्जन्म देवत्वादिर्वा। आयुः चिरकालं देहप्राणयोर्योगः। भोगः विषयेन्द्रिय[2]संयोग[3]जन्यः सुखदुःखानुभव इति। अयं भावः—कर्माशयोपभोगार्थं जात्यायुषी भोगश्च सुखदुःखयोरनुभवः। स च रागद्वेषानुविद्धः। सन्तोषद्वेषवतोरेव तद्दर्शनात्। न च विदुषो[4] रागद्वेषौ स्तः। तद्धेतुभूताया अविद्यायास्तत्त्वज्ञानेन नाशात्। तस्मात् क्लेशानामपि फलोपजनने कर्माशयसहकारित्वात्। क्लेशादिसलिलावसिक्तायामेवात्म[5]भूतौ विपाकाङ्कुरो, न क्षीणक्लेशोषरात्मभूमौ। न हि कारणमात्रात् फलं, किन्तु सामग्रीतः।

ननु क्लेशानां कर्मसहकारित्वे प्रमाणं नास्ति,

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन।

इत्यादिवाक्येभ्यः,

तदधिगम उत्तरपूर्वार्धयोरश्लेषविनाशौ।

इत्यादिसूत्रेभ्यः,

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।

इत्यादिश्रुतिभ्यश्च ज्ञानस्य क्लेशक्षयहेतुत्ववत्, कर्मक्षयहेतुत्वावगमात्। अतः क्लेशाभावकाले कर्माभावस्यावश्यकत्वात्, तत एव विपाकाभावः स्यादिति कथमुक्ताऽव्यवस्थेति चेत्,

अत्रोच्यते। विविधयोनिहेतुषु कर्मसु यत्र रागादिरन्तकाल उद्बोधो भवति, मरणानन्तरं तामेव योनिं जीवः प्राप्नोति नेतरामित्यन्वयव्यतिरेकाभ्यां कर्मवद्रागादिदोषोऽपि विपाकहेतुः।

---

१. क ख — **रूपे**, ग घ — **रूप०**।
२. क ख ग — **संयोग०** उपलभ्यते, घ — **संयोग०** नोपलभ्यते।
३. क ख घ — **जन्यः सुखदुःखानुभवः**, ग — **जन्यसुखानुभवः**।
४. क ख ग — **विदुषः**, घ — **विदुषि**।
५. क ख ग — **भूतौ**, घ — **भूमौ**।

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु॥

इत्यादिस्मृतेः,

तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य।

इति श्रुतेश्च। नरकादिष्वपि रागाद्यनुसारेणैव विपाको भवति। निषिद्धस्त्र्यादिसमासक्तानामेव तप्तलोहमयनारीसमालिङ्गनादिफलश्रवणात्। अतः क्लेशोऽपि विपाकारम्भे स्वातन्त्र्येण हेतुः। ज्ञानोत्तरं चारुविपाकः समाप्यत एव, न त्वारभ्यते इति न तत्र क्लेशापेक्षा। तस्माज्ज्ञानस्य क्लेशाख्यसहकार्युच्छेद एवाग्रहो, न कर्मनाशे। प्रारब्धकर्मणोऽपि नाशप्रसङ्गात्।

न च प्रारब्धातिरिक्तकर्मत्वेन ज्ञाननाश्यतेति वाच्यम्।

ज्ञानाग्निः सर्वकर्माणि।

इत्यत्र सर्वपदसङ्कोचप्रसङ्गात्। अतो ज्ञानेन विपाकारम्भहेतुतया [१]क्लेशाख्यहेतूच्छेदद्वारा कर्माशयस्य दाह एव क्रियते। स च क्रियमाणस्यानुत्पादः प्राचीनस्य बीजशक्तिनाशश्च। अत एव,

ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः।

इति गीतादौ ज्ञानेन कर्मणो दाहः[२] श्रूयते न नाशः। किन्तु वासनाया इव चित्तनाशादेव नाशः। धर्मिनाशस्य धर्मनाश[३]हेतुतायाः क्लृप्तत्वात्। अत[४] एव तत्त्वविदः सञ्चितक्रियमाणयोर्धर्माधर्मयोः,

तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्।

इति श्रुत्या प्रतिपादितमन्येन ग्रहणं सङ्गच्छते। नाशे ग्रहणाऽसम्भवात्। तस्मान्निरुक्तश्रुतिसूत्राणामप्येतदर्थानुसारेणार्थो व्याख्येयः। इत्थञ्च सत्कार्यवादपक्षे स्वरूपतस्तेषां नाशाभावेन सत्त्वेऽपि बीजभावस्य ज्ञानेन नष्टत्वाद[५]दग्धबीजभावानां शालितुण्डलानामिव दृष्टभोगानुकूलत्वमात्रमिति ज्ञानिनां कर्माशयो नास्त्येवादृष्टजन्मभोग्यः, किन्तु दृष्टभोगनाश्य एवेति दिक्।

---

१. ग घ — **क्लृप्त०** [**क्लेश०** प्राक्] उपलभ्यते, क ख — **क्लृप्त०** नोपलभ्यते।
२. ग घ — **एव** [दाहः पश्चात्] उपलभ्यते, क ख — **एव** नोपलभ्यते।
३. घ — **सामान्यत एव** [हेतुतायाः पश्चात्] उपलभ्यते, क ख ग — **सामान्यत एव** नोपलभ्यते।
४. क ख ग — **अत एव....ग्रहणासम्भवात्** उपलभ्यते, घ — **अत....सम्भवात्** नोपलभ्यते।
५. क ख — **अदग्ध०**, ग घ — **दग्ध०**।

ननु यदि सत्कर्मपरिपाकेन प्राप्तचरमदेहस्य ज्ञाने सत्यपि दृष्टविपाकस्तर्ह्यन्येभ्योऽतिविशेषो न स्यात्। विधिनिषेधशास्त्रेऽधिकृतो विहितानि निषिद्धानि वा यावन्ति कर्माणि सञ्चिनोति तावद्भिरेक एक[१] आरभ्यते, इत्येकभविकपक्षे ज्ञानिनामिव[२] नियतादृष्टजन्मभोगस्यैवाङ्गीकारात्। युक्तश्चायं पक्षः। तथाहि, नैकं कर्मैकस्य जन्मनः कारणम्। अनादिकालसञ्चितानां क्रियमाणानां च मध्ये किं कर्म प्रथमं फलं दास्यति किं पश्चादिति फलक्रमे नियमाभावाल्लोकानां पुण्यानुष्ठाने फलानिश्चयप्रसक्त्या प्रवृत्तिलोपापत्तेः। न च यदा कदाचित् फल[३]सम्भवेनैव प्रवृत्तिर्भविष्यति। फलसाधनताज्ञानमात्रस्य प्रवृत्तिकारणत्वादिति वाच्यम्। भाव्यनन्तकालमध्ये भाविपापादिना अनुष्ठीयमानकर्मणो विनाशसम्भवाज्झटिति भोगकामनयैव कर्मानुष्ठानात्। नाप्ये[४]ककर्मानेकजन्मनां कारणम्। अनेकेषु जन्मसु कृतं क्रियमाणं च कर्मैकैकं प्रत्येकमेवानेकस्यासंख्यजन्मनः कारणमिति तद्विरुद्ध[५]फलदस्य कर्मणः फलकालाभावप्रसक्त्या तत्र प्रवृत्तिलोपापत्तेः। नाप्यनेकानि कर्माणि मिलित्वा अनेकजन्मनां कारणानि। बहूनां जन्मनां युगपदसम्भवेन क्रमिकोत्पत्तेरवश्यवाच्यतया प्रथमं किं पश्चात् किमिति क्रमे नियमाभावात् पुण्यानुष्ठाने फलानिश्चयप्रसक्त्या प्रवृत्तिलोपप्रसङ्गदोषतादवस्थ्याच्छी[६]घ्रफलकामनयैव कर्मानुष्ठानस्योक्तत्वात्। तस्मादेकं कर्मैकं जन्म करोति, एकमनेकानि जन्मानि करोति, अनेकान्य[७]नेकजन्मानि कुर्वन्तीति पक्षत्रयस्यासम्भवाज्जन्मारभ्य मरणपर्यन्तं विहितप्रतिषिद्धैर्यो धर्माधर्मसमूहो गुणप्रधानभावापन्न उत्पादितः स मरणकाल आरब्धकर्मभोगसमाप्त्या लब्धावसरः सन् स्वफलदानार्थं मरणं प्रसाध्य प्रवृद्ध[८]वेगमेकमेव [९]जन्म फलयोग्यं करोति, नानेकमित्येकभविकपक्ष एव युक्तः।

नन्वेवं विधिनिषेधानधिकृतदेवतिर्यगादिशरीरलाभे प्रायेणोत्तरमपुनर्भवप्रसङ्गः। [१०]अनधिकारेणापूर्वस्यानर्जनात्। प्राचीनसर्वकर्मणां च तस्मिन्नेव शरीरे समापनादिति।

---

१. क — **एकः**, ख घ — **एव**, ग — **एकभवः**।
२. क ख — **ज्ञानिनामिव**, ग घ — **अज्ञानामिव**।
३. क ख — **सम्भवेन**, ग घ — **सम्भावनया**।
४. क ख — **एवं**, ग घ — **एकम्**।
५. क ख ग — **फलदस्य**, घ — **फलस्य**।
६. क ख — **छीघ्र०**, ग घ — **झटिति**।
७. क ख — **एक०**, ग घ — **अनेक**।
८. क ख घ — **वेगं**, ग — **वेगः**।
९. ग घ — **स्व** [**जन्म**०पश्चात्] उपलभ्यते, क ख — **स्व०** नोपलभ्यते।
१०. क ख — **अनधिकारेण**, ग घ — **अनधिकारे**।

चेन्न। नरकस्वर्गादिजन्मकर्मणामेव ब्राह्मणस्थावरादियोनिलाभपर्यन्तश्रवणाच्छ्र[1]वणानुक्तकालविशेषस्यैकभविकत्वनियमाच्छान्तिपर्वण्यापद्धर्मे—

एवं खलु कपोतश्च कपोती च पतिव्रता।
लुब्धकेन हता स्वर्गं गता तनैव कर्मणा॥

इत्यादिना तिर्यञ्चामपि पुण्यश्रवणात्, परस्त्रीगमनादिपापश्रवणाच्च। अन्यत्रेन्द्रादेरपि ब्रह्महत्यादिश्रवणाच्च शरीरान्तरोपभोग्यदृष्टोत्पत्त्यङ्गीकाराद् वा दोषाभावात्। अखिलप्राणिकृतादग्धाप्रतिबद्धाखिलकर्मणामेवैकभविकत्वाङ्गीकारात्। अतः प्रायश्चित्ततत्त्वज्ञानादिना दग्धस्य शीघ्रभोगदायिनाऽवरुद्धस्य चैकभविकत्वाभावेऽपि न हानिः। न वा ज्ञानिनामन्यसाम्यम्। तेषामेवापुनर्भवाङ्गीकारादिति संक्षेपः। कर्मभिः शरीरान्तरोत्पत्तिश्च सत्त्वाद्यनुसारिणी।

येन येन हि भावेन यद्यत् कर्म करोत्ययम्।
तेन तेन शरीरेण तत्तत्फलमुपाश्नुते॥

इति मन्वादिस्मृतेः। सत्त्वान्वयश्चाप्तुं प्रयत्नाधीनः शास्त्रीयेष्टसाधनताज्ञानादिना सत्त्वसम्पत्तमो[2]निवृत्त्योः सम्भवात्। सत्त्वाद्याविर्भावेन च शक्यते कालान्तरोपभोग्यं तच्छेषभूतं शरीरान्तरमपि प्रत्याक्रष्टुम्[3]। पुरुषकारप्रधानस्य देशकालविशेषसमवधानस्यापि सम्भवात्।

नन्वयुक्तकालान्तरोपभोग्यस्य कालान्तरेऽभिव्यक्तिरिति चेन्न। चिराचिररूपकालस्याभिव्यञ्जकसामग्र्यामप्रवेशात्?

चित्रया यजेत पशुकामः।

इत्यादौ पशुकामस्य कृतायामपि साङ्गायां पशूनां सद्योऽनुपलम्भाद् बाधिता श्रुतिरिति बाह्येन प्रत्युपस्थिते[4] पशुकामस्य चित्राभ्युपाय इत्येतन्मात्रे तात्पर्यं, न तु चिराचिररूपकालेऽपि। तेन यस्य चित्रा सम्पन्ना तस्यासति प्रतिबन्धके पशुभिरवश्यं भवितव्यम्। प्रतिबन्धके सति तु कालान्तर इति शास्त्रकृद्भिर्व्यवस्थापितत्वात्। किन्तु भोक्त्रतिशयाधायी वयोविशेषरूपः। भोक्तृभोग्योभयाऽतिशायी शीतोष्णवर्षारूपऋतुविशेषरूपो जायते इति विशेषः। यथाह हारीतः—

---

१. क ख — छ्रवण०, ग घ — शास्त्र०।
२. क ख घ — निवृत्त्योः, ग — वृत्त्योः।
३. क ख घ — प्रत्याक्रष्टुं, ग — आकृष्टम्।
४. क ख — प्रत्युपस्थिते, ग घ — प्रत्यवस्थिते।

यस्मिन् यस्मिन् वयसि यः करोति शुभाशुभानि[१]।

तस्मिन् तस्मिन् वयसि शारीरवाचिकमानसान्याप्नोति।

इति। तस्मादैकभविकपक्षे भगवद्भजनादिना यद्यपि शक्यते शरीरपातोत्तरं झटिति नारदादिवच्छरीरं प्रत्याक्रष्टुं, तथापि तस्य कर्माशयहेतुकत्वेन कैवल्यापेक्षया बन्धत्वमेवेत्यनुपादेयकल्पत्वमेव [२]मुमुक्षोरिति सूत्रद्वयतात्पर्यार्थः। यदि तु परमेश्वरेच्छयैव सर्वं तदा तु सुतरामैकभविकः कर्माशयः। परन्तु दृष्टजन्मवेदनीय एव,

अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते।

इत्यादिस्मृतेः। अणिमाण्डव्यादीनां शैशवे कृतकर्मणामिहैव दुःखफलश्रवणाच्च। ज्योतिष्टोमादिकं च विधिसिद्ध्यर्थमात्रमनुष्ठेयम्। ईशसृष्टजीवानां [३]मरणानन्तरमी[४]श एव लया[५]ङ्गीकारेण भवान्तराभावात्। तस्मादस्मिन् पक्षे एक एव भवः कार्यतयास्मिन्नस्तीति नार्थः। किन्त्वेकस्मिन्नेव शरीरे फलस्य भावः सद्भावोऽस्तीत्येकभविकशब्दार्थः। अस्मिँश्च पक्षे कर्मतत्त्व[६]ज्ञानादिसाधनानामीशप्रसादकोपौ प्रत्येव कारणता, न फलं प्रति। फलमत उपपत्तेरिति सूत्रयता व्यासेन तथा ज्ञापनात्। अतो न कस्याप्यप्रामाण्यमिति संक्षेपः॥ १३॥

अधुना जात्यादीनां हेयत्वार्थं फलमाह—

ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्॥ १४॥

त इति। ते जात्यायुर्भोगाः सर्व एव ह्लादपरितापफलाः समुच्चितसुखदुःखफलकाः। कुतः? पुण्यापुण्यहेतुत्वात्। समुच्चितधर्माधर्महेतुकत्वादित्यर्थः। सुखावच्छेदेन पुण्यहेतुकाः, दुःखावच्छेदेनापुण्यहेतुका इति यावत्। [७]सर्वस्यापि फलस्य दुःखसम्भिन्नत्वादित्यर्थः॥ १४॥

---

१. क ख — **शुभानि**, ग घ — **शुभाशुभानि**।
२. क ख ग — **मुमुक्षोः**, घ — **मुमुक्षुभिः**।
३. क ख — **मरणानन्तरं**, ग घ — **मरणोत्तरम्**।
४. क ख ग — **ईशः**, घ — **ईश्वरः**।
५. क ख ग — **अङ्गीकारेण**, घ — **अङ्गीकारे**।
६. क ख ग — **ज्ञानादिसाधनानां**, घ — **ज्ञानसाधनादीनाम्**।
७. क ख घ — **सर्वस्यापि फलस्य दुःखसम्भिन्नत्वादित्यर्थः** उपलभ्यते, ग — **सर्वस्य.... इत्यर्थः** नोपलभ्यते।

ननु दुःखफला हेया भवन्तु सुखफलास्तु कथं हेया इत्यत आह—

परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः॥ १५॥

परिणामेति। परिणामश्च तापश्च संस्कारश्च तज्जन्यानि दुःखानि तैर्योगात् तत्कारणत्वादिति यावत्। विषयाणां भोगे तृष्णाभिवृद्धिः परिणामः, भोगपरिपन्थिनि द्वेषस्तापः, भोगानुभवेन भोगस्मृतिजनकः संस्कारः। एतेषां दुःखसाधनत्वं स्फुटमेव। **गुणवृत्तिविरोधाच्चेति**। गुणानां सत्त्वरजस्तमसां वृत्तयः सुखदुःखमोहास्तासां विरोधः परस्परमभिभाव्याभिभावकत्वं, तस्मादित्यर्थः। गुणवृत्त्यविरोधादिपाठे तु गुणवृत्तीनां सुखादीनां गुणप्रधानभावेन समावेशादित्यर्थः। विवेकिन इत्यनेन विषयसुखं दुःखसम्भिन्नतया सुखकाले योगिन एव पश्यन्तीति सर्वं दुःखं नायोगिनः। सुखकाले दुःखतयाऽनुभवाभावात्। ननु सुखसाधनतया सुखसम्भिन्नतया च सर्वं सुखमेव कथं न भवतीति चेन्न। बाहुल्यस्यैवात्र नियामकत्वात्। दुःखबाहुल्यस्य लोके स्फुटत्वात्। उक्तञ्च विष्णुपुराणे—

कलत्रमित्रपुत्रार्थगृहक्षेत्रधनादिकैः।
क्रियते न तथा भूरि सुखं पुंसां यथाऽसुखम्॥

इति॥ १५॥

इदानीं हेयं हेयहेतुर्हानं हानहेतुश्चेति चतुष्टयं व्युत्पादयितुं विशिष्य हेयं दर्शयति—

हेयं दुःखमनागतम्॥ १६॥

हेयमिति। अतीतस्यातीतत्वादेव वर्तमानस्य च भोगेनैव क्षयसम्भवादनागतमेव हेयमित्यर्थः॥ १६॥

हेयहेतुमाह—

द्रष्टृदृश्ययोः संयोगो हेयहेतुः॥ १७॥

द्रष्टृदृश्ययोरिति। द्रष्टा पुरुषः, दृश्यं प्रधानम्। तयोः संयोगोऽविवेकख्यातिहेतुकं भोक्तृभोग्यत्वेन सन्निधानं हेयस्य दुःखस्य [1]हेतुकारणमित्यर्थः॥ १७॥

तत्र दृश्यस्वरूपं कार्यं प्रयोजनं चाह—

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्॥ १८॥

---

१. क ख घ — हेतु०, ग — हेतुः।

प्रकाशेति। प्रकाशः प्रपञ्चावभासः सत्त्वधर्मः, क्रिया प्रवृत्तिः रजसो[१] धर्मः, स्थितिर्नियमस्[२]तमसः, ताः प्रकाशक्रियास्थितयः शीलं स्वाभाविकं रूपं यस्य तत्तथाविधमिति स्वरूपमस्य निर्दिष्टम्। भूतेन्द्रियात्मकं भूतानि स्थूलसूक्ष्मभेदेन द्विविधानि। उभयमेतत् पृथिव्यादीनि च गन्धतन्मात्रादीनि च इन्द्रियाणि बुद्धीन्द्रियकर्मेन्द्रियाऽन्तःकरणभेदेन त्रिविधानि। उभयमेतद् ग्राह्यग्रहण[३]रूपतयाऽऽ[४]त्मस्वरूपाभिन्नः परिणामो यस्य तत्तथाविधमित्यनेन कार्यमस्योक्तम्। भोगः सुखदुःखान्यतरसाक्षात्कारः। अपवर्गः संसारनिवृत्तिरूपकैवल्यं, तौ भोगापवर्गावर्थः प्रयोजनं यस्य तत्तथाविधमित्यनेन प्रयोजनमस्योक्तम्। तदिदं गुणत्रयं प्रपञ्चकारणं भोगमोक्षप्रयोजनकं दृश्यपदार्थ इत्यर्थः॥ १८॥

गुणानामिव गुणविकाराणामपि दृश्यत्वज्ञापनाय गुणानामवस्थाः प्रदर्शयति—

विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि॥ १९॥

विशेषेति। विशिष्यन्ते व्यावर्त्यन्ते इति विशेषा व्यावृत्ताः, पञ्च भूतानि दशेन्द्रियाणि, एकादशं मनश्चेत्येते षोडशविकारा एव। तेषां[५] प्रकृतयो बुद्धेर्विकृतयः पञ्चतन्मात्राहङ्काराः षड[६]विशेषाः लिङ्गमात्रं महत्तत्त्वं अलिङ्गगुणानां साम्यावस्थारूपं प्रधानम्। एतानि चत्वारि गुणपर्वाणि गुणानामवस्था इत्यर्थः॥ १९॥

दृश्यं निरूप्य द्रष्टारं निरूपयति—

द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययाऽनुपश्यः॥ २०॥

द्रष्टेति। द्रष्टा पुरुषो दृशिमात्रः चिन्मात्रो न ज्ञानादिधर्मकः।

ज्ञानं नैवात्मनो धर्मो न गुणो वा कथञ्चन।
ज्ञानस्वरूप एवात्मा नित्यः सर्वगतः शिवः॥

इत्यादिस्मृतेः। एतेन मतान्तराभिमतस्वरूपता[७]निरासः। मात्रपदेन गुणान्तरस्यापि व्यवच्छेदः। अतः शुद्धोऽपि पारार्थ्याचेतनत्वपरिणामित्वादिरूपाशुद्धिरहितोऽपि। एतेन

---

१. क ख ग — **रजसो धर्मः**, घ — **रजोधर्मः**।
२. क ख ग — **तमसः**, घ — **तमोधर्मः**।
३. क ख — **रूपतया**, ग घ — **रूपम्**।
४. क ख घ — **आत्मस्वरूपाभिन्नः**, ग — **आत्मा स्वरूपाभिन्नः**।
५. क ख — **तेषां**, ग घ — **एतेषाम्**।
६. क ख घ — **विशेषाः**, ग — **अविशेषाः**।
७. क ख घ — **निरासः**, ग — **व्यावृत्तिः**।

भूतेन्द्रियाद्यन्तर्भावव्यावृत्तिः। प्रत्ययानुपश्यः। प्रत्ययं बुद्धिवृत्तिमनुसृत्य पश्यतीति प्रत्ययानुपश्यः। स्वस्य बुद्ध्यविवेकाद् वृत्तिभिरेकी[1]भूतः सन् शब्दादीन् पश्यतीत्यर्थः। एतेन द्रष्टरि प्रमाणं सूचितम्। चेतनं विना जगतो भानानुपपत्तेरिति भावः॥ २०॥

प्रमाणं दर्शयति—

तदर्थ एव दृश्यस्यात्मा॥ २१॥

तदर्थ इति। तस्य पुरुषस्यार्थः प्रयोजनं भोगापवर्गावेवार्थः प्रयोजनं यस्य स तथेति मध्यमपदलोपिसमासः। पुरुषस्य भोगापवर्गप्रयोजनक एव दृश्यस्यात्मा स्वरूपं कार्यकारणात्मकं गुणत्रयं, न स्वार्थमित्यर्थः। तथा च—

गुणाः परार्थाः,संहत्यकारित्वात्,शय्यादिवत्,

इत्याद्यनुमानेन दृश्यातिरिक्तस्य पुरुषस्य सिद्धिरिति भावः। तदर्थमेव दृश्यमित्येतावन्मात्रेणैव निर्वाहेऽप्यात्मपदं धात्वर्थे दर्शने तदर्थत्वान्वयभ्रमनिरासाय प्रयुक्तमिति दिक्॥ २१॥

ननु पुरुषप्रयोजनकं दृश्यस्य स्वरूपं यदि[2] तर्हि पुरुषार्थहेतुरूपस्थितिकत्वेन चेतनदृष्टिलब्धसत्ताकस्य भोगापवर्गरूपे पुरुषार्थे कृते सत्यवस्थानायोगादत्यन्तोच्छेदप्रसङ्गः। तथा च प्रकृतिनित्यत्वभगवन्नित्यैश्वर्यादिसिद्धान्तहानिः स्यात्। इदानीं [3]संस्कारश्च नोपलभ्येत। यदि चात एव नाशस्तर्हि जीवस्यात्यन्तिकी संसारनिवृत्तिर्न स्यात्। कारणस्य सत्त्वात्। तत्राह—

कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्॥ २२॥

कृतार्थमिति। कृतः समापितोऽर्थो यस्येति कृतार्थम्। एकं कञ्चिन्मुक्तपुरुषं प्रति गुणादिकं नष्टं प्रयोजनाकरणाद्राज्ञो [4]राजवन्नष्टमपि सामान्यतो न नष्टम्। कुतः? तदन्यसाधारणत्वात्। तस्मिन्नन्यपुरुषेऽ[5]साधारणत्वादित्यर्थः। सोऽयमर्थः—

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जन्यन्तीं[6] सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥

---

१. क ख ग — भूतः, घ — भूय।
२. क ख ग — यदि तर्हि....उच्छेदप्रसङ्गः उपलभ्यते, घ — यदि....प्रसङ्गः नोपलभ्यते।
३. क ख — संस्कारः, ग घ — संसारः।
४. क ख — राज०, ग घ — राज्य०।
५. क ख — असाधारणत्वात्, ग घ — च साधारणत्वात्।
६. क ख — जनयन्तीं, ग — सृजमाणाः, घ — सृजमानाम्।

इत्यादिश्रुतिसिद्धः। एतदुक्तं भवति। प्रधानस्य कृतार्थं प्रति न प्रवृत्तिः। अनागतावस्थस्यैव पुरुषार्थस्य प्रवृत्तिहेतुत्वात्[१]। अकृतार्थं प्रति तु घटते महदाद्याकारेण प्रवृत्तिरतो नो[२]क्तदोष इति संक्षेपः॥ २२॥

द्रष्टृदृश्यौ[३] व्याख्याय हेयहेतुं संयोगं निरूपयति—

स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः॥ २३॥

स्वेति। स्वं दृश्यम्। तस्य शक्तिः जडत्वेन [४]भोगयोग्यता। स्वामी पुरुषस्तस्य शक्तिश्चेतनत्वेन भोक्तृयोग्यता, स्वरूपात्मिकैव। तयोः स्वस्वामिस्वरूपयोः शक्त्योः स्वरूपोपलब्धिहेतुः स्वरूपेण भोक्तृभोग्यभावेन भास्यभासकभावेन चोपलब्धौ हेतुः कारणं भोक्तृभोग्यभावेन सन्निधानं संयोग इत्यर्थः। अथवा सुखदुःखाद्याकारदृश्यबुद्धिस्वरूपस्योपलब्धिर्भोगः। स्वामिस्वरूपस्य सच्चिन्मात्रस्योपलब्धिहेतुरपवर्गहेतुर्ज्ञानम्। तद्धेतुः संयोग इत्यर्थः। अथवा स्वशक्तिर्दृश्यं भोग्यतायोग्यत्वात्। स्वामिशक्तिर्द्रष्टृभोक्तृयोग्यत्वात्। तयोः स्वरूपोपलब्धौ हेतुर्यः संयोगविशेषः स एव द्रष्टृदृश्यसंयोगोऽत्र हेयहेतुरुक्तो, न सम्बन्धमात्रम्। प्रलयमोक्षादिसाधारण्यादिति भावः। सूत्रे स्वरूपपदं विवेकख्यातिपर्यन्तस्य दर्शनसामान्यस्य संयोग[५]जन्यत्वज्ञापनेन हेयपक्षे प्रवेशज्ञापनाय। तदुक्तम्—

त्यज धर्ममधर्मं च उभे सत्यानृते त्यज।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज॥

इति। एवं विवेकख्यात्यन्त्ये कार्ये जनिते कृतकृत्येन जीवेन प्रधानादेरदर्शनात्, तं प्रति नष्टत्वेन दर्शनरूपकार्यावसान एव संयोग इत्यतो दृष्टस्वरूपोपलब्धिर्द्रष्टृदृश्ययोर्वियोगकारणमित्यपि ज्ञापितम्॥ २३॥

संयोगदर्शनावसानत्वं समर्थयिष्यन् दर्शनोच्छेद्यामविद्यां तत्कारणमाह—

तस्य हेतुरविद्या॥ २४॥

तस्येति। तस्य द्रष्टृदृश्यसंयोगस्य अविद्या प्रवाहानादिरनात्मन्यात्मबुद्ध्यादिरूपा

---

१. क ख घ — **प्रवृत्तिहेतुत्वात्**, ग — **प्रवृत्तित्वात्**।
२. क ख ग — **उक्तदोषः**, घ — **उक्तानुपपत्तिः**।
३. क ख — **द्रष्टृदृश्यौ**, ग घ — **दृश्यद्रष्टारौ**।
४. क — **भोग०**, ख ग घ — **भोग्य०**।
५. क ग घ — **जन्यत्वज्ञापनेन**, ख — **जन्यत्वेन**।

ख्याता[1] हेतुः। बीजाङ्कुरन्यायेन स्वप्रयोज्यवासनाद्वारा कारणमित्यर्थः। अहमिति दृग्दृश्ययोरभेदभ्रान्तितद्वासनावासितं चित्तं प्रलयादौ प्रधानभावमुपगतं, सर्गकाले पूर्वपूर्वसंस्कारादृष्टप्रयुक्तं भोगापवर्गार्थं पुरुषस्य सन्निहितं भवति। तेनैव संयोगेन भोगापवर्गौ भवत इति यावत्॥ २४॥

हेयं हेतुं[2] च व्युत्पाद्य मोक्षापरपर्यायं हेयं[3] हेयज्ञानं व्युत्पादयति—

तदभावात् संयोगाभावो हानं तद् दृशेः कैवल्यम्॥ २५॥

तदभावादिति। तस्या अविद्यायाः अभावान्नाशाद् हेयसाधनस्य दृग्दृश्यसंयोगस्याभावो निवृत्तिर्हानपदार्थः। तस्य [4]पुरुषार्थत्वमाह—तद् दृशेः कैवल्यमिति। तद् हानं दृशेः पुरुषस्य कैवल्यं, प्राप्ताप्राप्तविवेकरीत्या मोक्ष इत्यर्थः। तथाहि—[5]अतीतदुःखस्यातीतत्वादेव, वर्तमानस्य च स्वोत्तरोत्पन्नविशेष[6]गुणेनैव नाशसम्भवात्। अनागतस्य तु निवर्त्तयितुमशक्यत्वादेव न तत्त्वज्ञानेन हानं वक्तुं शक्यम्। अतः साक्षात्तत्साधनभूतस्य विवेकख्यातिनिमित्तस्य संयोगस्य निवृत्तिरेव तत्त्वज्ञाने साध्या। हानक्रियैव चानागतावस्थापरिपालनेन भाविदुःखप्रतियोगिकापि भवतीति स्वतः पुरुषार्थरूपा च भवति। इत्थञ्चानागतदुःखस्य, हेयं दुःखमनागतमिति हानक्रियाकर्मत्वरूपहेयत्वोक्तिरपि सङ्गच्छते इति दिक्॥ २५॥

तदभावात् संयोगाभाव इत्यनेनात्यन्तिकदुःखनिवृत्तेः [7]पुरुषार्थरूपतया ज्ञापितायाः कारणमाह—

विवेकख्यातिरविप्लवा हानोपायः॥ २६॥

विवेकेति। दृग्दृश्ययोर्भेदो विवेकस्तस्य ख्यातिः—अन्ये गुणाः, अन्यः पुरुष इत्याकारकं ज्ञानम्। सा कीदृशी। अविप्लवा न विद्यते विप्लवो मिथ्याज्ञानजन्यवासनाभिरन्तराभिभवो यस्याः सा साक्षात्काररूपा। हानोपायः, आत्यन्तिकदुःखनिवृत्तिरूपमोक्षस्य पन्था इत्यर्थः। कारणमिति विहायोपाय इति कथनं तु ज्ञानाज्ञानयोरेव

---

१. क ख घ — **ख्याता**, ग — **व्याख्याता**।
२. क ख — **हेतुं**, ग घ — **हेयहेतुम्**।
३. क ख — **हेयं हेयज्ञानं**, ग घ — **हेयहानम्**।
४. क ख घ — **पुरुषार्थत्वं**, ग — **पुरुषार्थत्वाय**।
५. क ख घ — **अतीत०**, ग — **अतीतस्य**।
६. क ख घ — **गुणेन**, ग — **गुणैः**।
७. क ख घ — **पुरुषार्थ०**, ग — **पुमर्थ०**।

साक्षाद्विरोधात् प्रथमतो ज्ञानादज्ञाननाशः। पश्चात् प्रधानस्याधिकारनिवृत्तिः। ततश्चित्तस्य लयः। ततः संयोगनाशः। ततो दुःखस्यानुत्पाद इति क्रमज्ञापनायेति संक्षेपः॥ २६॥

ननु ज्ञानादेव चेन्मोक्षस्तदाऽसंप्रज्ञात[१]योगान्तरप्रयासानुसरणं व्यर्थम्। आत्मतत्त्वस्यौपनिषदत्वेन श्रुत्यैव ज्ञानसम्भवादित्याशङ्क्य, आगमात् परोक्षैव विवेकख्यातिरुदेति नापरोक्षा, किन्तु सा भावनाप्रकर्षादेवेति ज्ञापयिष्यँस्तस्या विवेकख्यातेः स्वरूपमाह—

तस्य सप्तधा प्रान्तभूमिः प्रज्ञा॥ २७॥

तस्येति। तस्य उत्पन्नसाक्षात्कारस्य प्रान्तभूमिः प्रज्ञा प्रकृष्टोऽन्तोऽवसानं यासां ताः प्रान्ताः। चरमा इति यावत्। प्रान्ता भूमयोऽवस्था यस्याः सा प्रज्ञा प्रान्तभूमिः। सप्तधा सप्तप्रकारा भवतीत्यर्थः। सप्तप्रकाराः [२]प्रज्ञावस्थाश्चरमा भवन्तीति यावत्—

१. ज्ञातव्यमखिलं ज्ञातं, न किञ्चिज्ज्ञातव्यमस्तीति या सैका।

२. सर्वजिज्ञासानिवर्तकत्वात् प्रान्ता। न हीयमज्ञस्याल्पस्य वा सम्भवति। तत्तदालम्बनसमाधिना प्रधानान्तप्रज्ञायां स्थिरायामपि आत्मजिज्ञासायाः सत्त्वेन[३] तत्प्रज्ञायाश्चरमत्वात्। एवमग्रिमावस्थानां प्रान्तत्वमवगन्तव्यम्। हातव्याः सर्वे बन्धहेतवो हताः, न किञ्चिन्मम हातव्यमस्तीति या सा द्वितीया।

३. कैवल्यप्राप्त्या प्राप्तव्यमखिलं प्राप्तं, न किञ्चिन्मे प्राप्तव्यमस्तीति या सा तृतीया।

४. विवेकज्ञानसम्पादनेनाखिलं कर्तव्यं कृतं, न मे किञ्चित् कर्तव्यमस्तीति या सा चतुर्थी।

एताश्चतस्रः प्रज्ञाः कार्यविषयनिर्मलज्ञानस्वरूपाः कार्यविमुक्तिसंज्ञाः। चित्तविमुक्तिसंज्ञास्तु तिस्रः—

१. कृतार्थं बुद्धितत्त्वमित्येका।

२. गुणाः कृताधिकारा गिरिशिखरच्युता इव ग्रावाणः पाषाणविशेषाः[४] निरवस्थाना न पुनः स्थितिं यास्यन्ति। उपरममुख्यानां मोहाभिधानरूपसंयोगकारणाभावात्। निष्प्रयोजनत्वाच्चामीषां कुतः प्रोरह इति द्वितीया।

---

१. क ख ग — **योगान्तर०**, घ — **योगान्त०**।
२. क ख घ — **प्रज्ञावस्थाश्चरमाः**, ग — **चरमाः प्रज्ञावस्थाः**।
३. क ख ग — **सत्त्वेन**, घ — **साऽद्वितीयत्वेन**।
४. क ख घ — **पाषाणविशेषाः** उपलभ्यते, ग — **पाषाणविशेषाः** नोपलभ्यते।

३. गुणातीतोऽहं स्वरूपमात्रावस्थितः सच्चिदेकरस इति तृतीया।

इत्थं त्रिप्रकारा चित्तस्वरूपविमुक्तिविषयत्वात् तथोच्यते। ईदृशसप्तप्रकारप्रज्ञावानेव ज्ञानी कुशल इत्युच्यते। अत एतादृश्यः[१] प्रज्ञाः, जिज्ञासाजिहासाप्रेप्साचिकीर्षाशोकभयविकल्पनिवृत्तिफलाः। साङ्गसमाधिं विना न [२]सम्भवन्तीति तदन्तप्रयासः सार्थक एवेति दिक्॥ २७॥

ननु तथापि किमर्थं चित्त[३]रोधहेतुप्राणनिरोधादि[४]लक्षणो योगप्रयासः। मनोनिग्रहस्य श्रुतिजन्यात्ममात्रसत्यबोधेनैव सम्भवात्। तदुक्तम्—

आत्मसत्यानुबोधेन न संकल्पयते यदा।
अमनस्तां तदा याति तदभावे तदग्रहम्॥

इत्यादि। अतस्तेन मनसो निग्रहे जाते स्वप्रकाशात्मतत्त्वं केवलं स्वयमेव भासत इति समाधिसिद्धिर्योगाङ्गानुष्ठानप्रयासोऽनुचित इत्याशङ्क्य, आत्ममात्रसत्यत्वबोधरहितानां बहिर्मुखानां सत्ख्यातिवादिनां च मनोनिरोधहेतुकेन चाञ्चल्यनिरासेनैवात्मबोधो मोक्षाख्या शान्तिश्च भवतीति [५]पूर्वमुक्ताननेकयोगान्। साङ्गसमाधियोगेऽन्तर्भावयिष्यन् योगाङ्गानुष्ठानात् तद्भवतीत्याह—

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः॥ २८॥

योगाङ्गेति। योगस्य तदङ्गानां च[६] अनुष्ठानात् पौनःपुन्य[७]रूपाद् अभ्यासाद् अशुद्धिक्षये चाञ्चल्यादिहेतुक्लेशादिलक्षणपापक्षये सति ज्ञानदीप्तिराविवेकख्यातेः विवेकख्याति[८]पर्यन्ता ज्ञानस्य श्रवणमनननिदिध्यासनजन्यस्य सर्वस्यापि दीप्तिः मिथ्याज्ञानेन अभिभवोऽश्रुतमतार्थग्राहित्वं च भवतीत्यर्थः। साङ्गयोगानुष्ठानस्य स्वजन्यधर्मजन्यशुद्धिद्वारा ज्ञानसाधनत्वमिति भावः।

---

१. क ख घ — **एतादृश्यः**, ग — **एव दृश्यः**।
२. क ख घ — **सम्भवन्तीति तदन्तप्रयासः सार्थक एवेति दिक्**, ग — **सम्भवति समाधिश्च मनोनिग्रहहेतुः**।
३. क ख घ — **रोध०**, ग — **निरोध०**।
४. क ख — **लक्षणः**, ग — **लक्षण०**, घ — **लक्षणे**।
५. क ख घ — **पूर्वमुक्त०**, ग — **पूर्वोक्त०**।
६. ग — **अनुपदमेव वक्ष्यमाणानां यमादीनां** [**च** पश्चात्] उपलभ्यते, क ख घ — **अनुपदमेव वक्ष्यमाणानां यमादीनां** नोपलभ्यते।
७. क ख घ — **रूपात्**, ग — **रूप०**।
८. क — **पर्यन्ता**, ख ग घ — **पर्यन्तम्**।

अथवा योगाङ्गानां[1] धौतीवस्तीत्यादिषट्कर्मणां महामुद्रादीनां च अनुष्ठानाद् दृढाभ्यासाज्ज्ञानदीप्तिः। ज्ञायतेऽनेनेति ज्ञानं करणवर्गः। तस्य दीप्तिः रोगाद्यनभिघातेन तेजस्विता दृढता च, आविवेकख्यातेः विवेकख्यातिपर्यन्तं भवतीत्यर्थः। रोगादिना ज्ञानस्य कुण्ठीभावस्तु प्रसिद्ध एव। स चैतेष्व[2]ङ्गेष्वनुष्ठितेषु रोगप्रतिबन्धान्न भवती-[3]त्यर्थः। तथा च करणदार्ढ्यद्वारा समाधि[4]दार्ढ्यार्थार्थंकर्मयोगोऽपि [5]प्रथमतोऽनुष्ठेयो रोगभीरुणेति भावः। स च कर्मयोगः षट्कर्मरूपो मुद्रारूपश्चेति द्विविधो निरूपित आकरे यथा—

धौती वस्ती तथा नेति त्राटकं नौलिकं तथा।
कपालभाती चैतानि षट् कर्माणि प्रचक्षते॥
कर्मषट्कमिदं गोप्यं देहशोधनकारकमिति।
महामुद्रा महाबन्धो महावेधश्च खेचरी॥
शक्तिचालो मूलबन्ध उड्डीयानं ततः परम्।
जालन्धराभिधो योगो विपरीतकृतिस्तथेति॥

लक्षणानि च तत्रैवोक्तानि।

तत्र धौती॥ १॥

चतुरङ्गुलविस्तारं सिक्तं वस्त्रं शनैर्ग्रसेत्।
पुनः प्रत्याहरेदेतदभ्यासाद्धौतिकर्मवित्॥
कासश्वासप्लीहकुष्ठकफरोगादयः क्रमात्।
धौतिकर्मप्रभावेन प्रयान्त्येव न संशयः॥ इति।

अथ बस्ती॥ २॥

नाभिदघ्ने जले पायुन्यस्तनालोत्कटासनः।
आधाराकुञ्चनं कुर्यादभ्यासाद् बस्तिकर्म तत्॥
गुल्मोदनं चापि वातप्लीहपित्तकफोद्भवान्।
बस्तिकर्मप्रभावेन बाध्यन्ते सकलाऽऽमयाः॥

---

१. क ख — योगाङ्गानां, ग — योगानां, घ — योगानुष्ठानस्य स्वजन्यधर्माङ्गानाम्।
२. क ख घ — अङ्गेष्वनुष्ठितेषु, ग — अभ्यस्तेषु।
३. क ख घ — इत्यर्थः, ग — इति यावत्।
४. क ख — दार्ढ्यार्थार्थ०, ग घ — दार्ढ्यार्थम्।
५. ग — अवश्यं [प्रथमतः पश्चात्] उपलभ्यते, क ख घ — अवश्यं नोपलभ्यते।

धात्वेन्द्रियान्तःकरणप्रसादं दध्याच्च कान्तिं दहनप्रदीप्तिम्।
अशेषदोषोपचयं निहन्यादभ्यस्यमानं जलवस्तिकर्म ॥ इति।

अथ नेती ॥ ३ ॥

सूत्रं वितस्तिसुस्निग्धं नासानाले प्रवेशयेत्।
मुखान्निर्गमयेत् सा हि नेती सिद्धैर्निगद्यते ॥
कपालशोधिनी चैव दिव्यदृष्टिप्रदायिनी।
तत्रोर्ध्वजातरोगौघाञ्झरयत्याशु नेतिवित् ॥ इति।

अथ त्राटकम् ॥ ४ ॥

निरीक्षेन्निश्चलदृशा सूक्ष्मलक्ष्यं समाहितः।
अश्रुपातादिपर्यन्तमार्यैस्तत् त्राटकं मतम्॥
मोहनं नेत्ररोगाणां तन्द्रादीनां कपाटकम्।
एतच्च त्राटकं गोप्यं यथा वध्वा रतिः सदा ॥ इति।

अथ नौली ॥ ५ ॥

आनन्दवर्त्तवेगेन तुन्दं सव्यापसव्ययोः।
नलांशो भ्रामयेदेषा नौली योगे प्रचक्षते ॥
मन्दाग्निसन्दीपनपाचकाग्निसन्धायिकानन्दकरी तथैव।
अशेषदोषामयशोषणी च हठक्रिया मौलिनीयं हि नौली ॥

अथ कपालभाती ॥ ६ ॥

भस्त्रेव लोहकाराणां रेचपूरौ ससंभ्रमौ।
कपालभाती विख्याता कफदोषप्रदाहिनी ॥ इति।

अथ महामुद्रा ॥ १ ॥

अपसव्येन संपीड्य पादमूलेन सादरम्।
गुरूपदेशतो योनिं गुदमेढ्यान्तरालगाम्॥
सव्यं प्रसारितं पादं धृत्वा पाणियुगेन हि।
नवद्वाराणि संयम्य चिबुकं हृदयोपरि।
चित्तं चतुष्पथे दत्वा प्रारभेद्वायुधारणम्।
महामुद्रा भवेदेषा सर्वतन्त्रेषु गोपिता ॥
वामाङ्गेन समभ्यस्य दक्षाङ्गेनाऽभ्यसेत् पुनः।
प्राणायामं समं कृत्वा योगी नियतमानसः ॥

मुद्रामेतां तु सम्प्राप्य गुरुवक्त्रात् सुगोपिताम्।
अभ्यासयोगतो योगी मन्दभाग्योऽपि सिद्ध्यति॥
सर्वासामेव नाडीनां चालनं बिन्दुधारणम्।
जारणं तु कषायस्य पातकानां विनाशनम्॥
कुण्डलीबोधनं वायोर्ब्रह्मरन्ध्रप्रवेशनम्।
सर्वरोगोपशमनं जठराग्निविवर्द्धनम्।
कुर्यादभ्यासतस्त्वेषा महामुद्रा सुगोपिता॥

अथ महाबन्धः॥ २॥

योऽस्यां प्रसारितः पादो विन्यस्य तमुरूपरि।
गुदयोनी समाकुञ्च्य नीत्वा चापानमूर्ध्वगम्॥
योजयित्वा समानेन कृत्वा प्राणमधोमुखम्।
बन्धयेदूर्ध्वगत्यर्थमपानप्राणयोः सुधीः॥
कथितोऽयं महाबन्धः सर्वसिद्धिप्रदायकः।
नाडीगलद्रसव्यूहमूर्ध्वं नयति योगिनः॥
उभाभ्यां साधयेत् पद्भ्यामेकैकं सुप्रयत्नतः।
मतमत्र तु केषाञ्चित्कण्ठबन्धं विसर्जयेत्॥
राजदन्तद्वयं तत्र जिह्वयोत्तम्भयेत्॥ इति।

अथ महावेधः॥ ३॥

महावेधं स्थितो योगी कृत्वा पूरकमेकधा।
वायूनां गतिमावृत्य निभृतं कण्ठमुद्रया॥
समहस्तयुगो भूमौ स्थितौ संताडयेच्छनैः।
पुटद्वयं समाक्रम्य वायुः स्फुरतिमध्यगः॥
सोमसूर्याग्निसन्धानं जायते चामृतायते।
महावेधोऽयमभ्यासान्महासिद्धिप्रदायक॥
वलीपलितवेपघ्नः सेव्यते साधकोत्तमैः।
एतत्त्रयं महागुप्तं जरारोगविनाशनम्॥
वह्निवृद्धिकरं चैव सर्वसिद्धिप्रदायकम्। इति।

अथ खेचरी॥ ४॥

छेदनचालनदोहैर्जिह्वां संवर्द्धयेत्तावत्।
यावदियं भ्रूमध्यं स्पृशति तदा खेचरीसिद्धिः॥
कलां परामुखीं कृत्वा त्रिपथे परिवर्त्तयेत्।
सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते॥
रसं समूर्ध्वगां कृत्वा क्षणार्धं यदि तिष्ठति।
विषयैर्मुच्यते योगी व्याधिमृत्युजरादिभिः॥
खेचर्य्या मुद्रितं येन विवरे लम्बिकोर्ध्वतः।
तस्य न क्षरति बिन्दुः कामिन्यालिङ्गितस्य तु।
चलितोपपदे बिन्दुः सम्प्राप्तश्च हुताशनम्।
व्रजत्यूर्ध्वं हि तच्छक्त्या निरुद्धो योनिमुद्रया॥
चित्तायत्तं नृणां शुक्रं शुक्रायतं च जीवनम्।
तस्माच्चित्तं च शुक्रं च रक्षणीयं प्रयत्नतः॥
उभयो रक्षणे हेतुः खेचर्येव न संशयः। इति।

इयं व्युत्पादिता स्कान्दे—

कपालकुहरे जिह्वा प्रविष्टा विपरीतगा।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी॥
चित्तं चरति खे यस्माज्जिह्वा चरति खे गता।
तेनैषा खेचरी नाम मुद्रा सिद्धैर्निगद्यते॥ इति।

अथ शक्तिचालनम्॥ ५॥

आधारकमले सुप्तां चालयेत् कुण्डलीं दृढाम्।
अपानवायुनाकृष्य बलादाकृष्य बुद्धिमान्॥
शक्तिचालनमेवं हि प्रत्यहं यः समभ्यसेत्।
अग्निवृद्धिभवेत्तस्य रोगाणां च विनाशनम्॥
विहाय मुद्रां भुजगीं स्वयमूर्ध्वं भवेत् खलु।
तस्मादभ्यसनं कार्यं योगिना सिद्धिमिच्छता॥ इति।

अथ मूलबन्धः॥ ६॥

पादमूलेन संपीड्य गुदमार्गं सुयन्त्रितम्।
बलादपानमाकृष्य बलादूर्ध्वं समभ्यसेत्॥

कथितोऽयं मूलबन्धो जरामरणनाशनः।
अग्निवृद्धिर्भवेत्तस्य रोगाणां च विनाशनम्॥ इति।

अथोड्डीयानम्॥ ७॥

सति वज्रासने पादौ कराभ्यां धारयेद् दृढम्।
गुल्फदेशसमीपे च उदरं तत् प्रपीडयेत्॥
पश्चिमं तानमुदरं कारयेच्चिबुकं हृदि।
शनैः शनैर्यथा प्राणस्तुन्दसिद्धिं न गच्छति॥
सर्वेषामपि बन्धानामुत्तमो ह्युड्डियानकः।
षण्मासमभ्यसन् मृत्युं जयत्येव संशयः॥
नित्यं यः कुरुते योगी चतुर्वारं दिने दिने।
तस्य नाभेर्विशुद्धिः स्यात् येन सिद्धो भवेन्मरुत्॥ इति।

अथ जालन्धरबन्धः॥ ८॥

बद्ध्वा गले शिराजालं हृदये चिबुकं न्यसेत्।
बन्धो जालन्धरः प्रोक्तो देवानामपि दुर्लभः॥
एतस्याभ्यासतो योगी योगसिद्धिमवाप्नुयात्। इति।

अथ विपरीतकरणी॥ ९॥

ऊर्ध्वनाभिरधस्तालुरूर्ध्वंभानुरधःशशी।
करणी विपरीताख्या सर्वव्याधिविनाशिनी॥ इति।

एतत्प्रकारमाह दत्तात्रेयः—

अधः शिराश्चोर्ध्वपादः क्षणं स्यात् प्रथमे दिने।
क्षणाच्च किञ्चिदधिकमभ्यसेच्च दिने दिने॥
गुरूपदेशतः सम्यङ् न तु शास्त्रार्थकोटिभिः।
वलिश्च पलितं चैव षण्मासार्द्धे न दृश्यते॥
याममात्रं तु यो नित्यमभ्यसेत् स तु कालजित्।
नित्यमभ्यासयुक्तस्य जाठराग्निविवर्द्धनम्॥
आहारो बहुलं तस्य कार्योऽल्पे तु विनश्यति।
तेन नाभिस्थितो देवो भास्करो दहनात्मकः॥
तालुमध्ये स्थिताच्चन्द्राच्चलितं त्वऽमृतं मधुः।
नैव तद्ग्रसने शक्तो योगेनानेन वै चितः॥

विशुद्धो रोधतो गच्छेत् सर्वाङ्गेषु ततः क्रमात्॥ इत्यादि।

एतच्च सर्वं **योगाङ्गानुष्ठानादि**ति सूत्रे सूत्रितमपि हठयोगाङ्गत्वेन देह[१]सिद्ध-मात्रफलत्वेन साक्षाद्राजयोगाऽनङ्गत्वात् कण्ठरवेण सूत्रकृता नोक्तमिति मन्तव्यमिति संक्षेपः ॥ २८ ॥

कानि पुनस्तानि साक्षाद्राजयोगस्याङ्गानि यैरशुद्धिक्षये ज्ञानस्य दीप्तिस्तत्राह—

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टा-वङ्गानि॥ २९॥

यमेति। तत्र[२] यमाः स्वत एव सफलत्वादत्यावश्यकाः। सर्वमुमुक्षुजनसेव्या आदौ, पश्चात् तत्सापेक्षा नियमाः। एतदुभयाधीनचित्तस्थैर्यसापेक्षाण्यासनानि। तत्सापेक्षः प्राणायामः। तत्सापेक्षः प्रत्याहारः। तत्सापेक्षा धारणा। तत्सापेक्षं ध्यानम्। तत्सापेक्षः समाधिः सविकल्प इत्यष्टौ साक्षात् परम्परया वा निर्विकल्पस्य समाधेरङ्गानीत्यर्थः। अष्टाङ्गमैथुने क्रियानिष्पत्तेरङ्गिनोऽङ्गत्ववत् समाधेरङ्गिनोऽङ्गत्वं वा बोध्यम्। तेन न कोऽपि दोषः ॥ २९ ॥

तत्र के यमास्तत्राह—

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः॥ ३०॥

अहिंसेति। तत्र प्राणिदुःखसाधनव्यापारो हिंसा। सा च सर्वानर्थहेतुः। तदभावोऽहिंसा। उक्ता चेश्वरगीतायाम्—

कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा।
अक्लेशजननं प्रोक्ता अहिंसा परमर्षिभिः॥

इत्यादिना। हिंसायाः सर्वकालमेव सर्वत्र परिहार्यत्वात् प्रथमं तदभावरूपाया अहिंसाया निर्देशः। सत्यं यथादृष्टयथाश्रुतयथानुमितयथाध्यातविषयं व्यवहरणम्। तच्च द्विविधम्—कथनरूपमाचरणरूपञ्च। तत्राद्यं, [३]देवगुरुतीर्थादिसेवनमिष्टसाधनं शालयो मधुरा इत्यादि। द्वितीयं द्विजस्य यज्ञोपवीतादिधारणम्। तथा च यथार्थबोधनानुकूलो व्यापारः सत्यम्। [४]अत्रानुकूल्यं तदर्थबोधनेच्छाकृतत्वम्। तदर्थबोधनेच्छया कृतो

---

१. क ख — **सिद्ध०**, ग घ — **सिद्धि०**।
२. क ख ग — **तत्र यमाः स्वत एव**, घ — **अन्यानपेक्षत्वेन**।
३. क ख ग — **देव०**, घ — **देवादि०**।
४. क ख — **अत्रानुकूल्यं तदर्थबोधनेच्छाकृतत्वम्। तदर्थबोधनेच्छया कृतो व्यापार इति यावत्। तेन बोधनीयस्य शक्तिभ्रमादिना विपरीते बोधेऽपि न वक्तुर्यथार्थवाक्येऽव्याप्तिरिति संक्षेपः उपलभ्यते**, ग घ — **अत्र....संक्षेपः** नोपलभ्यते।

व्यापार इति यावत्। तेन बोधनीयस्य शक्तिभ्रमादिना विपरीते बोधेऽपि न वक्तुर्यथार्थ-वाक्येऽव्याप्तिरिति संक्षेपः। तद्भिन्नं चानृतमिति सिद्धम्। यथा

चैत्यवन्दनमिष्टसाधनम्।

इत्यादिवाक्यं, युधिष्ठिरस्य द्रोणं प्रति

अश्वत्थामा हतः।

इति वाक्यं च। स्वेच्छापूर्वकभ्रमानुकूलत्वात्। शूद्रस्य यज्ञोपवीतधारणाद्याचरणं च। तत्र सत्यं निरूपितम्। तत्रैव—

यथार्थकथनाचारं सत्यं प्रोक्तं द्विजातिभिः।

इति। तदप्यवध्यहिंसागोचरं ग्राह्यम्। अवध्यहिंसागोचरे सत्ये प्रत्यवायश्रवणात्। अस्तेयं स्तेयानाचरणम्। स्तेयं परद्रव्यापहरणम्। परद्रव्यं परस्य ममेदमिति स्वत्वास्पदं द्रव्यं, तस्यापहरणं अन्यायेन तस्मिन् ममेदमिति स्वत्वापादनम्। अन्यायश्च चौर्यं बलं च। तदुक्तं तत्रैव—

परद्रव्यापहरणं चौर्याद्वाथ बलेन वा।

स्तेयं तस्यानाचरणमस्तेयं धर्मसाधनम्॥

इति। चौर्यात् समुदायैकदेशप्रच्छादनात्। बलेन शस्त्रादिप्रदर्शनाघातादिना। ब्रह्मचर्यं सर्वावस्थोपस्थेन्द्रियसंयमः। उक्तस्तत्रैव—

कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा।

सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षते॥

इति। सर्वावस्थासु यौवनाद्यवस्थासु सर्वदा [१]रात्र्यादावपि। सर्वत्र,

अयोनौ वा वियोनौ वा पशुयोनौ तथैव च।

इति मनः। मैथुनं सुखविशेषहेतुशुक्रक्षरणानुकूलो व्यापारोऽष्टविधः—

स्मरणं स्पर्शनं केलिः प्रेक्षणं गुह्यभाषणम्।

संकल्पोऽध्यवसायश्च क्रिया[२]निर्वृतिरेव च॥

एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।

इत्यादिना शास्त्रेषु कथितम्। स च साभिलाषस्तथा। तादृशस्यैव शास्त्रेषु निन्दनात्। तस्मात्साभिलाषस्मरणादिरूपाष्टविधमैथुनत्यागो ब्रह्मचर्यमिति सिद्धम्।

---

१. क ख ग — रात्र्यादौ, घ — ऋतुकालादौ।

२. क ख — निर्वृतिः, ग घ — निष्पत्तिः।

अपरिग्रहः देहयात्रामात्रातिरिक्तभोगसाधनानामस्वीकारः। अर्जनरक्षणक्षयसङ्गहिंसादिदोषभावनया भोगसाधनानां द्रव्यादिदेहान्तानामस्वीकारः। उक्तस्तत्रैव—

द्रव्याणामप्यनादानमापद्यपि यथेच्छया।
अपरिग्रह इत्याहुस्तं प्रयत्नेन पालयेत्॥

इति। द्रव्याणामपीत्यपिना देहेन्द्रियपरिग्रहः। तत्र द्रव्याणामनादानं स्वत्वासम्पादनं, देहादीनामभिमानत्यागः। फलं तेषां विशिष्य वक्ष्यति सूत्रकारः॥ ३०॥

एतेषां योगिभिरुपादेयं विशेषमाह—

जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्॥ ३१॥

जातीति। जातिर्ब्राह्मणत्वादिः, देशस्तीर्थादिः, कालो नियतचतुर्दश्यादिः, समयः अनियतो ब्राह्मणभोजनाद्यवसरः। एतैः, ब्राह्मणादिकं[1] प्रयागादौ चतुर्दश्यादौ ब्राह्मणादिप्रयोजनं विना च न हनिष्यामीति क्रमेण जातिदेशकालसमयैर[2]नवच्छिन्ना न भवन्ति, किन्तु[3] कमपि कुत्रापि कदापि कस्याप्यर्थे न हनिष्यामीति जात्यादिभिरनवच्छिन्नाः सार्वभौमाः। सर्वासु क्षिप्तादिभूमिषु भवाः, महाव्रतमित्युच्यते इत्यर्थः।

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः।

इत्यादिश्रुत्या निवृत्तिधर्मस्यैव मोक्षसाधनत्वावगमान्निवृत्तिरूपा एते सदा सर्वत्र सर्वावस्थासु सेविता महाफलदा एव भवन्तीति भावः। एतेषु निवृत्तिरूपतया पारमहंस्यधर्मेषु वैराग्यरूपमुख्यचर्यायोगस्यान्तर्भावो वैराग्यहेतुकत्वादेतेषामिति दिक्॥ ३१॥

नियमानाह—

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः॥ ३२॥

शौचेति। शौचसापेक्षः सन्तोषस्तत्सापेक्षं तपस्तत्सापेक्षः स्वाध्यायस्तत्सापेक्षमीश्वरप्रणिधानमिति पञ्च नियमा इत्यर्थः। तत्र शौचं मलनिरसनम्। तच्च द्विविधं बाह्यमाभ्यन्तरञ्च। तत्र बाह्यं मृज्जलादिना कायादिमलप्रक्षालनम्। आभ्यन्तरं मैत्र्यादिभावनाभिश्चित्तमलप्रक्षालनम्। तदुक्तमीश्वरगीतायाम्—

बाह्यमाभ्यन्तरं शौचं द्विधा प्रोक्तं द्विजोत्तमाः।
मृज्जलाभ्यां भवेद् बाह्यं मनःशुद्धिरथान्तरम्॥

---

१. क ख ग — **ब्राह्मणादिकं**, घ — **गवादिकम्**।
२. क ख घ — **अनवच्छिन्नाः**, ग — **अवच्छिन्नाः**।
३. क ख ग — **किन्तु कमपि कुत्रापि कदापि कस्याप्यर्थे न हनिष्यामि**, घ — **किन्तु न कमपि न कुत्रापि न कदापि हनिष्यामि**।

इति। सन्तोषो यदृच्छा[१]लाभतस्तुष्टिः। उक्ता तत्रैव—

यदृच्छालाभतो नित्यं अलं पुंसो भवेदिति।
तां निष्ठां ऋषयः प्राहुः सन्तोषं सुखलक्षणम्॥

इति। यदृच्छालाभतः अनायाससिद्धिलाभाद्, नित्यं सर्वदा अलं पूर्णम्। तथा च पूर्णमिति बुद्धिरनुपादित्साहेतुः सन्तोषः। [२]सत्यामपीच्छायां क्षयादिदोषदर्शनादनुपादानमपरिग्रह इति यमनियमपदार्थयोरसंकरः। अत्र[३] यतमानादिवैराग्यहेतुकस्य मुख्यवैराग्यसाधनस्य मैत्र्यादिभावनारूपस्य गौणचर्यायोगस्यान्तर्भावः। तपः [४]देवद्विजगुरुपूजादि कृच्छ्रचान्द्रायणादि प्रागुक्तम्। स्वाध्यायः उपनिषदाद्यावृत्तिः प्रागुक्ता, प्रणवजपतदर्थभावनरूपस्येश्वरप्रणिधानस्य हेतुः—

वेदान्तोपनिषद् ब्रह्म जपेद्यथाधिदैविकम्।
अन्यानि च पवित्राणि विधिदृष्टानि शक्तितः॥
अभ्यस्याब्दत्रयं जप्यं शुद्धिकामो जितेन्द्रियः।
संनियम्येन्द्रियग्रामं ततः प्रणवमभ्यसेत्॥

इति शौनकोक्तेः[५]। तत्रानयोः क्रियायोगस्यान्तर्भावः। ईश्वरप्रणिधानं संसारमोचकस्येश्वरप्रसादस्यानुकूलो व्यापारो मोक्षमन्त्रजपतदर्थभावनादिः। अतो ब्रह्मयोगशिवयोगमन्त्रयोगज्ञानयोगाद्वैतयोगभक्तियोगानामन्तर्भावोऽत्र मोक्षसाधननियमे ज्ञातव्यः। एतादृशनियमे महाव्रतत्वं पूर्वोक्तमनुषञ्जनीयम्। कण्ठरवेणानुक्तिस्तु क्रियायोगे तदभावज्ञापनाय। तस्य प्रतिनियतदेशकालाद्यनवच्छिन्नतया सार्वभौमत्वासम्भवात्। अत एवा[६]स्यैवानावश्यकमुक्तं श्रीभागवतादौ—

यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित्।

इति। मत्पर इत्यनेन तु भक्तियोगज्ञानयोगादीनां सार्वभौमत्वेन महाव्रतत्वादावश्यकत्वमेवेति ज्ञापितम्। तदुक्तं विष्णुपुराणेऽपि—

शय्यासनस्थोऽपि पथि व्रजन् वा स्वस्थः परिक्षीणवितर्कजालः।

---

१. क ख ग — **लाभतः**, घ — **लाभात्**।
२. क ख ग — **सत्यामपीच्छायां क्षयादिदोषदर्शनादनुपादानमपरिग्रह इति यमनियमपदार्थयोरसंकरः** उपलभ्यते, घ — **सत्यां....संकरः** नोपलभ्यते।
३. क ख ग — **अत्र**, घ — **यत्र**।
४. क ख घ — **देवद्विजगुरुपूजादि** उपलभ्यते, ग — **देवद्विजगुरुपूजादि** नोपलभ्यते।
५. क ख ग — **शौनकोक्तेः**, घ — **शौनकस्मृत्युक्तः**।
६. क ख — **अस्य**, ग घ — **तस्य**।

संसारबीजक्षयमीक्षमाणः स्यान्नित्यमुक्तोऽमृतभोगभागी॥

इति। स्वस्थः स्वस्मिन् साक्षिणि यत् पूर्णानन्दैकबोधस्तद् ब्रह्मैवाहमस्मीति बोधेन तिष्ठतीति परमात्मनिष्ठः। परिक्षीणवितर्कजालः वक्ष्यमाणो वितर्कजालः प्रतिपक्षभावनां विनापि ब्रह्मात्मप्रणिधानेनैव क्षीणो यस्य तथा संसारबीजक्षयमीक्षमाणः संसारबीजानां[१] मिथ्याज्ञानजन्यवासनानां क्षयमनुदिनमुपलभमानः। तथा अमृतभोगभागीति जीवन्मुक्तिसुखानुभवितेत्येवं[२]रूपो नित्यमुक्तः स्यादित्यर्थः॥ ३२॥

एतेषु यमनियमेषु सम्भावितानां[३] वक्ष्यमाणविघ्नानां निवृत्त्युपायमाह—

वितर्कबाधने प्रतिपक्षभावनम्॥ ३३॥

वितर्केति। वितर्क्यन्ते मिथ्याज्ञानजन्यधारादिवासनाभिरभिमुखीक्रियन्ते इति वितर्काः हिंसादिसंकल्पास्तैरनिष्टसाधनत्वाद्धनिष्याम्येवैनं, कार्यविशेषमनृतमपि वदिष्यामि, अर्थविशेषात् परस्वमप्यपहरिष्यामि, सुखविशेषात् स्त्रियमुपयास्यामि, भोगविशेषाद्यथेष्टभोगसाधनं ग्रहीष्यामीत्यादिभिर्यमादीनां बाधने प्रतिबन्धे प्राप्ते यमादिपरो मुमुक्षुः प्रतिपक्षभावनं विपक्षभावनं हिंसादयोऽज्ञानमूलत्वात् संसारहेतवः। संसारश्च दुःखबहुलः। तथाहि—गर्भवासदुःखं सर्व[४]निरयतुल्यम्। ततो निःसृतस्य बाल्ये पारतन्त्र्याप्रतीकारादिनिबन्धनं, यौवने चार्थार्जनकाममात्सर्यादि[५]निबन्धनं, वार्द्धके च स्वीयानां स्वतन्त्रतया रोगबाहुल्येनेन्द्रियाद्यपाटवेन च कृतं दुःखं, मरणं[६] च महद्दुःखम्। एवं कथञ्चित् सत्कर्मजन्यस्वर्गादावपि परोत्कर्षस्वर्गक्षयादिचिन्ताजन्यं दुःखमापतेदित्येवं दोषचिन्तनं सदा कुर्यादित्यर्थः। एवमसत्कर्मजन्येषु कुम्भीपाकादिनरकेषु श्रवणदुःसहं महदेव दुःखम्। ततस्तिर्यगादियोनिषु दुःखैकतानेषु सुखलेशो दुर्लभ इति दुःखबहुलः संसारो जिहासितः। तद्धानाय[७] च मया

---

१. घ — **मिथ्याज्ञानानां** [**संसारबीजानां** पश्चात्] उपलभ्यते, क ख ग — **मिथ्याज्ञानानां** नोपलभ्यते।

२. क ख ग — **रूपः**, घ — **भूतः**।

३. क ख ग — **सम्भावितानां वक्ष्यमाणविघ्नानां**, घ — **सम्भावितवक्ष्यमाणविघ्नस्य**।

४. क ख ग — **निरय०**, घ — **निरूप०**।

५. क ख ग — **निबन्धनं**, घ — **निबन्धने** (उभयत्र)।

६. क ख — **मरणं**, ग घ — **मरणे**।

७. क ख ग — **तद्धानाय च मया....सदा कुर्यादित्यर्थः**, घ — **एवं सांसारिको चित्तानपि ऋतुकालगमनाग्निहोत्रादिधर्मानत्यन्तका मोक्षमार्गभासितः पुनर्विषयभोगादिनावांताशीशुनकतुल्य अनेकदुःखबहुलं संसारमेव प्राप्स्यामि न सुखलेशमयीति मुहुर्मुहुर्दोषदृष्टिं कुर्यादित्यर्थः**।

हिंसादिबहुलान् धर्मान् विहाय योगः शरणीकृतः। यदि पुनस्ताननुसरामि तदा पुनरादानाद्वान्ताशिश्वतुल्यता स्यात्। अनिवारणीयं संसारदुःखं चापतेदित्येवं दोषचिन्तनं सदा कुर्यादित्यर्थः। इत्थमनुदिनं वितर्केषु दोषं भावयतो वितर्कजालनिवृत्त्या समाधिलाभेनापरोक्षज्ञानाद्भवत्येव मुक्तिरिति भावः॥ ३३॥

इदानीं क्रमेण वितर्काणां स्वरूपं भेदं प्रकारं कारणं फलं तेषु प्रतिपक्षभावनं चाह—

वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखज्ञानानन्तफला इति प्रतिपक्षभावनम्॥ ३४॥

वितर्का इति। हिंसादय इति स्वरूपम्। कृतकारितानुमोदिता इति भेदः। स्वयं निष्पादिताः कृताः। कुर्वित्याज्ञया समुत्पादिताः कारिताः। अन्यैः क्रियमाणाः सम्यगित्यङ्गीकृता अनुमोदिताः। एतत्त्रैविध्यं, मन्दमतेर्न मया हिंसा कृताऽतो नास्ति मे दोष इति कारितादौ दोषाभावभ्रमनिरासायेति दिक्। लोभक्रोधमोहपूर्वका इति कारणम्। यद्यपि कामपूर्वका इत्यपि वक्तुं युक्तं, तथापि कामस्य क्रोधलोभद्वारैव हिंसादिकं प्रति कारणत्वेनान्यथासिद्धेर्न तथोक्तमिति मन्तव्यम्। लोभश्चर्ममांसादिविषयिणी तृष्णा। क्रोधः कृत्याकृत्यविवेकोन्मूलकोऽनेनापकृतमिति प्रज्वलनात्मकश्चित्तधर्मः। मोहो धर्मो भविष्यतीत्येवं विपर्ययः। एतैः कृताः कारिता अनुमोदिताश्च प्रत्येकं त्रिप्रकारा भवन्तीति नवप्रकाराः। तेऽपि पुनः प्रत्येकं त्रिविधा इत्याह—**मृदुमध्याधिमात्रा** इति। मृदवो मन्दाः, मध्या अल्पव्यवधानाः, अधिमात्रा अतितीव्राः। इत्थं सप्तविंशतिप्रकारा भवन्ति। मृदुमध्याधिमात्रा अपि पुनस्त्रेधा भवन्ति—मृदुमृदवः, मृदुमध्याः, मृदुतीव्राः, मध्यमृदवः, मध्यमध्याः, मध्यतीव्राः, तीव्रमृदवः, तीव्रमध्याः, तीव्रतीव्राश्चेत्येकाशीतिप्रकारा भवन्ति। ते पुनर्नियमविकल्पसमुच्चयादिभेदात् प्राणभृद्भेदाच्चासंख्येया भवन्ति। **दुःखाज्ञानानन्तफला** इति। फलं दुःखं, प्राणिमात्रस्य प्रतिकूलवेदनीयश्चित्तधर्मः। अज्ञानं पञ्चपर्वाऽविद्या। दुःखाज्ञाने अनन्तमपरिच्छिन्नं फलं येषां ते तथोक्ताः। तथा हिंसक[1]स्तावद् बन्धनादिना जीवस्य वीर्यमपाकरोति। ततश्च शस्त्रादिनिपातेनात्यन्तं दुःखयति। ततो जीवितादपि मोचयति। ततः परस्य वीर्यनाशादस्य हिंसकस्यापि कालान्तरे तथैव वीर्यक्षयो भवति। ततो दुःखोत्पत्तिस्ततो मरणानन्तरं महानरकतिर्यक्प्रेतादियोनिष्वज्ञानबहुलेषु प्रवेशो यथाकर्म भवति। किं बहुना—

---

१. घ — **प्रथमं** [**तावत्** पश्चात्] उपलभ्यते, क ख ग — **प्रथमं** नोपलभ्यते।

नाकस्य पृष्ठे सुकृतेऽनुभूत्वेमं लोकं हीनतरं विशन्ति।

इति श्रुत्या त्रयीधर्मवतामपि हीनतरो लोकः प्रतिपाद्यते। मनुना चोक्तम्—

मांसभक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम्।

एतन्मांसस्य मांसत्वे प्रवदन्ति मनीषिणः॥

इति हिंसाघटितत्वेनाशुद्धिमभिप्रेत्यैव। व्यक्तीभविष्यति इदमुपदिष्टात्। इत्थं भावनमेव तेषु प्रतिपक्षभावनमित्याह—**प्रतिपक्षे**ति॥ ३४॥

एवमहिंसापरस्य योगिनस्तत्फलभूतं सिद्धियोगं दर्शयति—

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः॥ ३५॥

अहिंसेति। उक्तप्रतिपक्षभावनेनाहिंसास्थैर्ये सति तत्सन्निधौ अहिंसां भावयतः समीपे वैरत्यागः। सहजविरोधिनामहिनकुलादीनामपि निर्मत्सरतयाऽवस्थितिर्भवतीत्यर्थः॥ ३५॥

सत्यपरस्याह—

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्॥ ३६॥

सत्येति। सत्यभावन[१]रूपस्थैर्ये सति क्रियाफलाश्रयत्वं शब्दोच्चारणरूपक्रियाया उद्देश्यफलस्य आश्रयत्वम्। क्रियाऽत्र धर्माधर्मरूपा। फलं सुखदुःखे क्रियाफले आश्रयतीति तथा। तस्य भावस्तत्त्वम्। क्रियाफले स्वेच्छया जनयतीत्यर्थः। यथा धार्मिको भव, स्वर्गी भवेत्युक्ते तथा भवति। अमोघाऽस्य वाक् भवति। सत्येन वाचः शुद्ध्या मन्त्रादिजपस्य पूर्णत्वादिति भावः। सत्यस्य महत्फलत्वम्, अनृतस्य च निन्दितफलत्वं श्रुतं स्मृतिपुराणवेदेषु[२]—

सत्येन सर्वमाप्नोति सत्ये सर्वं प्रतिष्ठितम्।

सत्येन लभ्यते ह्यात्मा मुच्यते चापि किल्विषात्॥

समूलो वा एष परिशुष्यति योऽनृतमभिवदति।

इत्यादिना॥ ३६॥

अस्तेयपरस्याह—

अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्॥ ३७॥

अस्तेयेति। अस्तेयस्थैर्ये सति सर्वदिक्कालगतानां रत्नानामुपस्थानं सान्निध्यं

---

१. ग घ — **धर्म०** [**रूप०** पश्चात्] उपलभ्यते, क ख — **धर्म०** नोपलभ्यते।

२. क ख ग — **स्मृतिपुराणवेदेषु**, घ — **श्रुतिस्मृत्युपपुराणेषु**।

भवतीत्यर्थः। अशास्त्रीये निरभिलाषत्वाद् अयमस्तेयाभ्यासधर्मबलात् [१]सर्वदा सर्वत्र सर्वरत्नानि प्राप्नोतीति यावत्॥ ३७॥

ब्रह्मचर्यपरस्याह—

ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः॥ ३८॥

ब्रह्मचर्येति। ब्रह्मचर्ये सिद्धे सति वीर्यलाभः। वीर्यस्य निरतिशयसामर्थ्यस्य लाभो भवतीत्यर्थः। वीर्यनिरोधे चेतनाशक्तेरबहिर्भावेन अकुण्ठीभावाच्छरीरेन्द्रियमनःसु सामर्थ्यप्रकर्षमायाति। दृश्यते ह्यूर्ध्वरेतस्कानां तेजोविशेषः। तस्मात्तेषु ब्रह्मचर्य-मत्या[२]वश्यकमिति भावः। अत एव छान्दोग्ये—

य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दति तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु कामचारो भवति।

इत्यादिना ब्रह्मचर्यवतामेव ब्रह्मावाप्तिं सर्वत्राप्रतिहतगतिं यज्ञादिधर्माणां सर्वेषां ब्रह्मचर्यान्तर्भावेन यज्ञादिफलावाप्तिं च प्रतिपादयन्त्या श्रुत्या ब्रह्मचर्यस्यैव परमोत्कर्षः प्रतिपादितः॥ ३८॥

अपरिग्रहपरस्याह—

अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः॥ ३९॥

अपरिग्रहेति। अपरिग्रहस्थैर्ये शरीरान्तपदार्थस्य परिग्रहाभावदार्ढ्ये सति, जन्मकथन्ता[३]सम्बोधः। कथमित्यस्य भावः कथन्ता। जन्मनः कथन्ता जन्मकथन्ता। तस्याः सम्बोधः सम्यग्ज्ञानं जन्मान्तरे कोऽहमासं कथमासं, किं कार्यमकारि, के वा भविष्याम इति जिज्ञासायां भवतीत्यर्थः। दुःखबहुलपूर्वापरजन्मज्ञानेन वैराग्यद्वारा दृढ-मात्मज्ञानं भवति। तेनायमपरिग्रहोऽप्यावश्यक इति भावः॥ ३९॥

उक्ता यमसिद्धयोऽथ नियमसाध्येषु सिद्धियोगेषु प्रथमं बाह्य[४]शौचसिद्धिमाह—

शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः॥ ४०॥

शौचादिति। शौचं भावयतः पुरुषस्य शौचे निमित्तभूतामशुद्धिं कायादिषु

१. क ख ग — **सर्वदा सर्वत्र सर्वरत्नानि**, घ — **सर्वरत्नानि सर्वत्र**।
२. क ग घ — **आवश्यकं**, ख — **आवश्यम्**।
३. क घ — **सम्बोधः**, ख ग — **बोधः**।
४. क ख घ — **शौचसिद्धिं**, ग — **शौचम्**।

पश्यतो भवति जुगुप्सा घृणा। अशुचिरयं कायः, सर्वथा नात्राहङ्कारः कर्त्तव्य[१] इत्यमुनैव हेतुना परैश्च कायवद्भिः स्त्र्यादिभिरसंसर्गः असम्बन्धो भवतीत्यर्थः॥ ४०॥

[२]आन्तरशौचस्य फलमाह—

सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च॥ ४१॥

सत्त्वेति। भवन्तीति शेषः। आन्तरशौचादित्यनुवर्त्तते। मैत्र्यादिभावनारूपाभ्यन्तरशौचात् सत्त्वस्य मनसः शुद्धिर्नैर्मल्यम्। ततः सौमनस्यम्। अक्षोभः। ततः ऐकाग्र्यम्। एकस्मिन् विषये परमात्मनि स्थिरता। तत इन्द्रियजयो विषयेभ्यः पराङ्मुखता। तत आत्मदर्शने योग्यत्वं सामर्थ्यमित्येवंक्रमेण सत्त्वशुद्ध्यादयः शौचाभ्यासवतो भवन्तीत्यर्थः॥ ४१॥

सन्तोषाभ्याससाध्यसिद्धिमाह—

सन्तोषादनुत्तमः सुखलाभः॥ ४२॥

सन्तोषादिति। यदृच्छालाभेनैव तुष्टिरूपात् सन्तोषान्निवृत्ततृष्णस्य पुरुषस्यानुत्तमः नास्ति उत्तमो यस्मादित्यनुत्तमो [३]विषयसुखेनानुपमेयसुखलाभः सुखस्य प्राप्तिर्भवतीत्यर्थः। तदुक्तम्—

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।
तृष्णाक्षयसुखस्यैते कलां नार्हन्ति षोडशीम्॥

इति॥ ४२॥

तपःसाध्यां सिद्धिमाह—

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः॥ ४३॥

कायेति। तपसः तपोऽभ्यसाद्, अशुद्धिक्षयाद् यथेष्टगत्यादिप्रतिबन्धक[४]पापमलादेर्नाशात्, कायेन्द्रियसिद्धिः कायेन्द्रियाणाम् अल्पत्वमहत्त्वदूरार्थदर्शित्वादिसामर्थ्यरूपा सिद्धिर्भवतीत्यर्थः। कायस्यातिलाघवेन दूरदेशगमनादिकं धर्मविशेषायत्तं महत्त्वेनान्यैरबाध्यत्वादि च भवति। इन्द्रियाणां दूरार्थसूक्ष्मार्थव्यवहितानेकार्थग्राहिता भवतीति यावत्। एतेन परमाणुपरममहत्त्वान्तोऽस्य वशीकार इति सूत्रेणोक्त-

१. क ख — कर्त्तव्यः, ग — उचितः, घ — कर्त्तव्यम्।
२. क ख घ — आन्तर०, ग — आभ्यन्तर०।
३. घ — बाह्य० [विषय० प्राक्] उपलभ्यते, क ख ग — बाह्य० नोपलभ्यते।
४. क ख घ — पापमलादेः, ग — पापरूपाशुद्धेर्मलस्य।

सिद्धियोगस्या[१]त्रान्तर्भावो ज्ञातव्यः। हठयोगादिफलत्वं त्वेतस्य नान्तरीयकतयेति भावः। एताश्च सिद्धयो यद्यपि औषधादिभिरपि सम्भवन्ति। वक्ष्यति च सूत्रकार[२]श्चतुर्थचरणे— **जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय** इति, तथाप्यौषधादिकमपि निष्पापस्यैव फलति। पापनिवृत्तौ च मुख्यो हेतुस्तप एव भवति। तथैव पुराणादिषु श्रवणात्। अतोऽत्र तपःफलत्वेनैवोक्ता इति भावः। अत्र समाधिफलत्वं त्वेतासां नान्तरीयकतया मन्तव्य-मिति सङ्क्षेपः ॥ ४३ ॥

स्वाध्यायाभ्याससाध्यां सिद्धिमाह—

स्वाध्यायादिष्टदेवतासम्प्रयोगः ॥ ४४ ॥

स्वाध्यायादिति। वेदान्तोपनिषदाद्यावृत्तिरूपात् सगुणमन्त्रजपस्तोत्रपाठादि-रूपाच्च स्वाध्यायादिष्टदेवतासम्प्रयोगः दर्शनप्रतिबन्धकदुरितनिवृत्यादिना साक्षात्कारो भवतीत्यर्थः। सम्भाषणानुग्रहादीनि च भाष्ये कण्ठरवेणोक्तानि। देवता ऋषयः साध्याश्च स्वाध्यायशीलस्य दर्शनं गच्छति कार्ये चास्य वर्त्तन्त इति दिक्। देवतेत्युपलक्षणम्। इष्टानामभिमतानां देवानां ऋषीणां सिद्धानां यक्षाणां गन्धर्वाणामेवमन्येषां महानुभावानां सम्प्रयोगे दर्शनं भवति। तेभ्यः स्वान् पुनातीत्यर्थः। ते दर्शनप्रतिबन्धकपापनिवृत्त्या दर्शनमायान्ति, कार्ये चानुकूला भवन्तीत्यर्थः ॥ ४४ ॥

ईश्वरप्रणिधानसाध्यसिद्धिमाह—

समाधिसिद्धिरीश्वरप्रणिधानात् ॥ ४५ ॥

समाधीति। ईश्वरप्रणिधानं पूर्वं व्याख्यातम्। समाधेरुक्तलक्षणस्य सिद्धिरप्रति-बन्धेनानायासेन तत्कृपया गुर्वादिद्वारा च दृढा प्राप्तिर्भवतीत्यर्थः। एतच्च फलं प्रेमभक्तेः स्वतः पुरुषार्थरूपाया नान्तरीयकं यथा फलार्थिनो वृक्षादिसान्निध्येच्छायां गन्धादि-रित्यन्यत्र विस्तरः ॥ ४५ ॥

इतः परं सकलरोगादिनिवृत्तिद्वारा हठयोगस्योपायमासनमाह—

स्थिरसुखमासनम् ॥ ४६ ॥

स्थिरेति। स्थिरं निश्चलं सुखकरं च यत्तदासनम्। आस्यते आस्ते वाऽनेन प्रकारेणेत्यासनमित्यर्थः। तच्च पद्म-सिद्ध-भद्र-वीर-स्वस्तिक-सिंह-दण्ड-सोपाश्रय-पर्यङ्क-मयूर-कुक्कुट-उत्तानकुक्कुट-पश्चिमतान-मत्स्येन्द्रपीठ-चक्र-गोमुख-

---

१. क ख ग — **अत्र**, घ — **अत्रैव**।

२. क ख घ — **चतुर्थचरणे**, ग — **चतुर्थे**।

कूर्म-धनु-मृगस्वस्तिक-अर्द्धचन्द्र-अञ्जलिक-पीठ-वज्र-मुक्त-चन्द्र-अर्द्धप्रसारित-शव-कपाल-गरुड-अर्द्धासन-कमल-क्रौञ्चनिषदन-हस्तिनिषदन-उष्ट्रनिषदन-कपिनिषदन-योगासन-योन्यासन-समस्थान-आदिभेदेन चतुराशीतिप्रकारम्। एतेषां लक्षणानि योगप्रदीपादावुक्तानि। तत्र पद्मासनस्य—

अङ्गुष्ठौ सन्निबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण च।
ऊर्वोरुपरि विपेन्द्र कृत्वा पादतले उभे॥
पद्मासनं भवेदेतत् सर्वेषामेव पूजितम्।
उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः॥
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा समौ दृशौ।
नासाग्रे विन्यसेद्राजन् दन्तमूलं तु जिह्वया॥
उन्नम्य चिबुकं वक्षस्युत्थाप्य पवनं शनैरिति वा॥ १॥

अथ सिद्धासनस्य—

योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसे-
न्मेढ्रे पादमथैकमेकहृदयः कृत्वा समं विग्रहम्॥
स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्येद् भ्रुवोरन्तरम्।
त्वेतन्मोक्षकपाटभेदनकरं सिद्धासनं प्रोच्यते॥
दक्षिणोत्तरगुल्फेन सीविनीं पीडयेच्छिराम्।
अधस्तादण्डयोः सूक्ष्मां सव्योपरि च दक्षिणाम्॥
जङ्घोर्वोरन्तरं गार्गि नश्छिद्रं बन्धयेद् दृढम्।
समग्रीवशिरस्कन्धः समपृष्ठसहोदरः।
नेत्राभ्यां दक्षिणं गुल्फं लोकयन्नुपरि स्थितम्।
एतत् सिद्धासनं नाम शीघ्रसिद्धिविधायकमिति वा॥

एतदेव, योगासनपदेनोच्यते श्रुतिषु। अनायासेन योगसाधनत्वात्॥ २॥

अथ भद्रस्य—

गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत्।
पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलः॥
भद्रासनं भवेदेतत् सर्वव्याधिविषापहम्॥ ३॥

अथ वीरासनस्य

एकं पादमथैकस्मिन् विन्यस्योरुणि सत्तमः।
इतरस्मिँस्तथा चोरुं वीरासनमुदाहृतम्॥ ४॥

अथ स्वस्तिकस्य

जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे।
ऋजुकायः सुखासीनः स्वस्तिकं तत् प्रचक्षते॥
सीवन्या आत्मनः पार्श्वे गुल्फौ निक्षिप्य पादयोः।
सव्ये दक्षिणगुल्फं तु दक्षिणे दक्षिणोत्तरम्॥
एतत् स्वस्तिकमाख्यातं सर्वपापप्रणाशनमिति च॥५॥

अथ सिंहासनस्य

गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत्।
दक्षिणं सव्यगुल्फेन दक्षिणेन तथोत्तरम्॥
हस्तौ जानूपरिस्थाप्य स्वाङ्गुलीः सम्प्रसार्य च।
व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः॥
सिंहासनं भवेदेतत् पूजितं योगिभिः सदा॥ ६॥

अथ दण्डासनस्य

सुखप्रसारितौ पादौ सुश्लिष्टौ भुवि संस्थितौ।
उपवेश्यार्द्धकायं तु दण्डासनमिति स्मृतम्॥ ७॥

अथ सोपाश्रयस्य

पादौ द्वौ द्विगुणीकृत्य तिर्यगूर्ध्वं यथाक्रमम्।
न्यसेत् पाणी योगपट्टे स्थितः श्लिष्टाङ्गुली नखौ॥
योगपट्टासनं ह्येतत् सर्वेषामपि पूजितम्॥ ८॥

अथ पर्यङ्कस्य

जानुप्रसारितं बाह्वोः शयनं पृष्ठयोगतः।

केचित्तु

पर्यङ्कं योगपट्टेन बध्नीयात् पृष्ठयोगतः।
आकुञ्च्य जानुनी सम्यक् पादं कृत्वा तु दक्षिणम्॥
बाह्यतो वामजङ्घायां वामसव्यादधो बहिः।
किञ्चिद्विनिर्गतं कृत्वा सन्तिष्ठेन्नाभ्य वै कटिम्॥
पर्यङ्कमिति व्याख्यातमासनं योगसिद्धिदं इति स्मृतेः।
पर्यङ्कासनं योगपट्टासनं चैकमेवेति वदन्ति॥ ९॥

अथ मयूरस्य

अवष्टभ्य धरां सम्यक् तलाभ्यां करयोर्द्वयोः।

हस्तयोः कूर्परे चापि स्थापयेन्नाभिपार्श्वयोः ॥
समुन्नतशिरापादौ दण्डवद् व्योम्नि संस्थितः ।
मयूरासनमेतद्धि सर्वपापप्रणाशनम् ॥
सर्वे चाभ्यन्तरा रोगा विनश्यन्ति विषाणि च ॥ १० ॥

अथ कुक्कुटस्य

पद्मासनं तु संयोज्य जानूर्वोरन्तरे करौ ।
निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनम् ॥ ११ ॥

अथोत्तानकुक्कुटस्य

कुक्कुटासनबन्धस्थो दोर्भ्यां सम्बद्ध्य कन्धराम् ।
भवेत् कूर्मवदुत्तानमेतदुत्तानकुक्कुटम् ॥
उत्तानकूर्मकमिति केचित् ॥ १२ ॥

अथ पश्चिमतानस्य

प्रसार्य पादौ भुवि दण्डरूपौ द्वाभ्यां पादद्वितयं गृहीत्वा ।
जानूपरिन्यस्तललाटदेशोऽभ्यसेदिदं पश्चिमतानमाहुः ॥
उदयं जठरानलस्य कुर्यादुदरे कार्श्यमरोगितां च पुंसाम् ॥ १३ ॥

अथ मत्स्येन्द्रपीठस्य

वामोरुमूलार्पितदक्षपादं जान्वोर्बहिर्वेष्टितदक्षदोष्णा ।
प्रगृह्य तिष्ठेत् परिवर्त्तिताङ्गः श्रीमत्स्यनाथोदितमासनं स्यात् ॥
मत्स्येन्द्रपीठं जठरप्रवृद्धिं प्रचण्डरुङ्मण्डलखण्डनास्त्रम् ।
अभ्यासतः[१] कुण्डलीप्रबोधं दण्डे स्थिरत्वं प्रददाति पुंसाम् ॥ १४ ॥

अथ चक्रासनस्य

शवासनस्थौ द्वौ पादौ कुर्यान्[२]मस्तकतः परौ ।
व्युत्क्रमेण ततः शीघ्रमेतत् सर्वस्य साधनम् ॥
चक्रासनं गुल्मप्लीहवातरोगादिनाशनम् ॥ १५ ॥

अथ गोमुखस्य

सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे निवेशयेत् ।
दक्षिणेऽपि तथा सव्ये गोमुखं गोमुखं यथा[३] ॥ १६ ॥

---

१. क ख घ — अभ्यासतः, ग — अभ्यासतम् ।

२. क ख ग — मस्तकतः, घ — मस्तकेऽतः ।

३. क ख घ — यथा, ग — तथा ।

अथ कूर्मस्य

गुदं नियम्य गुल्फाभ्यां व्युत्क्रमेण समाहितः।
कूर्मासनं भवेदेतदिति योगविदो विदुः॥ १७॥

अथ धनुषः

पादाङ्गुष्ठौ च पाणिभ्यां गृहीत्वा श्रवणावधिः।
धनुराकर्षणं कृत्वा धनुरासनमीरितम् इति॥ १८॥

अथ मृगस्वस्तिकस्य

स्थातव्ये भूतले पादावासनस्थेन योगिना।
दक्षिणं वामभागे तु वामपादं तु दक्षिणे॥
अन्योन्याभिमुखं कृत्वा मृगशीर्षकरद्वयम्।
योगसंसिद्धि[1]हेतुस्तु मृगस्वस्तिकमुच्यते॥ १९॥

अथार्द्धचन्द्रस्य

तलपादेन वामेन जानुना दक्षिणेन च।
स्थित्वा हस्तपुटं कार्यमर्द्धचन्द्रासनं विदुः॥ २०॥

अथाञ्जलिकस्य

भुवि स्थित्वा तु जानुभ्यां तावन्मात्रेण योगिना।
हृदि हस्तपुटं कार्यं ज्ञेयमञ्जलिकासनम्॥ २१॥

अथ पीठासनस्य

आसनस्थेन पादौ द्वौ न्यस्य तौ भूतले समौ।
जानुद्वये हस्ततलं कृत्वा पीठासनं भवेत्॥ २२॥

अथ वज्रस्य

सव्येन गुल्फेन गुदं निपीड्य सव्येतरेणैव निरुध्य सन्धिम्।
सव्ये करे न्यस्त[2]करेतरस्मिन् शिखां समालोकय पावकस्य[3]॥
एतद्वज्रासनं प्राहुर्गुप्तासनमथो विदुः॥ २३॥

अथ मुक्तस्य

मेढ्रादुपरि विन्यस्य सव्यं गुल्फं तथोपरि।

---

१. क ख ग — हेतुः, घ — हेतोः।

२. क ख घ — करेतरस्मिन्, ग — करेतरः सन्।

३. क ख घ — पावकस्य, ग — पाचकस्य।

गुल्फान्तरं तु विन्यस्य मुक्तासनमिदं भवेत्।
एतद्द्वयं सिद्धासनस्यैवाऽऽन्तरभेदः ॥ २४॥

अथ चन्द्रार्द्धस्य

तद्वत्पादद्वयं कृत्वा सुतलान्योन्यसंस्थितम्।
चन्द्रार्द्धमेवं कथितं योगसाधनमुत्तमम्॥
तद्वत् पद्मासनवत् द्विगुणपादद्वयं कृत्वेत्यर्थः ॥ २५ ॥

अथ प्रसारितस्य

तद्वत् पादद्वयं कुर्यात्तन्मुखं तु प्रणामितम्।
पृष्ठतोऽप्युपधानस्थं सम्प्रसार्य करद्वयम्॥
प्रसारितासनं त्वेतत् कथितं योगसिद्धिदम्।
अत्रापि तद्वत् पद्मासनवदित्यर्थः ॥ २६ ॥

अथ शवस्य

उत्तानं शववद् भूमौ शवासनमिदं स्मृतम्[१]।
शवासनं श्रान्तिहरं चित्तविश्रान्तिसाधनम्॥ २७॥

अथ कपालासनस्य

भूमौ स्वमस्तकं स्थाप्य हस्तयोः कूर्परे तथा।
पादौ खे दण्डवत् कुर्यात् कपालासनमीरितम्॥ २८ ॥

अथ गरुडासनस्य

गरुडस्येवावस्थितिः ॥ २९ ॥

अथार्द्धासनस्य

एकपादमथैकस्मिन् विन्यस्योरुणि सत्तमः।
आसीतार्द्धासनमिदं योगसाधनमुत्तमम्॥ ३० ॥

अथ कमलासनस्य

दक्षिणोरुगतं वामपादं वामोरुसंस्थितम्।
दक्षिणं तु समाकृष्य तज्जङ्घे तु परस्परम्॥
एतद्धि कमलं नाम विधेरासनमुत्तमम्।
अत एव पद्मासनाद् भेदः। कराङ्गुष्ठयोर्योगानपेक्षणात्॥ ३१॥

---

१. क ख घ — स्मृतं, ग — भवेत्।

अथ क्रौञ्चनिषदनम्

क्रौञ्चस्येवावस्थितिः ॥ ३२ ॥

एवं हस्तिनिषदनादीनि हस्त्यादीनां निषण्णानां संस्थानदर्शनात् प्रत्येतव्यानि, सम्प्रदायाच्चाऽवगन्तव्यानि। प्रचरदवस्थेषु ग्रन्थेषु तेषामनुपलब्धेः ॥ ३३ ॥ ३४ ॥ ३५ ॥

अथ योगासनस्य

दक्ष[1]जानोः सव्यगुल्फं सव्ये दक्षिणमेव च।
कृत्वा समोपविष्टस्य भ्रूमध्याद् दृष्टिरु[2]च्यते ॥
वैपरीत्येन वा योगाद् योगसाधनमुत्तमम्।
योगासनमिदं प्रोक्तं सर्वयोगिनिषेवितम् ॥ ३६ ॥

अथ योन्यासनस्य

गुह्यस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसेत्।
सीवन्यामथ पादमेकहृदयः कृत्वा समं विग्रहम् ॥
जानुन्यस्तकराग्रदृष्टिरचलः स्याद् योनिमुद्रान्वितः।
इदमपि सिद्धासनस्यैवाऽवान्तरभेदः ॥ ३७ ॥

अथ समसंस्थानस्य

बाह्याग्रप्रपदाभ्यां द्वयोराकुञ्चितयोरन्योन्यसंपीडनम् ॥ ३८ ॥

एवं येन संस्थानविशेषणावस्थितस्य स्थैर्यं सुखं च सिद्ध्यति तदासनं स्थिरसुखम्। तेषु सर्वेषु सिद्धं पद्मं भद्रं स्वस्तिकं[3] चेति चतुष्टयं सारभूतमुक्तममृतबिन्दूपनिषदि—

सिद्धं पद्मं स्वस्तिकं वा भद्रासनमथापि वा।
बद्ध्वा योगासनं सम्यगुत्तराभिमुखः स्थितः ॥ इति

पद्मसिद्धयोर्झटिति कुम्भकसाधकत्वाद् भद्रस्य च उदरलाघवद्वारा व्याधिनाशकत्वात् सिंहस्याधिभौतिकोपद्रवनिवारकत्वात्। अत एव हठदीपिकायान्तु स्वस्तिकं विहाय सिंहासनमादाय चतुष्टयमुक्तम्। यथा—

चतुराशीत्यासनानि शिवेन कथितानि वै।
तेभ्यश्चतुष्कमादाय सारभूतं ब्रवीम्यहम् ॥

---

१. क — जानोः, ख ग घ — जानौ।
२. क ख घ — उच्यते, ग — उत्तमा।
३. क ख ग — स्वस्तिकं, घ — सिंहम्।

सिद्धं पद्मं तथा भद्रं सिंहं चेति चतुष्टयम् इति।
एतेष्वपि सिद्धं पद्मं चेति द्वयं श्रेष्ठम्।

तदुक्तं गोरक्षेण—

आसनेभ्यः समस्तेभ्यो द्वयमेतदुदाहृतम्।
एकं सिद्धासनं प्रोक्तं द्वितीयं पद्मासनमिति, संक्षेपः ॥ ४६ ॥

आसनस्थैर्यस्योपायमाह—

प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥ ४७ ॥

प्रयत्नेति। प्रयत्नः स्वाभाविकः शरीरधारकश्चलत्वाद् यादृच्छिकासनहेतुतयोपदेष्टव्ययोगाङ्गासनविघातकस्तस्यशैथिल्यमुपरमस्तेन। तथा अनन्ते पृथिवीधारिणि स्थिरतरे शेषनागे समापत्त्या धारणया चित्तस्य तदात्मताप्राप्तिरूपापत्त्या चासनं स्थिरं भवतीत्यर्थः। [१]एतच्चानन्तसमापत्तितोऽदृष्टविशेषवशाद्भावनापरिपाकेन तदानन्ताऽनुग्रहाद्वेत्यन्यदेतत् ॥४७॥

आसनजयसाध्यां सिद्धिमाह—

ततो द्वन्द्वानभिघातः ॥ ४८ ॥

तत इति। तत आसनजयाद् द्वन्द्वानभिघातः। द्वन्द्वैः शीतोष्णादिभिरपीडनं भवतीत्यर्थः ॥ ४८ ॥

आसनसाध्यप्राणायामाख्यहठयोगस्य लक्षणमाह—

तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ ४९ ॥

तस्मिन्निति। तस्मिन् सति आसनस्थैर्ये सति श्वासप्रश्वासयोः बाह्यवायोराचमनं श्वासः, कौष्ठ्यस्य वायोर्निःसारणं प्रश्वासस्तयोर्गतिविच्छेदः शास्त्रोक्तरीत्या स्वाभाविकगतेः प्रतिरोधः[२] प्राणायामसंज्ञको योग इत्यर्थः। स चायं रेचकपूरककुम्भकेष्वनुगत इति वक्ष्यमाणप्राणायामसामान्यलक्षणमेतत्। तथाहि—यत्र बाह्यो वायुराचम्यान्तर्धार्यते पूरके तत्रास्ति श्वासप्रश्वासयोर्गतिविच्छेदः। यत्रापि कौष्ठ्यो वायुर्विरेच्य बहिर्धार्यते रेचके तत्राप्यस्ति द्वयोर्गतिप्रतिषेधः। एवं कुम्भकेऽप्युभयाभावः सुतराम्। अतः

प्राणायामस्त्रिधा प्रोक्तः पूरकुम्भकरेचकैः।

इति स्मृतेश्च त्रयाणां प्रत्येकं प्राणायामत्त्वं, न मिलितानामेव। क्वचित्तन्त्रादौ

---

१. क ख — **एतच्चानन्तसमापत्तितोऽदृष्टविशेषवशाद्भावनापरिपाकेन तदानन्ताऽनुग्रहाद्वेत्यन्यदेतत्**, ग घ — **एतच्चानन्तानुग्रहाद्वाऽदृष्टविशेषवशात् भावनापरिपाकेन तदावेशाद्वेत्यन्यदेतत्।**

२. क ख — **प्रतिरोधः**, ग घ — **प्रतिषेधः।**

मिलितानामेकप्राणायामत्वोक्तिस्तु प्रथमभूमिकायां कस्मिँश्चित् सहाऽनुष्ठाननियमाऽभि-प्रायेणेत्यनुपदमेव स्फुटीभविष्यति॥ ४९॥

सामान्यलक्षणमुक्त्वा लक्ष्यं प्राणायामत्रयं विभजते—

बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः॥ ५०॥

बाह्येति। स तु प्राणायामो बाह्यवृत्तिः रेचकः। आभ्यन्तरवृत्तिपूरकः। स्तम्भ-वृत्तिः स्तभ्यते पूरितकुम्भकवन्निश्चलतया विधारकप्रयत्नेन अन्तर्बहिरेव वाऽवस्थाप्यते इति कुम्भकः। इत्थं रेचकपूरककुम्भकभेदात् त्रिविधः। सोऽयं त्रिविधः प्राणायामो देशकालसंख्याभिः परिदृष्टो निर्णीतो[१] नासाद्वादशान्तादिदेशेन षट्त्रिंशन्[२]मात्रादिकालेन एतावद्वारं कृतमिति संख्यया च नियमित इति यावत्। एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातो भवतीत्येतज्[३]ज्ञापनाय संख्याग्रहणम्। उद्घातश्च नाभिमूलात् प्रेरितस्य शिरस्यभिहननम्। स खल्वयं दिवसपक्षमासादिक्रमेणाभ्यस्तो दीर्घदेशकालव्यापितयैव दीर्घो[४] दुर्लक्ष्यगततया च सूक्ष्मो दीर्घसूक्ष्मसंज्ञको भवतीत्यर्थः। अत्र—

षट्त्रिंशदङ्गुलं हंसः प्रयाणं कुरुते बहिः।
सव्यापसव्यमार्गेण तेन प्राणोऽभिधीयते॥
प्राणो देहगतो वायुरायामस्तन्निबन्धनम्।

इति स्मृतेः प्राणस्यायामः प्राणायाम इति योगादरेण रेचकपूरककुम्भकानां त्रयाणामपि विभक्ततयोक्तिः। तत्र रेचकस्य लक्षणं स्कान्दे—

नासासंपुटमङ्गुल्या पीडयित्वा परेण तु।
उदराद्रेचयेद्वायुं रेचनाद्रेचकः स्मृतः॥

इति। उदराद्रेचनं

शनैः शनैर्धारया निःसारणम्।

बहिर्यद्रेचनं वायोरुदराद्रेचकः शनैः।
भानुदेवतयाऽजस्रं चान्द्रदैवतयाऽथवा॥

इति स्मृतेः।

---

१. ग घ — **नियमितः** (**निर्णीतः** पश्चात्) उपलभ्यते, क ख — **नियमितः** नोपलभ्यते।

२. क ख घ — **मात्रादि०**, ग — **मात्रा०**।

३. क घ — **ज्ञापनाय**, ख ग — **ज्ञानाय**।

४. क ख — **दीर्घो दुर्लक्ष्यगततया**, ग — **दीर्घो लक्ष्यं गततया**, घ — **दीर्घसूक्ष्मं गततया**।

अथ पूरकस्य—

बाह्ये स्थितं नासापुटेन वायुमाकृष्य तेनैव शनैः समन्तात्।
नाडीश्च सर्वाः परिपूरयेद्यः स पूरको नाम महानिरोधः॥

इति। अत एव—

पूरणात् पूरकः प्रोक्त इति योगोऽथ देवले।
पूरणं हृदिवत् प्रोक्तं देहे सर्वत्र योगिभिः॥

तत्र कुम्भकस्तुद्विधः—सहितः केवलश्च। तत्र सहितकुम्भकस्य—

न मुञ्चति न गृह्णाति वायुमन्तर्बहिःस्थितम्।
आपूर्य कुम्भवत्तिष्ठेद् केवलः स तु कुम्भकः॥
आरेच्यापूर्य यत् कुर्यात् स वै सहितकुम्भकः।

इत्यादि। अयमेवानेन सूत्रेणोक्तः। देशकालसंख्याभिः परिदृष्ट इत्यनेन रेचकादिदेशादिपरिच्छिन्नत्वकथनात्। अतोऽयं रेचकपूरकाभ्यां सान्तरितो[1] बाह्याभ्यन्तररूपेण रेचकपूरकदेशेन विषयेण युक्तोऽभ्यासबाहुल्यं विनैव जायमान-सामान्य एवेति तृतीयस्यैतस्य अपरं रूपं केवलकुम्भकम्॥५०॥

प्राणायामस्य चतुर्थं विशेषमाह—

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः॥५१॥

बाह्येति। बाह्यं चाभ्यन्तरं च बाह्याभ्यन्तरे विषयो [2]देशो ययोस्तथाभूतौ बाह्याभ्यन्तरवृत्ती पूर्वसूत्रोक्तौ रेचकपूरकौ तयोर्विषयपदस्वारस्यात्। तद्विषययोश्चाक्षेपी अतिक्रमी। तावतिक्रम्य त्यक्त्वा स्वयमेव वर्त्तते इति यावत्। एवम्भूतो यः प्राणायामः स चतुर्थ इत्यर्थः। अस्य च लक्षणं याज्ञवल्क्य आह—

रेचकं पूरकं त्यक्त्वा यत् सुखं वायुधारणम्।
प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः॥

इत्यादि। यद्यप्ययं तृतीयस्यैवावान्तरभेदस्तथापि देशकालाद्यवधारणकृत-दीर्घसूक्ष्मत्वरूपस्य त्रितयसाधारणधर्मस्याभावाच्चतुर्थ इति पृथगुक्तः।

ननु

---

१. क ख घ — **सान्तरितः**, ग — **अन्तरितः**।
२. क ख — **विषयो देशः**, ग घ — **विषयौ देशौ**।

केवलं सहितं वापि कुम्भकं नित्यमभ्यसेत्।
कुम्भके नित्ययुक्तस्य दुर्लभं न हि विद्यते॥

इत्यादिना कुम्भकस्य नित्यमभ्यसनीयत्वोक्तेर्नित्याभ्यासकाले कालसंख्यादि-परिच्छिन्नत्वमस्याव्याहतम्। तत् कथं पृथगुक्तिरिति चेत् सत्यम्।

यावद्वा शक्यते तावद्धारणं जपसंयुतम्।
धारितं विसृजेत् पश्चात् प्राणं गत्या तु सूक्ष्मया॥
शनैः शनैरेष पन्थाः प्राणायामस्य सिद्धये।

इति वसिष्ठसंहितायां कालाद्यऽ[1]नवच्छिन्नतयैव मुख्याधिकारिणस्तदभ्यास उक्तः। यस्य तु केवलकुम्भके नास्त्येवाभ्यासस्तस्य तु सहिताभ्यास एवोक्तः। यावत् केवलयुक्तः स्यात् तावद् सहितमभ्यसेदिति। अतो देशकालादिविषयानपेक्षणात् तेभ्यो विलक्षणोऽयं पृथगेव भवतीति भावः। अस्यैव वक्ष्यमाणसहितभेदैः साध्यस्य फल-वैभवः पुराणेषु ध्रुवच्यवनविश्वामित्रागस्त्यसंवर्त्तदुर्वासाजडभरतदत्तात्रेयप्रभृतीनां श्रूयते। यथा—

वाक्सिद्धिः कामचारित्वं दूरदृष्टिस्तथैव च।
दूरश्रुतिः सूक्ष्मदृष्टिः परदेहे प्रवेशनम्॥
विण्मूत्रलेपने स्वर्णम[2]दृष्टकरणं तथा।
भवन्त्येतानि महतां खेचरत्वं तु[3] योगिनाम्॥
दुःखदोषक्षुधानिद्राजरामृत्युविवर्जनम्।
सृष्टिसंहारकर्तृत्वमीश्वरेण समानता॥
परचित्तप्रवेशेन ज्ञानशक्तिप्रदातृता।
सर्वज्ञता सर्वशक्तिः सर्वभूताद्यबाध्यता॥

इति। तृतीयपादोक्तसंयमफलमप्येतत्सिद्ध्यैव भवतीति ज्ञातव्यम्। एतदुत्पत्ति-क्रममाह भाष्यकारः—

देशकालसंख्याभिर्बाह्यविषयपरिदृष्ट आक्षिप्तः। तथाऽऽभ्यन्तरपरिदृष्ट-विषय आक्षिप्तः। उभयथा दीर्घसूक्ष्मतत्पूर्वका भूमिजयात् क्रमेणोभयोर्गत्य-भावश्चतुर्थः प्राणायाम इति।

---

१. क ख ग — **अनवच्छिन्नतया**, घ — **अनवच्छिन्नस्य**।
२. क ख — **अदृष्ट०**, ग घ — **अदृश्य०**।
३. क ख — **तु**, ग घ — **च**

अस्यार्थः आदौ कथितदेशकालसंख्याभिर्बाह्यो विषयो[१] रेचकः परिदृष्टोऽभ्यस्तः। पश्चाद्देशादिभिः सहैवाक्षिप्तोऽतिक्रामितो भवतीति शेषः। तथाऽऽभ्यन्तरविषय इति। आभ्यन्तरो विषयः पूरकोऽभ्यस्तः पश्चाद्देशादिभिः सहातिक्रामितो भवतीत्यर्थः। तच्चाक्षिप्तद्वयमुभयथा दीर्घसूक्ष्मो द्विविधो दीर्घसूक्ष्मश्चिरकालं देशादिभिरभ्यस्तौ रेचकपूरकाविति यावत्। तत्पूर्वकः तदुभयाक्षेपपूर्वकस्तदुभयामाक्षिपन्निति यावत्। स्वेदकम्परोमाञ्चोत्थानरूपाणां भूमिकानां मृदुमध्यमोत्तम[२]भेदेन तृतीयकुम्भकेषु यथाक्रमं जायमानानां जपाद् यथोक्तनियमपरिपालनेना[३]ङ्गित्वबलाच्चोत्पद्यमान एवम्भूत उभयोः श्वासप्रश्वासयोर्गतिविच्छेदश्चतुर्थः प्राणायाम इत्यर्थः। एतेन सहितकुम्भकाभ्यास एवास्याऽ[४]साधारणम्।

यदा नाडीविशुद्धिः स्याद्योगिनस्तत्त्वदर्शिनः।
तदा विध्वस्तदोषस्य भवेत् केवलसम्भवः॥

इति स्मृतेरिति भावः। सहितस्य च सूर्यभेदनाद्यवान्तरभेदा हेतवः। ते चोक्ता हठयोगे—

सूर्यभेदनमुज्जायी तथा सीत्कारशीतली।
भस्त्रिकाभ्रमरीमूर्च्छासहितं वाऽथ कुम्भकाः॥

इति। सहितं वा उक्तप्रकारं मुख्यं सहितं चेत्यर्थः। अन्यथा पूरकरेचकान्वितत्वेन तेषामपि सहितावान्तरभेदत्वात् सहितं वेति विकल्पानुपपत्तिः। एतेषां लक्षणानि तत्रैवोक्तानि। तत्र सूर्यभेदनस्य यथा—

आसने सुखदे योगी बद्धवज्रासनस्ततः।
दक्षनासां समाकृष्य बहिःस्थं पवनं शनैः॥
आकेशाग्रं नखाग्रं च शिरोऽग्राऽवधिकं ततः।
शनैः शनैः सव्यनासा रेचयेत् पवनं सुधीः॥
कपालशोधनं वातदोषघ्नं कृमिदोषहृत्।
पुनः पुनरिदं कुर्यात् सूर्यभेदनमुत्तमम्॥

---

१. क ख घ — **विषयः** उपलभ्यते, ग — **विषयः** नोपलभ्यते।
२. क ख घ — **भेदेन तृतीय०** उपलभ्यते, ग — **भेदेन तृतीय०** नोपलभ्यते।
३. क घ — **अङ्गित्व०**, ख ग — **आरोगित्व०**।
४. घ — **कारणं** [**असाधारणं** पश्चात्] उपलभ्यते, क ख ग — **कारणं** नोपलभ्यते।

अथोज्जायिनो यथा—

मुखं संयम्य नाडीभ्यामाकृष्य पवनं पुनः।
अन्तर्लगति[१] हृत्कण्ठादधृदयावधि सस्वनः॥
पूर्ववत् कुम्भयेत् प्राणं रेचयेदिडया ततः।
श्लेष्मदोषहरं कण्ठे जाठरानलवर्द्धनम्।
उदरादिप्रदोषाणां विलापनमनुत्तमम्।
गच्छता तिष्ठता कार्यमुज्जाय्याख्यं च कुम्भकम्॥ इति।

अथ सीत्कारस्य—

सीत्कां कुर्यात्तथा वक्त्रे घ्राणेनैव विसर्जयेत्।
एवमभ्यासयोगेन कामदेवो द्वितीयकः॥
योगिनीचक्रसंसेव्यः सृष्टिसंहारकारकः।
न क्षुधा न तृषा निद्रा तन्द्राऽऽलस्यं न जायते॥
भवेत् स्वच्छन्ददेहस्तु सर्वोपद्रववर्जितः।
अनेन विधिना यस्तु योगीन्द्रो भूमिमण्डले॥
रसनातालुयोगेन यः प्राणं सततं पिबेत्।
अब्दार्धेन भवेत्तस्य सर्वरोगपरिक्षयः॥ इति।

अथ शीतल्याः—

जिह्वया वायुमाकृष्य पूर्ववत् कुम्भकादनु।
शनैस्तु घ्राणरन्ध्राभ्यां रेचयेदनिलं सुधीः॥
गुल्मप्लीहोदरं वापि वातपित्तं क्षुधा[२] तृषा।
विषाणि शीतली नाम कुम्भको विनिहन्ति चेति॥

अथ भ्रमर्याः—

वेगोद्घोषं पूरकं भृङ्गनादं भृङ्गीनादं रेचकं मन्दमन्दम्।
योगीन्द्राणां नित्यमभ्यासयोगाच्चित्ते जाता काचिदानन्दलीला॥ इति।

अथ मूर्च्छायाः—

पूरकान्ते गाढतरं बन्धो जालन्धरः शनैः।
रेचयेन्मूर्च्छनाख्योऽयं मनोमूर्च्छा सुखप्रदा॥ इति।

---

१. क घ — अन्तर्लगति, ख — यथान्तर्लगति, ग — यथा गलति।
२. क ख — क्षुधा तृषा, ग घ — क्षुधां तृषाम्।

अथ भस्त्रिकाया:—

आसनं तु ततो बद्ध्वा सम्यक् कमलसंज्ञकम्।
समग्रीवोदरः सम्यङ्मुखं संयम्य यत्नतः॥
घ्राणेन रेचयेत् प्राणं हृत्कण्ठे पूरयेत्ततः।
कपालाऽवधि वेगेन हृत्पद्माऽवधि मारुतम्॥
पुनर्विरेचयेत्तद्वत् पूरयित्वा पुनः पुनः।
यथैव लोहकाराणां भस्त्रा वेगेन चाल्यते॥
तथैव हि[१] शरीरस्थश्चाल्यते पवनो धिया।
यथा श्रमो भवेद्देहे यथा वेगेन पूरयेत्[२]॥
यथोदरं भवेत् पूर्णं पवनेन तथा लघु।
धारयेन्नासिकां मध्ये तर्जनीभ्यां विना दृढम्॥
कुम्भकं पूर्ववत् कृत्वा रेचयेदिडया ततः।
वात्तपित्तश्लेष्महरं शरीराग्निविवर्द्धनम्॥
कुण्डलीबोधनं कुर्यात् पापघ्नं सुखदं शुभम्।
विशेषेणैव कर्त्तव्यं भस्त्राख्यं कुम्भकं त्विदम्॥ इति॥

मुख्यसहितस्तु वक्ष्यते—

तस्मादेताँस्तु संसेव्य रोगजालविनाशकान्।
मुख्यं सहितमभ्यस्य केवलं तु ततो न्यसेत्[३]॥

सोऽयं द्विविधकुम्भकः सोत्कर्षापकर्षभेदेन पुनर्द्विविधो भवति। तत्र सोत्कर्षः प्राणापानयोर्द्वयोरपि रोधः।

न प्राणेनाप्यपानेन तथा वायुं समुत्सृजेत्।
न सिद्धिर्जायतेऽपानविसर्गेण ततो जयेत्॥
शनैर्नासापुटे वायुमुत्सृजन्न तु वेगतः।
न कम्पयेच्छरीरं तु सोत्कर्षो मुनिभिर्मतः॥ इति स्मृतेः।

सापकर्षस्तु विसृष्टापानवान्—

प्राणेन पीडितापानं मुक्त्वा कुम्भकसेवनम्।

---

१. क ख ग — हि, घ — स्व०।
२. क ख ग — पूरयेत्, घ — चालयेत्।
३. क ख — न्यसेत्, ग घ — अभ्यसेत्।

सापकर्षो भवेद्योगः कौष्ठ्यबन्धविनाशकः ॥
योगपट्टासने स्थित्वा मध्ये पूरकयोगतः ।
मूलप्रवृत्तितः पूर्वं प्राणायामं समभ्यसेत् ॥
वर्द्धतेऽनेन योगोऽन्यो महासिद्ध्यादिदायकः ।

इत्यादि स्मृतेः । अत्र नास्ति रोगसम्भावना। अपानस्यानिरोधादतो योगपट्टासने साधितोऽयं मलशोधनमात्रफलत्वात् प्रथमाभ्यास एवावश्यक इति भावः। इत्थञ्च रेचकपूरकौ द्वौ, सहितः केवलश्चेति। द्वावप्युत्कर्षकापकर्षकाविति षट्प्रकारः प्राणायामो भवति। पद्मपुराणे—

प्राणः प्राणमयो वायुर्वायुरात्मा निगद्यते।
तस्यायामः सुमुद्दिष्टः षट्प्रकारः सुयोक्तृभिः॥

इति। प्रकृतविभागाभिप्रायेण षट्प्रकारत्वकथनात्।

सोत्कर्षापकर्षभेदेन द्विविधोऽयं कुम्भको मिलित्वा पुनः सप्तविधो भवति। यथाह देवलः—

कुम्भः सप्तविधो ज्ञेयो रेचितादिप्रभेदतः ।
रेचितं पूरितः शान्तः प्रत्याहारोत्तरोऽधरः ॥
समश्चेति विनिर्दिष्टः कुम्भकः सप्तभेदतः । इति

एतेषां लक्षणानि चाह—

रेचितस्य बहिस्तम्भो वायो रेचितकुम्भकः ।
पूरकेण विना सम्यग् योगोऽयं सुखदो नृणाम्॥ १ ॥
पूरितस्योदरे रोधः पश्चाद्रेचकसंयुतः ।
नाडीशुद्धिकरः सम्यक् प्रोक्तः पूरितकुम्भकः ॥ २ ॥
कायस्यान्तर्बहिर्व्याप्तिर्या स स्याच्छान्तकुम्भकः ॥ ३ ॥
स्थानयोरन्तरे रोधः प्रत्याहाराख्यकुम्भकः ॥ ४ ॥
आपूरयेत् क्रमादूर्ध्वमूर्ध्वरोधो हृदादिषु ॥ ५ ॥
उत्तरः कुम्भकः स स्यादधोऽधो मूर्द्धतोऽधरः ॥ ६ ॥
रेचनापूरणे त्यक्त्वा मनसा मरुतो धृतिः ।
या नाभ्यादिप्रदेशेषु समः कुम्भः प्रकीर्त्तितः ॥ ७ ॥

अत्र शान्तसमौ केवलस्य भेदौ। अन्ये सहितस्य भेदाः । प्रत्याहाराख्यस्तूभयानुगत इति बोध्यम्। **कायस्येति**। रेचकपूरकौ विहाय शरीरस्यान्तर्बहिश्च मनसा वायो-

र्धारणा व्याप्तिरित्यर्थः स्थानयोरित्यत्र वीप्सा ज्ञातव्या। पादतलगुल्फनाभिहृदुदरकण्ठघण्टिकाभ्रूमध्यललाटब्रह्मरन्ध्रादीनि स्थानानि। एतेषु स्थानेषु द्वयोर्द्वयोरन्तरे मध्ये वायोर्धारणं प्रत्याहाराख्यकुम्भकः।

हृदादिस्थानेषु मूर्द्धतो हृदयपर्यन्तं रेचनापूरणे त्यक्त्वा मनसा वायोर्धारणात् समाख्यकुम्भकः। स्थानभेदात् समशान्तयोर्भेदः। अत्र पूरितकुम्भकक्रमः स्कान्दे—

अथवा ह्यासने यस्मिन् सुखमस्योपजायते।
स्वस्तिकादौ तदभ्यस्य योगं युञ्जीत योगवित्॥
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन्।
तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः॥
सन्नियम्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः।
रविणा प्राणमाकृष्य पूरयेदुदरीं दरीम्॥
कुम्भयित्वा शनैः पश्चाद् योगी चन्द्रेण रेचयेत्।
युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं च पूरयेत्॥
युक्तं युक्तं च बध्नीयादित्थं सिद्ध्यति योगवित्।

योगभास्करे—

इडया पूरयेद्वायुं धारयेत्तु सुषुम्नया।
रेचयेत् पिङ्गलानाड्या प्राणायामक्रमः स्मृतः॥

तन्त्रेऽपि—

सम्यग्देशे समास्तीर्य ह्यासनं मृदुसंयुतम्।
तत्रोपविश्य मेधावी स्वस्तिकादिसमन्वितः॥
ऋजुकायः सुखासीनः प्रणमेदिष्टदेवताम्।
ततो दक्षिणहस्तस्य अङ्गुष्ठेनैव पिङ्गलाम्॥
निरुद्ध्य पूरयेद्वायुमिडया तु शनैः शनैः।
यथाशक्त्या निरोधेन ततः कुर्याच्च कुम्भकः॥
ततस्त्यजेत् पिङ्गलया शनैरेव न वेगतः।
पुनः पिङ्गलयाऽऽपूर्य पूरयेदुदरं शनैः॥
धारयित्वा यथाशक्ति रेचयेदिडया शनैः॥
यया त्यजेत्तयाऽऽपूर्य धारयेदनिरोधतः।
एवं प्रातः प्रकुर्वीत शक्त्या विंशतिकुम्भकान्॥

एवं मध्याह्नसमये कुर्याद्विंशतिकुम्भकान्।
ततः सायं प्रकुर्वीत तथा विंशतिकुम्भकान्॥
एवमेवार्द्धरात्रेऽपि पुनर्विंशतिकुम्भकान्।
कुर्याद्रेचकपूराभ्यां सहितं प्रतिवासरम्॥
सहितो रेचकपूराभ्यां तस्मात् सहितकुम्भकः।
एवं मासत्रयं कुर्यान्नाडीशुद्धिस्ततो भवेत्॥
यदा नाडीविशुद्धिः स्यात्तदा चिह्नानि योगिनः।
जायन्ते तानि देहे वै तन्मे निगदतः शृणु॥
शरीरलघुता दीप्तिर्जठराग्निविवर्द्धनम्।
कृशत्वं च शरीरस्य तदा जायेत निश्चितम्॥ इति।

अयं च पूरकपूर्वकः क्रम औत्सर्गिकः। सूत्रकारस्य रेचकपूर्वकोऽभिमतः। **बाह्याभ्यन्तरस्तम्भवृत्ती**ति सूत्रयता तथा ज्ञापनात्।

आरेच्यापूर्य यत् कुर्यात् स वै सहितकुम्भकः।

इति स्कान्दो[१]क्तेश्च। अयं च नाडीचक्रमलशोधकः केवलश्च सिद्धिपर्यन्तम-[२]भ्यसनीयः।

यावत् केवलसिद्धिः स्यात्तावत् सहितमभ्यसेत्।

इति स्मृतेः। एतस्य प्रमाणं तु श्रुतौ[३]—

सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह।
त्रिःपठेदायातः प्राणः प्राणायामः स उच्यते॥

इति। सप्तव्याहृतीनामादौ सप्त प्रणवाः। **सुव**रिति याजुषेण पाठेन सप्तव्याहृति-सूत्रयोर्दशगायत्र्यादौ शिरोनेत्रादौ च प्रणवद्वयम्। **वरेणीय**मिति सामपाठेन चतुर्विंशति गायत्र्याम्। **आपोज्योतिरसोऽमृतम्, ब्रह्मभूर्भुवः स्वरोमि**ति शिरोमन्त्रेषु **वरौमि**ति याजुषेण पाठेन षोडश। एवं द्विषष्ट्यक्षराणि सम्पद्यन्ते। तानि च त्रिगुणितानि षडशीत्यधिकं शतं भवन्ति। तैस्तावत्संख्याकैः प्रणवैरेव वा प्राणायामः करणीय इत्यर्थः। लिङ्गपुराणे तु—

---

१. क ख ग — उक्तेः, घ — उक्तिः।
२. क ख घ — अभ्यसनीयः, ग — अनुष्ठेयः।
३. क ख — श्रुतौ....प्राणायामः करणीयः उपलभ्यते, ग घ — श्रुतौ....करणीयः नोपलभ्यते।

प्राणायामस्य मानं तु मात्राद्वादशकं स्मृतम्।
नीचो द्वादशमात्रस्तु सकृदुद्घात ईरितः॥
मध्यमश्च द्विरुद्घातश्चतुर्विंशतिमात्रकः।
मुख्यस्तु यस्त्रिरुद्घातः षट्त्रिंशन्मात्र उच्यते॥
प्रस्वेदकम्पनोत्थानजनकश्च यथाक्रमम्।
जलेन श्रमजातेन गात्रमर्दनमाचरेत्॥
दृढता लघुता चैव योगिनस्तत्र जायते।
आनन्दो जायते मुख्यो ध्वनिसम्पत्तिरेव च॥
अदीनत्वमरोगित्वमल्पनिद्रादिमूत्रकम्। इति।

मात्रा च स्कन्दपुराणे—

जानुं प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम्।
करोति छोटिकां यावत् सा मात्रेति च गीयते॥

नन्दिपुराणे—

त्वरितं लघुभिर्वर्णैर्मात्रा द्वादशभिः स्मृतेति।

मार्कण्डेये—

निमेषोन्मेषणे मात्रा कालो लघ्वक्षरं तथा।
प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रिकः॥ इति।

[1]निमिषादिलघ्वक्षरान्तं मात्राप्रमाणम्। तदेव विशिष्य दर्शयत्युत्तरार्द्धेन। द्वादशमात्रिको द्वादशगुणितो निमेषादिरयं पदार्थः प्राणायामस्य संख्यार्थं स्मृत इत्यर्थः। दशगुर्वक्षरोच्चारणं वा नाकी, गुर्वक्षरोक्त्या सुरिति स्वरशास्त्रानुसारात्। इयं लघुमात्रा। अतिमात्रालक्षणं त्वाह याज्ञवल्क्यः—

गोदोहं वत्सपानं वा [2]इषुक्षेपमथापि वा।
घण्टायास्तनितं वापि अतिमात्रा ह्युदाहृता॥ इति।

उद्घातलक्षणं तु—

प्राणेनोत्सार्यमात्रेण अपानः पीड्यते यदा।

---

१. क ख — निमिषादि०, ग घ — निमेषादि०।
२. क ख ग — इषुक्षेपमथापि, घ — इषुक्षेपस्तथापि।

गत्वा चोर्ध्वं निवर्तेत एतदुद्घातलक्षणम्। इति।

पूरकमात्रा तु कुम्भकचतुर्थांशः। रेचकमात्रा कुम्भकार्द्धांशः।

पूरकं षोडशभिः कृत्वा चतुःषष्ट्या तु मात्रया।
धारयेद्रेचयेत् पश्चाद् द्वात्रिंशन्मात्रया पुनः॥

इति सामान्यशास्त्रात्। अथवा कौर्म्ये—

मात्रा द्वादशको मन्दश्चतुर्विंशतिमात्रकः।
मध्यमः प्राणसंरोधः षट् त्रिंशन्मात्रिकोत्तमः॥

इति सामान्योक्तेः पूरकादिषु त्रिष्वपि द्वादशमात्रादिरूपैकैव संख्या। पूरकादिषु विशेषावचनादिति दिक्।

सोऽयमान्तरः कुम्भकः। पूरितस्यान्तःप्रदेशे धारणात्। रेचितकुम्भकस्तु बाह्यकुम्भकः। रेचितस्य वायोर्बहिरेव स्थापनात्। अयं च पूरकवर्जितः केवलकुम्भके अन्तरङ्गो बहुतरनियमापेक्षश्च भवतीति यद्यपि, **प्रच्छर्दने**ति सूत्रेणादृतस्तथापि स्कान्दे—

इत्थं मासत्रयाभ्यासादुभयायामसेवनात्।
शुद्धनाडीगणो योगी सिद्धप्राणोऽभिधीयते॥

इत्यादिना एतस्यैव नाडीशोधकत्वोक्तेर्युक्तिसिद्धत्वाच्च नाडीशुद्ध्यर्थं पूरितकुम्भकस्यैवाभ्यासो युक्त इति दिक्। तदेते सर्वे पुनः सगर्भागर्भभेदेन द्विविधा उक्ता नन्दिपुराणादौ—

प्राणायामोऽस्य मथनं तस्यादौ युक्तिरुच्यते।
अगर्भश्च सगर्भश्च द्विविधः सम्प्रकीर्त्तितः॥
जपध्यानं विनाऽगर्भः सगर्भस्तत्समन्वितः।
अगर्भाद् गर्भसंयुक्तः प्राणायामः शताधिकः॥
जाप्येन तु जपं कुर्यादविलम्बितमद्रुतम्।
मनसैव प्रसंख्यातं प्राणायामविधौ सदा॥

इत्यादि। जाप्येन प्रणवादिमन्त्रेण भगवन्नाम्नादिना वा, ध्यानं मन्त्रस्य, मन्त्रप्रतिपाद्यस्य च भगवतो नारायणस्य सगुणं निर्गुणं वा ध्यानप्रकरणे वक्ष्यमाणम्। इत्थञ्च सगर्भस्य त्रयो भेदा भवन्ति—सधूमकः, सज्वालः प्रशान्तश्चेति। तत्र मन्त्रतदवयवमात्राध्यानात् सधूमकः। मन्त्रतदवयवतदर्थध्यानात् सज्वालः। मन्त्रतदवयवतद्वाच्यसगुणध्यानरहितकेवललक्ष्यात्ममात्रध्यानात् प्रशान्तः।

तस्य मात्रात्रयध्यानात् प्राणायामः सधूमकः।
कलांशे देवताध्यानात् सज्वालः परिकीर्त्तितः॥

मात्राधूमांशनिर्वस्तुयोगनाडीसमाश्रयात्।
प्रशान्त उक्तः शास्त्रेषु सर्वभावविवर्जितः॥

इत्यादिस्मृतेः। तस्य प्रणवस्य। मात्राधूमेति। मात्राधूमं देवताज्वालारूपनिर्गत-परमात्मवस्तुसमाश्रयाद् योगनाडीसमाश्रयणाच्च प्रशान्त इत्यर्थः। अयं च सोत्कर्षः केवलकुम्भकावस्थः प्रशान्ततमो भवति।

केवले कुम्भके सिद्धे रेचकपूरकवर्जिते।
न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु विद्यते॥

इत्याद्युदाहृतवाक्यैरेतस्यैवोत्कृष्टत्वज्ञापनात्। एवं प्राणायाममभ्यस्यतः सिद्ध-बिन्दोः। क्षीणपापस्यावस्थाचतुष्टयं सम्पद्यते। तदुक्तं शिवयोगे—

आरम्भश्च घटश्चैव तथा परिचयः पुनः।
निष्पत्तिश्चेति योगस्य स्यादवस्थाचतुष्टयम्॥

तत्र प्राणायामप्रकरणोक्तं चतुष्कालिकप्राणायामाभ्यासादिना नाडीशुद्धौ आरम्भावस्था भवति। तस्या लक्षणं तेजस्वित्वसुगन्धित्वादि। अथ घटावस्था—

प्राणापानौ नादबिन्दुर्जीवात्मपरमात्मनोः।
मिलित्वा घटते यस्मात्तस्माद्वै घट उच्यते॥

याममात्रं प्राणापानादिकमेकत्र कर्तुं समर्थो घटावस्थामाप्नोति। तस्यामवस्थायां कामचारित्वदूरदर्शित्वादृश्यत्वादि भवति। तदुक्तम्—

यदा भवेत् घटावस्था योगिनोऽभ्यासिनः सदा।
तदा संसारचक्रेऽस्मिन् नास्ति तद्यन्न साधयेत्॥

अथ परिचयावस्था—

दण्डाष्टकं यदा वायुर्निश्चलो योगिनो भवेत्।
ततः परिचयावस्था योगिनोऽभ्यासिनो भवेत्॥

अस्यामवस्थायां वायुः सूर्याचन्द्रमसौ त्यक्त्वा षट्चक्राणि भित्वा सुषुम्नाव्योम्नि सञ्चरति। ततः कर्मणां त्रिकूटं पश्यति। तच्च प्रणवजपकायव्यूहोपभोगादिना नाशयेत्। धारणाप्रकरणीयफलं च भवति।

अथ निष्पत्त्यवस्था—

ततोऽभ्यासक्रमेणैव निष्पत्तिर्योगिनो भवेत्।
अनादिकर्मबीजानि यतश्छित्वाऽमृतं भवेत्॥

अस्यामवस्थायाम्—

गृहीत्वा चेतनां वायुः क्रियाशक्तिं च वेगवान्।

सर्वत्र चक्रं विजित्याशु ज्ञानशक्तौ विलीयते॥

इत्यन्यत्र विस्तरः।

सोऽयमखिलो योगो योग्यदेशकालादौ प्रतिषिद्धवर्जनयोग्यभोजनादिना सेव्यः। तत्र देश उक्त आदित्यपुराणे—

एकान्तगिरिदुर्गेषु तीर्थायतनगह्वरे।
सुशोभने मठे वाऽथ कार्यं योगस्य सेवनम्॥ इति।

मठलक्षणं तु योगतत्त्वप्रकाशे—

सुशोभनं मठं कुर्यात् सूक्ष्मद्वारं तु निष्प्रभम्।
सुलिप्तं गोमयेनैव सुधया वा प्रयत्नतः॥
मक्षिकादिकदोषेण वर्जितं मार्जितं सदा।
वासितं च सुगन्धेन धूपितं गुग्गुलादिभिः॥ इति।

हठप्रदीपिकायाम्—

अल्पद्वारमरन्ध्रगर्त्तघटितं नात्युच्चनीचायितम्।
सम्यग्गोमयसान्द्रलिप्तविमलं निःशेषजन्तूज्झितम्॥
बाह्ये मण्डपकूपवेदिरचितं प्राकारसंवेष्टितम्।
प्रोक्तं योग[१]मठस्य लक्षणमिदं सिद्धैर्हठाभ्यासिभिः॥ इति।

कालस्तु स्वरशास्त्रानुसारेण। कुमारो वा युवा[२]। प्रतिषिद्धं शीतोष्ण-जलवह्निसशब्दस्थलम्। अतितृप्तिक्षुधार्तिविण्मूत्रादिबाधामार्गस्वेदचिन्ताबाहुल्यसमयः। लवणादिभोजनं च।

नातिशीते न चोष्णे च न शब्दाग्निजलान्विते।
जीर्णगोष्ठे शुष्कपत्रचये वल्मीकसञ्चये॥
देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर्जयेत्।
नातितृप्तः क्षुधार्त्तो वा न विण्मूत्रप्रबाधितः।
नाध्वखिन्नो न चिन्तार्तो योगं युञ्जीत तत्त्ववित्॥
लवणं सार्षपं चाम्लमुष्णं रूक्षं च तीक्ष्णकम्॥
अतीव भोजनं त्याज्यमतिनिद्रातिभाषणम्।
हारीतशाकं सौवीरतैलमत्स्यतिलास्तथा॥

---

१. क ख घ — मठस्य, ग — हठस्य।

२. घ — वा [युवा पश्चात्] उपलभ्यते, क ख ग — वा नोपलभ्यते।

अजादिमांसं मद्यं च दधिकोलकुलत्थकाः।
पिण्याकं हिङ्गु लशुनं तक्राण्येतानि वर्जयेत्॥

इत्यादि स्मृतेः। योग्यभोजनं तु प्रथमाभ्यासे क्षीरपानमेव।

अभ्यासे प्रथमे काले प्रशस्तं क्षीरभोजनम्।
ततोऽभ्यासे दृढीभूते न तादृङ्नियमाग्रहः॥ इति।

क्षीराद्यलाभे तु गोधूमादिकं योग्यम्—

गोधूमशालियवषाष्टिकशोभनान्नं मिष्टान्नमण्डनवनीतसितामधूनि।
सुण्ठीपटालकफलादिकपञ्चशाकं मुद्गाद्यमल्पमुदकं च मुनीन्द्रपथ्यम्॥
कर्पूरं मधुरं स्निग्धं गव्यं ताम्बुलमेव च।
चूर्णेन रहितं धातुपोषणं योगिनां शुभम्॥
भोजनं च यदा यदा क्षुधा तदा तदा मितमेव कार्यम्।

अन्यथा योगाग्निनिरोधेन धातुवैषम्येण च नानारोगोत्पत्त्या योगप्रतिबन्धेन ज्ञानद्वारकमोक्षासिद्धेः। न चैतत् संन्यासश्रमिणः कथम्? तस्य पुनर्भोजननिषेधादिति वाच्यम्।

एककालं द्विकालं वा योगाभ्यासपरो यतिः।
आचरेद् भोजनं रम्यं हितं पथ्यं मितं सदा॥

इति स्मृतेः। निषेधवाक्यस्यायोगिसंन्यासिविषयत्वादिति दिक्।

इत्थं नियमेन योगं सेवयतो न भवति योगेन प्रतिबन्धः। यस्त्वेतान्नियमाननादृत्य सहसैव प्रवर्त्तते। तस्य तु भवति दोषैः प्रतिबन्धः। ते च दोषाः—

बाधिर्यं जडता लोपः स्मृतेर्मूकत्वमन्दताः।
कामश्च जायते पूर्णः सर्वज्ञानविनाशनः॥ इत्यादयः।

प्रमादाज्जायमानेष्वेतेषु उपायमाह दत्तात्रेयः—

स्निग्धां यवागूमत्युष्णां भुक्त्वा तत्रैव धारयेत्।
वातगुल्मप्रशान्त्यर्थमुदावर्त्ते तथा दधि॥
यवागूं चापि पवनं वायुग्रन्थिं प्रतिक्षेपेत्[१]।
तद्वत् कम्पे महाशैलं स्थिरं मनसि धारयेत्॥
विघाते वचसो वाचि बाधिर्ये श्रवणेन्द्रिये।
तथैवाम्लफलं ध्यायेत् तृष्णार्त्तो रसनेन्द्रिये॥

---

१. क ख — प्रतिक्षेपेत्, ग घ — प्रतिक्षिपेत्।

देशकालानुसारेण धारयेद्धारणां शुभाम्।
अत्युष्णे[१] तु महाशीतां तथा शीते विदाहिनीम्॥
कीलं शिरसि संस्थाप्य काष्ठं[२] काष्ठेन ताडयेत्।
लुप्तस्मृतेः स्मृतिः सद्यो योगिनस्तत्र जायते॥
द्यावापृथिव्यौ वाय्वग्नी व्यापिनावपि धारयेत्।
अमानुषाः सत्त्वजातबाधाश्चैताश्चिकित्सिताः॥
अमानुषं सत्त्वमन्तर्योगिनं प्रविशेद्यदि।
वाय्वग्निधारणाच्चैतद्देहसंस्थं विनिर्दिशेत्॥

इत्यादि। इति संक्षेपः॥ ५१॥

चतुर्विधस्य प्राणायामस्य फलमाह—

ततः क्षीयते प्रकाशावरणम्॥ ५२॥

तत इति। ततः तस्मात् प्राणायामात् प्रकाशावरणं आव्रियते बुद्धिसत्त्वप्रकाशो बुद्धिसत्त्वगतं सार्वज्ञमनेनेत्यावरकं तमः पापं च क्षीयते विनश्यतीत्यर्थः। तदुक्तं मनुना—

दह्यन्ते ध्मायमानानां धातूनां हि[३] यथा मलाः।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्॥ इति।

दोषाः पापानि तत्कार्यमावरणादीनि[४] च। ननु तर्हि तपोध्यानाभ्यां प्राणायामोऽन्यथासिद्धः। तपसैव पापनिवृत्तेः, ध्यानेन चा[५]वरणनिवृत्तेः सम्भवादिति चेन्न ज्ञानप्रतिबन्धकपापादिक्षये प्राणायामस्यैव मुख्योपायत्वात्। प्राणायामं विना मन आदीन्द्रियाणां जयासम्भवेन आवरणात्यन्तिकनिवृत्तेरसम्भवात्। ध्यानादेरप्युत्पादासम्भवाच्च। तदुक्तं स्कान्दे—

समस्तेन्द्रियवृत्तिश्च प्राणो वायुः प्रकीर्त्तितः।
तज्जयादिन्द्रियाण्येव निर्जितानि भवन्ति हि॥

---

१. क ख ग — अत्युष्णे, घ — अनुष्णे।
२. क ख ग — काष्ठं काष्ठेन, घ — कायं कायेन।
३. क ख घ — हि, ग — च।
४. क — तत्कार्यमावरणादीनि च, ख — तत्कार्यमावरणादिश्च, ग घ — तत्कार्ये तमो मलः विपर्ययौ च।
५. क ख — आवरण०, ग घ — तमो०।

वृत्तिवृत्तिमतोर्यस्मादभेदः परिकीर्त्तितः।
तस्माद् वृत्तिजयादेव वृत्तिमान्निर्जितो भवेत्॥
ज्ञानवैराग्ययोक्तृभ्यां प्राणायामकशाहतान्।
इन्द्रियाश्वान् विनिर्जित्य सर्वमेव जितं भवेत्॥
इन्द्रियाण्येव तत्सर्वं यत्स्वर्गनरकावुभाविति।

इन्द्रियाण्येवेत्यत्र एवकारो भिन्नक्रमः। तज्जयादेवेत्यर्थः। तस्मात्सर्वस्यापीन्द्रियजयमूलकत्वात् तदर्थं चलचित्तेन प्राणायामाऽभ्यासोऽवश्यं कार्य इति भावः॥ ५२॥

समाध्यनुकूलं फलान्तरमाह—

धारणासु च योग्यता मनसः॥ ५३॥

धारणास्विति। धारणा वक्ष्यमाणलक्षणास्तासु मनसः प्राणायामाभ्यासेनाऽविकृतस्यान्तःकरणस्य योग्यता विक्षेपरहितः स्थिरीभावो भवतीत्यर्थः॥ ५३॥

प्रत्याहारं लक्षयति—

स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः॥ ५४॥

स्वेति। चित्तस्य विषयो मोहनीयो रञ्जनीयः कोपनीयश्च रूपादिस्तेन सम्प्रयोगस्तदभिमुखता, तत्परित्यागोऽसम्प्रयोगो वैराग्येणान्तर्मुखपरिणाम इति यावत्। तस्मिन् सति मधुकरराजमनु मधुमक्षिकाणामिव यश्चित्तस्वरूपानुकार [१]एवेन्द्रियाणां चित्तनिरोधे साधनान्तरं विना तद्वृत्तिनिरोधश्चित्तलक्ष्याभिमुखतारूपः सः। इन्द्रियाणि विषयेभ्यः प्रतीपमाह्रियन्तेऽस्मिन्निति व्युत्पत्तेः प्रत्याहारपदार्थ इत्यर्थः। इवशब्दश्चित्तवत् तत्त्वाभिमुखतेन्द्रियाणां नास्ति, किन्तु विषयान्तरसञ्चाररााहित्यमात्रमिति ज्ञापनार्थः। सोऽयं प्रत्याहारो द्विविध उक्तो महाभारते मोक्षधर्मे—

इन्द्रियाणीन्द्रियार्थेभ्यो निवर्त्य मनसा शुचिः।
दशद्वादशभिर्वापि चतुर्विंशात् परं ततः॥

इति। इन्द्रियार्थेभ्यः शब्दादिभ्यो मनसा **निवर्त्येति** फलीभूतः प्रत्याहारः। प्राणायामसाध्यमाह—**दशद्वादशभिर्वेति**। द्वाविंशतिसंख्याभिः संचोदनाभिश्चित्ताऽश्वस्य प्रतोद-नस्थानीयाभिः प्रेरणाभिः प्रतिमानात्मानं जीवं चतुर्विंशादज्ञानात् प्रकृतिसंज्ञकात् परं प्रति गन्तुं प्रचोदयात् प्रेरयेत्। तत्राऽष्टादशसु स्थानेषु वायोः प्रत्याहरणं याज्ञवल्क्य आह—

१. क ख — एव, ग घ — इव।

अष्टादशसु यद्वायोर्मर्मस्थानेषु धारणम्।
स्थानात् स्थानात् समाकृष्य प्रत्याहारो निगद्यते॥

इत्युपक्रम्य—

संपूर्य कुम्भवद्वायुमङ्गुष्ठान्मूर्ध्नि मध्यतः।
धारयत्यनिलं बुद्ध्या प्राणायामप्रचोदितः॥
व्योमरन्ध्रात् समाकृष्य ललाटे धारयेत् पुनः।
ललाटाद्वायुमाकृष्य नेत्रस्थाने निरोधयेत्॥
भ्रूमध्याद्वायुमाकृष्य नेत्रस्थाने निरोधयेत्।
नेत्राद्वायुं समाकृष्य नासामूले निरोधयेत्॥
नासामूलात्तु जिह्वया मूले प्राणं निरोधयेत्।
जिह्वामूलात् कण्ठकूपे ततो वायुं निरोधयेत्॥
कण्ठकूपात्तु हृन्मध्ये हृन्मध्यान्नाभिमध्यमे।
नाभिमध्यात् पुनर्मेढ्रे मेढ्राद् बाह्यलये ततः॥
देहमध्याद् गुदे गार्गि गुदाद्वै ऊरुमूलके।
ऊरुमध्यात्तयोर्मध्ये तस्माज्जान्वोर्निरोधयेत्॥
चितिमूले ततस्तस्माज्जङ्घयोर्मध्यमे तथा।
जङ्घां ततः समाकृष्य वायुं गुल्फे निरोधयेत्॥
स्थानात् स्थानं समाकृष्य यस्त्वेवं धारयेद्धिया।
निष्पापः स विशुद्धात्मा जीवेदाचन्द्रतारकम्॥
एतत्तु योगसिद्ध्यर्थमगस्त्येनापि कीर्त्तितम्।
प्रत्याहारेषु सर्वेषु प्रशस्तमिति योगिभिरिति॥

एवमष्टादशप्रत्याहारचोदनाः। धारणाध्यानसमाधिसंज्ञास्तिस्रः। ततः सत्त्वपुरुषान्यताख्यातिसंज्ञा द्वाविंशतिचोदनाः। ततोऽपि सम्प्रेरितो जीवो नदीसमुद्रन्यायेन निर्विशेषचिन्मात्रतां प्रतिपद्यत इत्यर्थः॥ ५४॥

इत्थं प्राप्ताप्राप्तविवेकरीत्या प्रत्याहारस्य फलमाह—

ततः परमा वश्यतेन्द्रियाणाम्॥ ५५॥

तत इति। ततः प्रत्याहारादिन्द्रियाणां मन आद्येकादशानां भोगकरणानां[१] परमा

१. क ख ग — **भोगकरणानां** उपलभ्यते, घ — **भोगकरणानां** नोपलभ्यते।

वश्यता परमो जयः। मोहनीयादि[1]स्वरूपैः रूपादिभिर्विषयैर्बहिर्मुखतां नीयमानान्यपि न यान्ती–त्यर्थः। इयमेव वश्यता योगद्वाराऽपरोक्षप्रमाया हेतुः। एतस्याभावादेव सौभरिप्रभृतीनां योगात् प्रच्यावोऽपि। अत एवोक्तं भगवता—

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥
तानि सर्वाणि संयम्य युक्त आसीत् मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥

इति। तदेवमेकाग्रताभूमिसम्पादनद्वारा योगसाधनत्वेन योगस्य बहिरङ्गानि यमादिप्रत्याहारान्तानि सफलानि द्वितीये पादे प्रोक्तानि। धारणात्रयस्य सिद्धिबाहुल्यात् तत्फलभूताभिः सिद्धिभिः सह तत्प्रतिपादनाय तृतीयः पादो भविष्यति॥ ५५॥

इति श्रीनारायणतीर्थकृतायां योगसिद्धान्तचन्द्रिकायां
साधननिर्देशो नाम द्वितीयः पादः॥ २॥

❄

१. क ख ग — स्वरूपैः, घ — रूपैः।

तृतीयो विभूतिपादः

उक्तानि यमादिप्रत्याहारान्तानि योगाङ्गानि। इतः परं धारणादित्रयं तत्फलं च व्युत्पादयिष्यन् प्रथमं धारणां लक्षयति—

देशबन्धश्चित्तस्य धारणा॥ १॥

देशेति। देशे आध्यात्मिके नाभिचक्रहृदयकण्ठमुखभ्रूमध्यमूर्द्धनासादौ बाह्ये पर्वतमस्तकाकाशादौ बन्धश्चित्तस्य विषयान्तरपरिहारेण यच्चित्तस्य स्थापनं तदैकाग्र्यं सा धारणेत्यर्थः। तदुक्तमीश्वरगीतायाम्—

हृत्पुण्डरीके नाभ्यां वा मूर्ध्नि पर्वतमस्तके।
एवमादिप्रदेशेषु धारणा चित्तबन्धनम्॥

इति। अत एव ध्यानाद्भेदः। ध्यानस्य देशेनोपलक्षितपरमेश्वरैकाग्र्यरूपत्वात्। धारणायास्तु ध्येयाधारैकाग्र्यरूपत्वात्। तदुक्तं तत्रैव—

देशावस्थितमालक्ष्य बुद्धेर्या वृत्तिसन्ततिः।
वृत्त्यन्तरैरसंस्पृष्टा तद्ध्यानं सूरयो विदुः॥

इति। सेयं धारणा भूतानां भेदेन स्तम्भिनी प्लाविनी दहनी भ्रामणी शमनी चेति पञ्चधा भवति। तत्र पादादिजानुपर्यन्तदेशे हरितालनिभसलकारसवेधसचतुष्कोण-पृथिव्यैकाग्रता स्तम्भिनी। इयमेव पार्थिवी धारणेत्युच्यते। जानुतः पायुपर्यन्ते देशे अर्द्धेन्दुनिभसवकारसविष्णुकुन्दाभजलैकाग्रता प्लाविनी। इयमेव वारुणी धारणेत्युच्यते। आपायोर्हृदयपर्यन्ते देशे इन्द्रगोपाभत्रिकोणसरेफसरुद्रवह्न्यैकाग्रता दहनी। इयमेव तैजसी धारणेत्युच्यते। हृदयाद् भ्रूमध्यपर्यन्ते देशेऽञ्जनसन्निभसवृत्तसयकारसेशवाय्वेकाग्रता भ्रामणी। इयमेव वायवी धारणेत्युच्यते। भ्रूमध्याद् ब्रह्मरन्ध्रपर्यन्ते देशे सहकारविशुद्ध-वारिसदृशससदाशिवाकाशैकाग्रता शमनी। इयमेव नाभसी धारणेत्युच्यते। अथवा—

नाभेरधो गुदस्योर्ध्वं धारयेत् पञ्च नाडिकाः।
वायुं ततो भवेत् पृथ्वी धारणा चेद्भयापहा॥
पृथिवीसम्भवो मृत्युर्न भवेत् तस्य योगिनः।
नाभिस्थाने ततो वायुं धारयेत् पञ्च नाडिकाः॥
ततो जलाद्भयं नास्ति जले मृत्युर्न योगिनः।
नाभ्यूर्ध्वमण्डले वायुं घटिकाः पञ्च धारयेत्॥

आग्नेयी धारणा चेयं न मृत्युस्तस्य वह्निना।
न दह्यते शरीरं च प्रविष्टे चाग्निसंस्तरे॥
नाभिभ्रूघ्राणमध्ये तु प्रादेशत्रयसंमिते।
धारयेत् पञ्चघटिका वायुं सैषा च वायवी॥
धारणा नैव वायोस्तु भयं भवति योगिनः।
भ्रूमध्यादुपरिष्टात्तु धारयेत् पञ्च नाडिकाः॥
वायुं योगी प्रयत्नेन सेयमाकाशधारणा।
आकाशधारणां कुर्वन् मृत्युं जयति शाश्वतम्॥

इति। एवं मनसो बुद्धेश्च धारणा मूर्ध्नि।

इत्थं हि धारणाः सप्त कुर्वन् योगी भवेद् दृढः।
ब्रह्मणः प्रलयेऽप्यस्य मृत्योर्भीतिर्न विद्यते[1]॥

वायुसंयमनपूर्वकं [2]तत्त्वैकाग्रता कार्येत्युक्तश्लोकानामर्थः। एतासामेव च फलं बहुकालजीवित्वादिरूपं भुशुण्डादीनां योगवासिष्ठे प्रतिपादितम्। एतादृश्यो धारणाः परिच्छिन्नगोचरा अपि सिद्धिसम्पादकतया शास्त्रेषु बहुधा निरूपिताः। मुमुक्षुयोग्या त्वन्यादृश्येव। सा चोक्ता गारुडे—

प्राणायामैर्द्वादशभिर्यावत्कालः कृतो भवेत्।
स तावत्[3]कालपर्यन्तं मनो ब्रह्मणि धारयेत्॥

इत्यादिभिः। इयं च धारणा भगवत्कृपातश्च भवतीति संक्षेपः। अत्रैव लक्ष्ययोगस्यान्तर्भावः॥ १॥

ध्यानं लक्षयति—

तत्र प्रत्ययैकतानता ध्यानम्॥ २॥

तत्रेति। तत्र हृत्पुण्डरीकादिदेशोपलक्षिते या प्रत्ययैकतानता प्रत्ययस्य चित्तवृत्तेर्विजातीयप्रत्ययतिरस्कारेण धारावाहिकता सा ध्यानमित्यर्थः।

तदुक्तं विष्णुपुराणे—

तद्वृत्तिप्रत्ययैकाग्रसन्ततिर्यान्यनिःस्पृहा।
तद्ध्यानं प्रथमैः षड्भिरङ्गैर्निष्पाद्यते नृप॥

---

१. क ख घ — विद्यते, ग — जायते।
२. क ख ग — तत्त्व०, घ — तत्तत्तत्त्व०।
३. क ख — कार्य०, ग घ — काल०।

इति। तच्च ध्यानं सगुणनिर्गुणभेदेन द्विविधम्। तत्र सगुणमाह याज्ञवल्क्यादिः। यथा—

नीलोत्पलदलश्यामं पीतकौशेयवाससम्।
चतुर्भुजं शङ्खचक्रगदापद्मादिशोभितम्॥
कोटिसूर्यप्रतीकाशं ध्यायेदच्युतमव्ययम्।
अथैवं चिन्तयेद्देवं निर्मलं ज्ञानदं शुभम्॥
शुद्धस्फटिकसङ्काशं महादेवं महेश्वरम्।
परात् परतरं नित्यं नीलकण्ठं त्रिलोचनम्॥
ब्रह्माणं च सदा ध्यायेत् सर्वपापप्रणाशनम्।
मकारार्थो महादेव उकारार्थो हरिर्मतः॥
अकारार्थो भवेद् ब्रह्मा भावयेत्तु ततः सदा।
तेषामैक्यं ततः सद्यः क्षीणपापो भवेन्नरः॥

इति। निर्गुणस्य तु—

एकं ज्योतिर्मयं शुद्धं सर्वगं व्योमवद् दृढम्।
अव्यक्तममलं नित्यमादिमध्यान्तवर्जितम्॥
स्थूलसूक्ष्ममनाकाशसंस्पर्शमचाक्षुषम्।
न रसं न च गन्धाढ्यमप्रमेयमनूपमम्॥
आनन्दमजरं नित्यं सदसत्सर्वकारणम्।
सर्वाधारं जगद्रूपममूर्तमजमव्ययम्॥
अदृश्यं दृश्यमध्यस्थं वृत्तिस्थं सर्वतोमुखम्।
सर्वदृक् सर्वतः पादं सर्वस्पृक् सर्वतः शिरः॥
ब्रह्म ब्रह्ममयोऽहं स्यामिति तत्त्वस्य वेदनम्।
तदेतन्निर्गुणं ध्यानमिति योगविदो विदुः॥

इति। ध्यानफलं तु प्रसिद्धं पुराणेषु। यथा—

नाऽश्वमेधेन तत्पुण्यं न च वै राजसूयतः।
यत्पुण्यमेकध्यानेन लभेद् योगी स्थिरासनः॥
महापातकयुक्तोऽपि ध्यायन्निमिषमच्युतम्।
भूयस्तपस्वी भवति पङ्क्तिपावन एव सः॥

इत्यादि। अत्र सूत्रे तत्रेति पदं देशविशेषपरमौत्सर्गिकध्यानाभिप्रायेण। सर्वध्याने देशानियमात्। अतोऽस्यापि गारुडे लक्षणमुक्तम्—

तस्यैव ब्रह्मणि प्रोक्तं ध्यानं द्वादश धारणा।

इत्यादिना। तस्यैव द्वादशप्राणायामकालेन धारितचित्तस्य द्वादशधारणाकालावच्छिन्नं चिन्तनं ध्यानं प्रोक्तमित्यर्थः ॥ २ ॥

ध्यानसाध्यं समाधिं लक्षयति—

तदेवार्थमात्रनिभासं स्वरूपशून्यमिव समाधिः ॥ ३ ॥

तदेवेति। तदेव स्वच्छ[1]चित्तस्य [2]वृत्तिप्रवाहरूपं ध्यानमेव अर्थमात्रनिर्भासम्। अर्थमात्रस्य प्रत्ययादि[3]वर्जितस्य ध्येयस्य निःशेषेणासंदिग्धसर्वात्मना भासो भानं यत्र तथाभूतं अहमिदं चिन्तयामीत्येवंविधाकारशून्यम्। अत एव निर्विकल्पकरूपत्वेन प्रत्यक्षागोचरत्वात्। स्वरूपशून्यमिव न वस्तुतः स्वरूपशून्यमनुमानवेद्यत्वात्तु तादृशं[4] ध्यानं भावनाविशेषः समाधि[5]पदार्थः। सम्प्रज्ञातसाधारणं तु ध्यान इव गारुडोक्तं लक्षणम्। यथा—

ध्यानं द्वादशपर्यन्तं मनो ब्रह्मणि धारयेत्।

इति। व्याख्याताभिप्रायम्। एतत्त्रितयस्य व्यवहारलाघवफलां संयम इति संज्ञामाह—

त्रयमेकत्र संयमः ॥ ४ ॥

त्रयमिति। एकस्मिन् विषये त्रयं धारणाध्यानसमाधित्रितयं संयमशब्दार्थो भवतीत्यर्थः ॥ ४ ॥

संयमस्य फलमाह—

तज्जयात् प्रज्ञालोकः ॥ ५ ॥

तज्जयेति। संयमस्य जयात् स्थैर्यात् सात्म्यादिति यावत्। प्रज्ञाया ध्यातव्यविवेकस्वरूपाया आलोको दीप्तिर्वृद्धिः क्रमेण भवतीत्यर्थः। ध्यातव्यगोचरा प्रज्ञा अपरोक्षा भवतीति यावत् ॥ ५ ॥

संयमस्यानुष्ठाने विशेषमाह—

तस्य भूमिषु विनियोगः ॥ ६ ॥

---

१. क ख — **चित्तस्य**, ग घ — **चित्त०**।

२. क ख ग — **वृत्ति०** उपलभ्यते, घ — **वृत्ति०** नोपलभ्यते।

३. क ख घ — **वर्जितस्य**, ग — **रहितस्य**।

४. क ख — **तु तादृशं**, ग घ — **एतादृशं**।

५. क ख ग — **पदार्थः** उपलभ्यते, घ — **पदार्थः** नोपलभ्यते।

तस्येति। तस्य संयमस्य स्थूलादिपूर्वपूर्वभूमिकाजयानन्तरं सूक्ष्मसूक्ष्मोत्तरभूमिकासु विनियोगो नियोजनं[१] योगिना कर्त्तव्यमित्यर्थः। अधरामधरां जितां ज्ञात्वोत्तरस्यां भूमौ संयमः कार्य इति यावत्। तदुक्तम्—

योगेन योगो ज्ञातव्यो योगो योगात् प्रवर्त्तते।

योऽप्रमत्तस्तु योगेन स योगे रमते चिरम्॥

इति॥ ६॥

अष्टाङ्गेषु मध्ये त्रयाणामावश्यकत्वाऽवधारणार्थं पूर्वेभ्यस्त्रिष्ववान्तरविशेषमाह—

त्रयमन्तरङ्गं पूर्वेभ्यः॥ ७॥

त्रयमिति। पूर्वेभ्यो यमादिपञ्चभ्यः समाधिप्रतिबन्धकदुरितनिवर्त्तकेभ्यः। अत एव परम्परया समाधेरु[२]पकारकहेतुबहिरङ्गभूतेभ्यस्त्रयं धारणाध्यानसमाधयः, अन्तरङ्गमङ्गिसमानविषयतया साक्षात् स्वरूपोपकारकमित्यर्थः। [३]अतश्चैतत्त्रयाणामेवावश्यकत्वाद् यस्य जडभरतादेः स्वत एव प्राचीनकर्मणा चित्तं संयमयोग्यं तस्य नाऽस्तीतराङ्गावश्यकत्वमित्युक्तं पुराणेषु—

आसनस्थानविधयो न योगस्य प्रसाधकाः।

विलम्बजननाः सर्वे विस्तराः परिकीर्त्तिताः॥

शिशुपालः सिद्धिमाप स्मरणाभ्यासगौरवात्।

इत्यादिना। प्रसाधकाः प्रकृष्टहेतवः। कुतस्तत्राह—**विलम्बे**ति। अत एव भगवद्गीतायाम्[४]—

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।

निर्विशिष्यामि मय्येव अत ऊर्ध्वं न संशयः॥

इत्युक्तम्। संयमं प्रत्यशक्तस्यैव—

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।

अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय॥

---

१. क ख घ — नियोजनं, ग — विनियोजनम्।

२. क ख — उपकारकहेतु०, ग — उपकारकेभ्यः, घ — उपकारकत्वेन।

३. क ख — अतश्चैतत्, ग घ — अत एव।

४. ग घ — संयमाशक्तस्यैवाभ्यासकर्मादीनि विशेषत उपदिष्टानि (गीतायां पश्चात्) उपलभ्यते, क ख — संयम....उपदिष्टानि नोपलभ्यते।

इत्यादिनाऽभ्यासादीनि कर्माणि विशेषत उपदिष्टानि। तस्माच्चलचित्तानां [1]यमादिपञ्चकं वस्तुतो बहिरङ्गमप्यावश्यकतयान्तरङ्गमेव। तत्राप्यसमर्थानां क्रियायोग इति स्पष्टम्॥ ७॥

परवैराग्यद्वारा तस्य संयमस्य समाधिनिष्पादकत्वात् समाध्यन्तरापेक्षया तस्यापि बहिरङ्गत्वमित्याह—

तदपि बहिरङ्गं निर्बीजस्य॥ ८॥

तदपीति। तदपि धारणादित्रयमपि निर्बीजस्य समाधेः बहिरङ्गमेव साक्षादहेतुरेव। विवेकख्यातेः परवैराग्यद्वारैव तस्य हेतुत्वात्। अत एव येषां विदेहप्रकृतिलयानां देवविशेषाणामात्यन्तिकज्ञानवैराग्याभ्यां संयमं विनैवासम्प्रज्ञातो योगो भवति तेषां नास्ति संयमावश्यकत्वमित्युक्तं पुराणेषु[2]—

धारणादिविधिर्नैव जन्मसिद्धेषु सम्मतः।
यतो ब्रह्मादयः सर्वे जन्मना सिद्धिमास्थिताः॥

इत्यादिना॥ ८॥

ननु त्रिगुणात्मकतया[3] चल[4]स्वभावचित्तस्य संयमादिसाध्यनिर्बीजसमाधौ कीदृशः कतिविधश्च परिणामस्तत्राह—

व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः॥ ९॥

व्युत्थानेति। क्षिप्तमूढविक्षिप्ताख्यं भूमित्रयं व्युत्थानम्, असम्प्रज्ञातापेक्षया सम्प्रज्ञातश्च। निरोधः परवैराग्यं सम्प्रज्ञातो निरुद्ध्यतेऽनेनेति व्युत्पत्तेः। ताभ्यां जनितौ यौ संस्कारौ तयोर्यथाक्रममभिभवप्रादुर्भावौ। अभिभवः क्षिप्तादित्रयस्य दाहः, संप्रज्ञातस्य तु ह्रासः। प्रादुर्भावो वर्तमानेऽध्वनि प्रकटतयाऽवस्थानम्। एतौ द्वौ क्रमेण वर्द्धितौ निरोधपरिणामः, निरोधकालीनः परिणामः। स च निरोध[5]क्षणचित्तान्वयः। निरोधक्षणेषु कस्मिँश्चित् स्थिरे चित्तेऽन्वित इत्यर्थः। एतच्च विशेषणं योगकाले प्रतिक्षणं तादृशपरिणामभावलाभाय, चित्तस्थैर्यलाभाय चेति संक्षेपः। अनेन धर्मपरिणामो

---

१. क ख घ — **यमादि०**, ग — **पूर्व०**।
२. क ख घ — **पुराणेषु**, ग — **पुराणे**।
३. क ख घ — **त्रिगुणात्मकतया**, ग — **त्रिगुणात्मतया**।
४. क ख ग — **स्वभाव** घ — **स्वभावस्य**।
५. क ख ग — **क्षण०**, घ — **लक्षण०** (उभयत्र)।

लक्षणपरिणामश्चोक्तः। व्युत्थानत्यागेन निरोधसंस्काररूपधर्मस्य लाभात्। तस्य धर्मस्य वर्तमानावस्थाप्राप्तेश्च॥ ९॥

ननु किमर्थं चित्तधर्मिणो धर्मपरिणामोऽयं निरोधसंस्कारो निरोधकाले कल्प्यते[1], इत्याकाङ्क्षायां निरोधसंस्कारे प्रमाणमाह—

तस्य प्रशान्तवाहिता संस्कारात्॥ १०॥

तस्येति। तस्य निरोधावस्थचित्तस्य प्रशान्तवाहिता प्रशान्ततया निश्चलतया वाहिता प्रवाहपरिणामो निरोधसंस्कारबलान्निश्चलनिरोधधारया वहनं चित्तस्य भवतीति यावत्। अतो निरोधसंस्कारस्तत्प्रादुर्भावश्चावश्यमेवेष्टव्य इति भावः। अनेनावस्था-परिणाम उक्तः। संस्कारस्य बलवत्त्वावस्थालाभात्॥ १०॥

इदानीं सिद्धीः प्रदर्शयिष्यन् योगाङ्गसमाधिकार्यं परिणामं दर्शयति—

सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः॥ ११॥

सर्वार्थतेति। सर्वार्थता[2]बलत्वान्नानाविधार्थग्रहणरूपा विक्षिप्तता एकार्थता एकमात्रविषयता तयोर्यथाक्रमं क्षयोदयौ निरुक्तप्रकारावभिभवप्रादुर्भावौ चित्तस्य योगाङ्ग[3]समाधिकालीनः परिणाम इत्यर्थः॥ ११॥

इदानीमङ्गसमाधावेव परिणामान्तरमुक्तपरिणामोत्तरकालीनमाह—

ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता-परिणामः॥ १२॥

तत इति। ततः सर्वार्थताया निःशेषतः क्षये सति शान्तोदितौ, शान्तः अतीताध्वनि प्रविष्टः, उदितो वर्तमानेऽध्वनि स्फुरितः, द्वावतीतोत्पद्यमानौ तुल्यप्रत्ययौ एकवस्तुविषयकत्वेन सदृशौ प्रत्ययौ चित्तस्यैकाग्रताकालीनः पुनः परिणामो भवति। सजातीय एकैकः प्रत्ययो नश्यति, अन्योऽन्यश्चोत्पद्यत इत्येवं परिणामो भवतीत्यर्थः। न च पूर्वेण गतार्थता। तत्र चित्तसमाधानरूपलक्षणपरिणामस्यैवोक्तत्वात्। अत्र तु धारावाहिकैकाग्रता सन्तानस्योक्तेर्न गतार्थतेति संक्षेपः॥ १२॥

तदेवं योगतदङ्गतयो परिणामवैलक्षण्यं तयोर्विवेकाय प्रदर्शितम्। अनयैव दिशा व्युत्थानकालीनानपि परिणामाँश्चित्तस्य व्याचष्टे—

---

१. क ख घ — कल्प्यते, ग — कल्पते।
२. क ख — बलत्वात्, ग घ — चलत्वात्।
३. क ख घ — समाधि०, ग — समान०।

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥ १३ ॥

एतेनेति। एतेन धर्मलक्षणावस्थाभेदेन त्रिविधपरिणामस्य प्रदर्शकसूत्रसन्दर्भेण भूतेन्द्रियेषु स्थूलसूक्ष्मभेदभिन्नभूतेषु ज्ञानकर्मान्तःकरणभेदेनावस्थितेष्विन्द्रियेषु च धर्मलक्षणावस्थापरिणामाः। अवस्थितस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तर[1]प्राप्ते-धर्मपरिणामः। यथा मृदः पिण्डभावत्यागेन घटभावस्तस्यानागतावस्थापरित्यागेन वर्तमानावस्थायाः, वर्तमानावस्थात्यागेनातीतावस्थायाश्च प्राप्तिर्लक्षणपरिणामः। प्रथम-द्वितीयादि[2]लक्षणयोः सम्बन्धेन नूतनत्वप्राचीनत्वरूपोऽवस्थापरिणामः। एते त्रयो धर्म-लक्षणावस्थापरिणामा व्याख्याताः। चित्तस्येव भूतेन्द्रियाणां त्रिगुणात्मकतया-ऽवश्यम्भावितया सूचिताः। अयमत्र निष्कर्षः। स्थूलसूक्ष्मभेदेन भूतानि द्विविधानि। तत्र स्थूलानि वियत्पवनतेजोऽम्बुभुवः सूक्ष्माणि शब्दस्पर्शरूपरसगन्धतन्मात्राख्यानि तामसाहङ्कारोपादानकानि परस्परमतिविजातीयानि परस्परमहेतुकानि तेषां विपरिणामाः स्थूलाः। तत्र शब्दतन्मात्राख्यस्य परिणाम आकाशः, स्पर्शतन्मात्राख्यस्य वायुः, रूपतन्मात्राख्यस्य तेजः, रसतन्मात्राख्यस्य जलं, गन्धतन्मात्राख्यस्य पृथिवी। तन्मात्राख्याश्च स्थूलानां सूक्ष्मांशाः। स्वांशेभ्यः स्वस्योत्पत्तेः सम्भवात्। अतो नाकाशस्य वायुः, वायोस्तेजः, तेजसो जलं, जलस्य पृथिवी परिणामः। जातिसाङ्कर्यप्रसङ्गतो विजातीयानां विजातीयपरिणामत्वायोगात्।

ननु तर्हि

आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः पृथिवी।

इत्याद्यनेकश्रुतिस्मृतिविरोध इति चेन्न। तासां तेषामधिष्ठानकारणत्वाभि-प्रायकत्वात्। अधिष्ठानकारणं च यत्राऽविभक्तं येनोपष्टम्भं च सदुपादानकारणं च कार्याकारेण परिणमते तत्। यथा सर्गादौ जलाऽविभक्ताः पृथिवीसूक्ष्मांशास्तन्मात्राख्या जलेनैवोपष्टम्भात् पृथिव्याकारेण परिणमन्ते। तदत्यन्तो[3] जलं महापृथिव्या अधिष्ठान-कारणम्। एवमाकाशादयो वाय्वादीनाम्। आत्मा च सर्वेषाम्।

यस्य यत्कारणं प्रोक्तं तस्य साक्षान्महेश्वरः।
अधिष्ठानतया स्थित्वा सदैवोपकरोति हि॥

---

१. क ख — प्राप्तेः, ग घ — प्राप्तिः।

२. क ख — लक्षणयोः, ग घ — क्षणयोः।

३. क ख — तदत्यन्तः, ग — अत्यन्तः, घ — इत्यतः।

इति स्मृतेः। उपष्टम्भकत्वं च परमेश्वरस्य साक्षित्वेनैव। न च

यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्य-भिसंविशन्ति।

इत्युपादानत्वबोधकश्रुतिविरोध इति वाच्यम्। तस्या अपि कार्याविभागा-धारत्वरूपोपादानत्वपरत्वात्। अविभागश्च दुग्धजलयोरिव सम्मिश्रणाख्यः सम्बन्ध-विशेषः। तथा च यत्र कार्यस्य साक्षादविभागस्तत्परिणामिकारणम्। यथा तन्तवः पटस्य। यत्र तु कार्यस्य कारणाविभागेनाविभागस्तदधिष्ठानकारणम्। यथा जलं पृथिव्या इति।

ननु तर्हि तार्किक[१]मतादऽविशेष इति चेत् का हानिः। तार्किकेन सहजात्या दोषाभावात्। सम्भवति कथञ्चिदप्येकवाक्यत्वे सर्वथा[२]विरोधादेरस्याज्ञतामात्रत्वात्। तन्मते सूक्ष्मांशाः स्थूलानामारम्भकाः। अवयवावयविनोश्च भेद एव। सम्बन्धश्च सम-वायः। एतन्मते तु सूक्ष्मांशाः स्थूलपरिणामिनः। तादात्म्यञ्च सम्बन्ध इति मतविरोधस्य स्फुटत्वाच्च। अपि च तार्किकैः पृथिवीं प्रति जलस्य निमित्तकारणत्वमिति परिभाष्यते। अस्माभिस्तु समवायसमवायिभ्यामुदासीननिमित्तकारणेभ्यश्च विलक्षणतया चतुर्थमाधा-रकारणमित्युच्यते। अवयवाविभागस्य निमित्तकारणेष्वदर्शनादित्यन्यत्र विस्तरः॥ १३॥

ननु धर्मेभ्योऽतिरिक्तो धर्मी नानुभूयते यस्य धर्मादिपरिणामः स्यादिति बौद्ध-शङ्कायां धर्मेभ्यो विविच्य धर्मिणं लक्षयति—

शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी॥ १४॥

शान्तेति। शान्ताः कृतव्यापारा अतीताः, उदिता कुर्वद्व्यापारा वर्तमानाः, अव्य-पदेश्या शक्तिरूपेणावस्थिताः कथितुमशक्या अनागताः। एतादृशेषु धमेष्वनुपातीति वर्तमानरूपेणानुगतो धर्मीत्यर्थः। अत्राऽव्यपदेश्यान्तं विशेषणं धर्मधर्मिणोर्भेदप्रदर्शनाय। तथा च वर्तमानत्वावर्त्तमानत्वरूपविरुद्धधर्माध्यासाद्धर्मिणो धर्मस्य च भेद इत्यर्थः।

ननु वर्तमाने धर्मिणि कारणव्यापारात् पूर्वं धर्मादेरवर्तमानत्वे सत्कार्यवादबाधः स्यात्। कारणव्यापारेणासतः कार्यस्योत्पत्त्यङ्गीकारात्।

न च कथञ्चिद्भिन्नत्वेऽपि शक्यात्मनावस्थितस्यात एव भिन्नस्य[३] कारणेना-भिव्यक्तिरेव क्रियते, नोत्पत्तिरितो न सत्कार्यबाधप्रसङ्ग इति वाच्यम्। अभिव्यक्तेरपि जन्यत्वे सत्कार्यवादबाधः स्यात्। नित्यत्वे सदैवाभिव्यक्तिः स्यात्। तस्याऽप्य-

---

१. क ख घ — **मतात्** उपलभ्यते, ग — **मतात्** नोपलभ्यते।

२. क ख घ — **विरोधादेः**, ग — **विरोधात्**।

३. क ख ग — **भिन्नस्य**, घ — **अभिन्नस्य**।

भिव्यक्त्यपेक्षायामनवस्थापत्तेश्चेति चेन्न। [१]धर्मिनिष्ठसत्त्वगुणस्यैव धर्माद्यभिव्यक्तित्वेनाऽभिव्यक्तेर्नित्यत्वेऽपि तमसा [२]प्रतिबन्धत्वान्न व्यवहारोपयोगित्वम्। अभिव्यञ्जकसामग्र्योत्तेजकेन मणेरिव तमसः प्रतिबन्धाद् व्यवहारोपयोगित्वमिति सामग्र्या उत्तेजकत्वमात्राङ्गीकारात् सत्कार्यवादबाधा[३]योगात्। तस्मात् सामग्र्या उत्पादकत्वपक्ष एव नैयायिकोक्तदोषावकाशो नोत्तेजकत्वपक्षेऽपि। अतस्तेषां दूषणप्रयासोऽन्येषां समाधानान्तरप्रयासश्च व्यर्थ एवेति संक्षेपः ॥ १४॥

नन्वेकस्य धर्मिणः किमेक एव परिणामः ? उत बहव इत्याशङ्कायाम्, एक एव युक्तो लाघवात्, बहुत्वपक्षे सहकारिभेदकल्पनागौरवादिति प्राप्ते फलभेददर्शनाद् बहुत्वमेव युक्तम्। बहुत्वे को हेतुस्तत्राह—

क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥ १५ ॥

क्रमेति। मृदि चूर्णपिण्डयोः पिण्डघटयोः पौर्वापर्यरूपक्रमस्यान्यत्वं दृश्यमानमेकस्या एव मृदः परिणामानां[४] चूर्णादीनां धर्माणाम् अन्यत्वे नानाविधत्वे हेतुः कारणं लिङ्गञ्चेत्यर्थः। क्रियाभेदादेकस्य धर्मिणो नानाविधाः क्रियाः परिणामाः भवन्ति। क्रियाभेदज्ञानाच्च परिणामा भिन्ना इति च ज्ञानं भवतीति यावत्। एवं धर्मेऽपि लक्षणपरिणामावस्थापरिणामा अवगन्तव्याः। सर्वेषां भावानां [५]नियतेनैव क्रमेण परिणममानत्वात्। तत्र धर्मलक्षणपरिणामयोः प्रतिक्षणमनुत्पादेऽपि अवस्थापरिणामस्यास्ति प्रतिक्षणमुत्पत्तिः। नवस्य कालान्तरे पुराणतोपलम्भात् क्षणपरम्परापातिना प्रतिक्षणं भिन्नं स्वरूपसत्ताक्रमसमूहेन विना पुराणताया अत्रासम्भवात्। अतः सा प्रतिक्षणमवस्थापरिणाममनुमापयति। अत एव प्रतिक्षणभङ्गुरत्वेन प्रपञ्चस्य स्वप्नसाम्यं निश्चिन्वन्ति प्राज्ञाः। तदुक्तं[६] माण्डूक्ये—

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा[७]।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥

इति। ननु स्वप्नतुल्यत्वं न युक्तम्। जाग्रद्दृश्यपदार्थानामिव स्वाप्निकानां

---

१. क ख घ — **धर्मि०**, ग — **धर्म०**।
२. क ख — **प्रतिबन्धत्वात्**, ग घ — **प्रतिबद्धत्वात्**।
३. क — **अयोगात्**, ख ग घ — **अभावात्**।
४. क ग घ — **परिणामानां**, ख — **परिमाणानाम्**।
५. क ख घ — **नियतेनैव क्रमेण**, ग — **नियतक्रमेणैव**।
६. क ख घ — **तदुक्तं**, ग — **श्रूयते**।
७. क ख घ — **यथा**, ग — **तथा**।

सम्प्रयोजनत्वादर्शनात्। स्वाप्नभोजनादिना क्षुत्पिपासादिनिवृत्तेरभावादिति चेन्न। जागरितभोजनादिना स्वाप्नक्षुत्पिपासादेरप्रतिबन्धाज्जागरित[१]संप्रयोजनतायाः स्वप्ने व्यभिचारेण साम्यस्याऽपरिहार्यत्वात्। तदुक्तं तत्रैव—

सम्प्रयोजनता तेषां स्वप्ने विप्रतिपद्यते।
तस्मादाद्यन्तरत्वेन मिथ्यैव खलु ते स्मृताः॥

इति। इदमेव च तेषां मिथ्यात्वं यद् भोगकालेऽप्यस्थिरत्वं ज्ञानोत्तरकाले चाऽसत्त्वम्। एतदभिप्रेत्यैव च तदेतत्त्रयं स्वप्नं मायामात्रमित्याद्याः श्रुतिस्मृतयोऽपि स्वप्नमायात्वादिकं प्रतिपादयन्ति। न त्वात्यन्तिकं तुच्छत्वं ज्ञापयितुमिति सूत्रकारस्य गूढाभिसन्धिः॥ १५॥

सम्प्रत्यापादपरिसमाप्तेः संयमस्य सर्वविषयावश्यकत्वज्ञापनाय विभूतय उच्यन्ते। तत्रादौ परमेश्वरेण साम्यसम्पादिकां विभूतिमाह—

परिणामत्रयसंयमादतीतानागतज्ञानम्॥ १६॥

परिणामेति। अस्य धर्मिणोऽयं [२]परिणामस्तस्य चायं लक्षणपरिणामोऽयमवस्थापरिणाम इत्येवं परिहृतविक्षेपतया अनुक्षणं यत्र चिदर्थे संयमात् तत्साक्षात्कारे सति तदितरार्थानामपि सर्वेषामतीतानागतवर्तमानानां साक्षात्कारो योगजन्यधर्मबलाद्योगिनः सङ्कल्पमात्रेण प्रणिधानलेशादेव भवतीत्यर्थः। अयं भावः। सत्त्वप्रधानतया सर्वार्थग्रहणे समर्थस्यान्तःकरणस्याविद्याविक्षेपकृतकुण्ठीभावनिरासद्वारा सर्वार्थज्ञाने संयमो हेतुरित्यर्थः। संयमस्याऽन्यविषयकत्वेऽपि न हानिः। योगमात्रस्य सकलप्रतिबन्धनिरासे सामर्थ्यादिति॥ १६॥

सिद्ध्यन्तरमाह—

शब्दार्थप्रत्ययानामितरेतराध्यासात् संकर-
स्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्॥ १७॥

शब्देति। शब्दो गौरित्येकं पदमित्येकत्वबुद्धिवेद्यवर्णेभ्योऽतिरिक्तोऽखण्डश्चरमवर्णप्रत्यक्षेणाभिव्यज्यमानः स्फोटः। आशुविनाशितया वर्णानां मिलनासम्भवेनार्थप्रत्यायकत्वायोगा[३]त्तथैवार्थस्य स्फुटीकरणात्। यद्वा स्फोटज्ञानेऽपि पूर्वपूर्ववर्णसंस्कारसहकृतचरमवर्णप्रत्यक्षस्यैव कारणत्वं वाच्यम्। तथा च तद्धेतोरेवास्तु किं तेनेति

---

१. क घ — **सं०**, ख — **स्व०**, ग — **स०**।
२. क ख घ — **परिणामः**, ग — **धर्मपरिणामः**।
३. क ख — **तथैव**, ग घ — **तस्यैव**।

न्यायेनानुपूर्वीविशेषविशिष्टवर्णसमुदाय एव वा। अर्थो गौरित्यादिः सास्नादिमान् विषयः। प्रत्ययो गौरित्यादिव्यक्तिविषयकं ज्ञानम्। तेषाम् इतरेतराध्यासाद् अन्योन्यमभेदाध्यासात् सङ्करो विवेकाग्रहणं भवति। वस्तुतस्तु तेषां भेदोऽस्ति। अतस्तेषां मनुष्यादियत्किञ्चिद्विषयाणामपि प्रविभागभेदे संयमात् साक्षात्कृते सति सर्वभूतानां रुतानि ज्ञायन्ते। अयं काकादिरिममर्थम्। एवं प्रतीत्या अनेन शब्देन कथयतीत्येवमित्यर्थः। यद्यपि साक्षात्कृते सतीति सूत्रे नास्ति, तथापि संस्कारसाक्षात्करणादित्यागामिसूत्रेण साक्षात्कारपर्यन्तानां संयमस्य व्याख्यास्यति[1]। अस्मदादीनां च शब्दार्थप्रत्ययभेदसाक्षात्कारे सत्यपि तस्य साक्षात्कारस्य संयमाजन्यत्वान्न सर्वभूतरुतज्ञानं भवति। योगजधर्मस्यैव तादृशसामर्थ्यादिति दिक्॥ १७॥

सिद्ध्यन्तरमाह—

संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्॥ १८॥

संस्कारेति। विविधाश्चित्तस्यानुभवक्लेशजाः स्मृतिक्लेशहेतवः संस्काराः, केचित् कर्मजात्यायुर्भोगफलाः पूर्वजन्मपरम्परासञ्चिताः। तेषां श्रुतानुमितानां संयमेन साक्षात्कारात् पूर्वजातीनां ज्ञानं भवतीत्यर्थः। जन्म[2]भूमिरुपदेशस्य युगादिरूपकालस्य मातापित्रादिरूपनिमित्तस्य चेदानीमत्रामुकपुत्रोऽहमित्यनुभवजन्यानादिसंस्कारविषयत्वात् संस्कारसाक्षात्कारे देशकालनिमित्तादिरूपाशेषविशिष्टानां पूर्वजन्मनामपि साक्षात्कारो भवतीति यावत्। अत्र भगवान् जैगीषव्य उदाहरणम्।

तथाहि—भगवानावट्यो जैगीषव्यं प्रत्युवाच—संस्कारसाक्षात्करणेन दशसु महासर्गेषु भव्यत्वादनभिभूतबुद्धिसत्त्वेन त्वया नरकतिर्यग्[3]ग्रामदुःखं सम्पश्यता देवमनुष्येषु पुनः पुनरुत्पद्यमानेन सुखदुःखयोः किमधिकमनुभूतमिति। अथ जैगीषव्य उवाच—दशस्वपि महासर्गेषु सुखदुःखयोर्मध्ये दुःखमेवाधिकमनुभूतमिति। आवट्य आह[4]—किं प्रधानवशित्वमनुत्तमसुखमपि दुःखपक्ष एव निक्षिप्तमिति। जैगीषव्यः प्राह—कः संदेहः विषयसुखापेक्षयैवानुत्तमं, न तु कैवल्यापेक्षया। त्रिगुणात्मकस्य प्रत्ययस्य हेयत्वादिति॥ १८॥

सिद्ध्यन्तरमाह—

प्रत्ययस्य परचित्तज्ञानम्॥ १९॥

---

१. क ख घ — व्याख्यास्यति, ग — व्याख्यास्यते।

२. क ख घ — भूमिः, ग — भूः।

३. क ख — ग्राम०, ग घ — गर्भ०।

४. क ख घ — आह, ग — उवाच।

प्रत्ययस्येति। प्रत्ययस्य रागादिमत्याः स्वीयचित्तवृत्तेः संयमेनाऽऽश्रयादिरूपाशेषविशेषैः साक्षात्कृताच्चित्तात् परचित्तज्ञानं परस्य भिन्नस्य चित्तान्तरस्याप्य[१]शेषविशेषतः साक्षात्कारः संकल्पमात्रेण भवतीत्यर्थः। केचित्तु सुखादिना लिङ्गेन परस्य चित्तस्य संयमेन परचित्तज्ञानमिति वदन्ति। तन्न युक्तम्। समानविषयत्वेनैव संयमानुभवयोः कार्यकारणभावे अदृष्टाश्रुतामतगोचरप्रत्यक्षं न स्यात्। तस्मात्। सजातीयसंयमत्वादिनैव हेतुहेतुमद्भावो युक्तः। अतः स्वीयचित्तवृत्तिसंयमादपि तत्सम्भवे परानुसरणप्रयासो व्यर्थ इति दिक्॥ १९॥

अस्यैव परचित्तज्ञानस्य विशेषमाह—

न च तत्सालम्बनं तस्याविषयीभूतत्वात्॥ २०॥

न चेति। तत् परचित्तज्ञानं नीलविषयं पीतविषयमिति सालम्बनं नियमेन न भवति। तस्य परचित्तालम्बनस्य संयमविषयेण स्वचित्तेनाविषयीकरणादित्यर्थः। किमनेनालम्बितमिति प्रणिधाने तु भवत्येव तस्यापि ज्ञानं प्रणिधानविशेषमाहात्म्याददिति संक्षेपः॥ २०॥

सिद्ध्यन्तरमाह—

कायरूपसंयमाद् तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशाऽसम्प्रयोगेऽन्तर्धानम्॥ २१॥

कायेति। कायस्य यद्रूपं चाक्षुषत्वप्रयोजकमस्ति तस्मिन् संयमात्तस्य रूपस्य तद्ग्राह्यशक्तिस्तम्भे परचक्षुःसंयोगयोग्यतारूपदृश्यताशक्तिप्रतिबन्धे सति चक्षुःप्रकाश[२]संयोगे परचक्षुःकिरणैरसंप्रयोगेऽन्तर्द्धानं योगिदेहस्याचाक्षुषत्वं [३]यथावकाशमुत्पद्यते। दिवान्धेनेव केनाप्यसौ न दृश्यत इत्यर्थः। एतेन स्वीयशब्दादिसंयमाच्छ्रोत्राद्यऽग्राह्यत्वसिद्धिरुक्ता वेदितव्येति संक्षेपः॥ २१॥

सिद्ध्यन्तरमाह—

सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा॥ २२॥

सोपक्रममिति। पूर्वजन्मकृतमिदानीं स्थितं कर्म द्विविधं सोपक्रमं निरुपक्रमञ्च।

---

१. क ख घ — **अशेष०**, ग — **शेष०**।
२. क ख ग — **संयोगे**, घ — **असंयोगे**।
३. क — **यथावकाशं**, ख ग घ — **यथाकामम्**।

तत्र सोपक्रमं फलदानव्यापारयुक्तम्। निरुपक्रमं कालान्तरे फलप्रदम्[१]। तस्मिन् द्विविधे कर्मणि किं कर्म शीघ्रविपाकं किं वा चिरविपाकमिति संयमात् साक्षात्कृतेऽपरान्तर्शब्दितस्य मरणस्य ज्ञानम्। अमुष्मिन् देशे काले चानेन प्रकारेणामुकहेतुना भविष्यतीत्येवं भवतीत्यर्थः। प्रसङ्गाद[२]योगिनोऽप्याह—**अरिष्टेभ्यो वेति**। अरिष्टं त्रिविधम्—आध्यात्मिकम् आधिभौतिकम् आधिदैविकं च। तत्राध्यात्मिकं च विपरीतोऽसुसंचारः, पिहितकर्णस्य नादाश्रवणादिकं च। आधिभौतिकं च अकस्माद्विकृतपुरुषदर्शनादि। आधिदैविकम् अकाण्ड एवात्रायोग्यस्वर्गादिदर्शनम्। उक्तानि[३] स्कान्दे—

वामनासापुटे यस्य वायुर्वाति दिवानिशम्।
अखण्डमेकं तस्यायुर्नश्यत्यब्दत्रयेण हि॥
द्व्यहोरात्रं त्र्यहोरात्रं रविर्वहति सन्ततम्॥
आद्व्येकवर्षं तस्येह जीविताविधिरुच्यते॥
वहेन्नासापुटयुगे दशाहानि निरन्तरम्।
वायुश्चेत् प्रतिसंक्रान्तिं तदा जीवेदृतुत्रयम्॥
अरुन्धतीं ध्रुवं चैव विष्णोस्त्रीणि पदानि च।
आसन्नमृत्युर्नेक्षेत चतुर्थं मातृमण्डलम्॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते।
विष्णोः पदं भ्रूवोर्मध्यं नेत्रग्लौर्मातृमण्डलम्॥
वेत्ति नीलादिवर्णस्य कट्वम्लादिरसस्य च।
अकस्मादन्यथाभावं षण्मासेन स मृत्युभाक्॥
षण्मासमृत्योर्मर्त्यस्य कण्ठोष्ठरसनापुटाः।
शुष्यन्ति सततं तद्वत् सजिह्वातालुपञ्चमाः॥
रेतःकरजनेत्रान्तं नीलिमानं भजन्ति चेत्।
तर्हि कीनाशनगरीं षष्ठे मासि व्रजेन्नरः॥
द्रुतमारुह्य सरटस्त्रिवर्णो यस्य मस्तकम्।
प्रयाति याति तस्यायुः षण्मासे परिसंक्षयम्॥

---

१. क ख घ — फलप्रदं, ग — फलदम्।
२. क ख घ — अयोगिनः, ग — अयोगिसाधारणम्।
३. क ख घ — उक्तानि, ग — उक्तं च।

सुस्नातस्यापि यस्याशु हृदयं परिशुष्यति।
चरणौ च करौ वापि त्रिमासं तस्य जीवितम्॥
छाया प्रकम्पते यस्य देहबन्धेऽपि निश्चले।
कृतान्तदूता बध्नन्ति चतुर्थे मासि तं नरम्॥
यस्य वीर्यं मलं मूत्रं क्षुतं सद्यः पतेदिह।
एकधैव भवेद्वर्षं जीवितं तस्य निश्चितम्॥
इन्द्रनीलनिभं व्योम्नि नागवृन्दं य ईक्षते।
इतस्ततः प्रचलितं षण्मासं स तु जीवति॥
मतिर्भ्रश्येच्चलेद्घ्राणी धनुरैन्द्रं निरीक्षते।
रात्रौ चन्द्रद्वयं चापि दिवा च द्वौ दिवाकरौ॥
दिवा सतारकाचन्द्रं रात्रौ व्योमवितारकम्।
युगपच्च चतुर्दिक्षु शाक्रं कोदण्डमण्डलम्॥
भूरुहे भूधराग्रे वा गन्धर्वनगरालयम्।
दिवा पिशाचनृत्यं च ह्येते पञ्चत्वहेतवः॥
सर्वेष्वेतेषु चिह्नेषु यद्येकमभिवीक्षते।
तदा मासावधिं मृत्युं प्रतीक्षेत न चाधिकम्॥
अकस्माद्वीक्षते यस्तु पुरुषं कृष्णपिङ्गलम्।
तस्मिन्नेव क्षणे रूपं स जीवेद् वत्सरद्वयम्॥
प्रेक्ष्यते भक्ष्यते यो हि पिशाचासुरवायसैः।
भूतैः प्रेतैः श्वभिर्गृध्रैर्गोमायुखरशूकरैः॥
शरभैः करभैः कीरैः श्येनैरन्यैश्च जन्तुभिः।
स्वप्ने स जीवितं त्यक्त्वा वर्षान्ते यममीक्षते॥
गन्धपुष्पांशुकैः शोणैः स्वां तनुं भूषितां नरः।
य पश्येत् स्वप्नसमये सोऽपि मासांस्तु जीवति॥
पांशुराशिं च वल्मीकं यूपं दण्डमथापि वा।
योऽधिरोहति वै स्वप्ने स षष्ठे मासि नश्यति॥
रासभारूढमात्मानं तैलाभ्यक्तं च मण्डितम्।
नीयमानं यमाशायां यः पश्येत् स च पूर्ववत्॥
स्वमौलौ स्वस्तनौ वाऽपि यः पश्येत् स्वप्नगो नरः।
तृणानि शुष्ककाष्ठानि षष्ठे मासि स नश्यति॥

लोहदण्डधरं कृष्णं पुरुषं कृष्णवाससम्।
स्वप्ने योऽग्रे स्थितं पश्येत् स त्रीन् मासान्न लङ्घयेत्॥
काली कुमारी यं स्वप्ने बन्धीयाद् बाहुपाशकैः।
स मासेन समीक्षेत नगरीं शमनोषिताम्॥
नरो यो वानरारूढो यायात् प्राचीं दिशं स्वपन्।
दिनैः पञ्चदशैरेव पश्येत् संयमनीं पुरीम्॥
कृपणोऽपि वदान्यः स्याद् वदान्यः कृपणो यदि।
प्रकृतेर्विकृतिश्च स्यात्तदा पञ्चत्वमृच्छति॥

मार्कण्डेये—

अरश्मिबिम्बं सूर्यं च बिम्बं सूर्यांशुमालिनम्।
दृष्ट्वैकादश मासांस्तु नरो वर्षं न जीवति॥
चरेन्मूत्रं पुरीषं च यः स्वर्णं रजतं तथा।
प्रत्यक्षमथवा स्वप्ने जीवितं दशमासिकम्॥
दृष्ट्वा प्रेतपिशाचानां गन्धर्वनगराणि च।
सुवर्णवर्णवृक्षांश्च नव मासान् स जीवति॥
स्थूलः कृशः कृशः स्थूलो योऽकस्मादेव जायते।
प्रकृतेश्च निवर्तेत तस्यायुश्चाष्टमासिकम्॥
कपोतो गृध्रकाकोलौ वायसो वापि मूर्द्धनि।
क्रव्यादो वा खगस्तिष्ठेत् षण्मासायुः प्रदर्शकः॥
हन्यते काकपङ्क्तिभिः पांशुवर्षेण वा नरः।
शुष्येच्च वै यस्य मर्म स्नानाद्वामादधस्तनम्॥
तस्यापि पञ्चभिर्मासैर्विद्यान्मृत्युमुपस्थितम्।
घृते तैले तथाऽऽदर्शे तोये वाऽऽप्यात्मनस्तनुम्॥
यः पश्येदशिरस्कां वा मासादूर्ध्वं न जीवति॥
रक्तकृष्णाम्बरधरा गायन्ती हसती च यम्।
दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति॥
नग्नं क्षपणकं स्वप्ने हसमानं महाबलम्।
एतं चाऽऽवीक्ष्य वलान्तं विद्यान्मृत्युमुपस्थितम्॥
आमस्तकतलं यस्तु निमग्नं पङ्कसागरे।
स्वप्ने पश्यत्यथात्मानं स सद्यो म्रियते नरः॥

केशाङ्गारांस्तथा भस्म भुजङ्गं निर्जलां नदीम्।
दृष्ट्वा स्वप्ने दशाहानु मृत्युरेकादशेऽहनि॥
करालैर्विकटैः कृष्णैः पुरुषैरुद्यदायुधैः।
पाषाणैस्ताडितः स्वप्ने सद्यो मृत्युमृच्छति॥
यस्य वै भुक्तमात्रस्य हृदये बाधते क्षुधा।
जायन्ते दन्तघर्षाश्च स गतायुर्न संशयः॥
दीपादिगन्धं नो वेत्ति त्रस्यत्यपि तथा निशि।
नात्मानं परनेत्रस्थं वीक्षते न स जीवति॥
पिधाय कर्णौ निर्घोषं न शृणोत्यात्मसम्भवम्।
नश्यते चाक्ष्णोर्ज्योतिर्यस्य सोऽपि न जीवति॥
स्वप्नेऽग्निं प्रविशेद्यस्तु न च निष्क्रमते पुनः।
जलप्रवेशादपि वा तदन्तं तस्य जीवितम्॥
उष्ट्रासभयानेन यः स्वप्ने दक्षिणां दिशम्।
प्रयाति तं विजानीयात् सद्यो मृत्युं नरेश्वरः॥
स्ववस्त्रममलं शुक्लं रक्तं पश्यत्यथाऽसितम्।
यः पुमान् मृत्युमासन्नं तस्यापि हि विनिर्दिशेत्॥
यैश्चाऽऽविनीतः सततं येऽस्य पूज्यतमा मताः।
तानेवावजानाति तानेव च विनिन्दति॥
देवान्नार्चयते वृद्धान् गुरून् विप्रांश्च निन्दति।
मात्रापित्रोरहङ्कारं योगिनां च महात्मनाम्॥
प्राप्ते काले तु विदुषस्तद् विज्ञेयं विचक्षणैः।
एवमादीन्यरिष्टानि ज्ञात्वा प्राज्ञो मतिं हरौ॥
कुर्यात्ततो भवेत्तस्य जीवितं मुक्तिरेव वा।
उत्क्रान्तिकाले संस्मृत्य पुनर्योगित्वमृच्छति॥
अक्षीणकर्मबन्धश्च योगवासनया तदा।
तस्मादसिद्धयोगेन सिद्धयोगेन वा पुनः॥
ज्ञेयान्यरिष्टानि तदा येनोत्क्रान्तौ न सीदति।
दृष्ट्वाऽरिष्टं तथा योगी त्यक्त्वा मरणजं भयम्॥
तत्स्वभावं तदाऽऽलोच्य योगं युञ्जीत तत्त्ववित्।
ततो मृत्युभयान्मुक्तो विरहेद्वा यथासुखम्॥

इति। अस्मादेव हेतोर्योगसिद्धिप्रस्तावेऽरिष्टेभ्यो वेति कथितम्। उपलक्षणमेतच्छायापुरुष[१]दर्शनस्यापि। तद्दर्शनप्रकारश्चोक्तस्तन्त्रे—

आकाशे विगताऽम्बुदे निशि सिते पक्षे पुनः प्रत्यहं
[२]भूमावापदमालललाटफलकं ह्येकाग्रचित्तश्चिरम्।
प्रातः पृष्ठगतेरवागनिमिषं छायाङ्गलेखां चिरं
दृष्ट्वोर्ध्वं नयनेन यत् सिततरं छायानरं पश्यति।
तत्कर्णास्यकरास्यपार्श्वहृदयाभावेक्षणेऽर्का १२ऽश्च ७ दिक् १०
भू १ रामाक्षि २ समा शिरो विगमतो मासांस्तु षड् जीवति॥
हृद्रन्ध्रदृष्ट्या मुनिसंख्यमासान् द्विदेहदृष्ट्या तु मृतिस्तदैव॥
सम्पूर्णदृष्ट्या तु न वर्षमध्ये रोगो मृतिर्वेति वदन्ति सत्यम्।

इति संक्षेपः[३] ॥ २२ ॥

चर्यायोगसाध्यां सिद्धिमाह—

मैत्र्यादिषु बलादीनि॥ २३ ॥

मैत्र्यादिष्विति। मैत्रीकरुणामुदितासु संयमाद् बलानि तासां मैत्र्यादीनामवन्ध्यानि वीर्याणि भवन्ति। यैर्योगी प्राणिमात्रस्य सुखकरः सुहृद्भवति। स्वस्य परस्य वा परेषु मैत्र्याद्यर्थं प्रयत्ननिरपेक्षो भवतीति यावत्। एवं करुणादिष्वपि बोध्यम्॥ २३ ॥

लक्ष्ययोगसाध्यं सिद्धियोगमाह—

बलेषु हस्तिबलादीनि॥ २४॥

बलेष्विति। हस्त्यादिबलेषु संयमात् तानि बलानि योगिनः प्रादुर्भवन्ति। योगजधर्मस्याचिन्त्यप्रभावत्वाच्चेति भावः॥ २४॥

शिवयोगसाध्यं सिद्धियोगमाह—

प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकष्टज्ञानम्॥ २५॥

प्रवृत्तीति। प्रवृत्तिर्ज्योतिष्मती प्रागुक्ता। तस्यां दृढायां य आलोकः सात्त्विकप्रकाशप्रसरो बुद्धेस्तस्य न्यासाद् विषयेषु योजनात् कः कीदृशः क्व कदेत्यादिप्रतिसन्धानरूपात् सूक्ष्मस्य परमाण्वादेर्व्यवहितस्य निध्यादेर्विप्रकृष्टस्य मेर्वन्तर्वर्त्तिनो

---

१. क ख घ — दर्शनस्य, ग — दर्शनादेः।
२. क ख घ — भूमौ, ग — नाभेः।
३. क ख घ — संक्षेपः, ग — शिवम्।

रसायनादेर्ज्ञानमुत्पद्यते। यथा चक्षुर्न्यासेन घटादीनामपरोक्षं भवति तद्वदित्यर्थः। एतेन श्रुतिषूक्तमेकविज्ञानेन सर्वविज्ञानं व्याख्यातम्। आत्मविषयकसंयमे सिद्धे सर्वेष्वन्येषु संयमापेक्षा नास्ति। तत्र तत्र संयमं विनैव आत्मसंयममाहात्म्यादेव सर्वेषां भानोत्पत्तेः। ननु कोऽयमात्मन्युत्कर्षो, यत्संयमेन सर्वेषामेव ज्ञानमिति चेच्छृणु। जीवस्य स्वामित्वं परमेश्वरस्य च [१]कारणत्वमुत्कर्षः। कारणता चास्योपष्टम्भकत्वेन। यथा पृथिवीं प्रति जलस्य। प्रकृते चोपष्टम्भकत्वं [२]साक्षित्वप्रेरकत्वादिरूपं कारणत्वमेवाश्रित्य श्रुतिषु मृदादिदृष्टान्ता एकविज्ञाने दर्शिताः। तत्रापि संयमबलेनैव मृदादिज्ञानात् सर्वतत्कार्यापरोक्षसम्भवाद् मृद्विकारत्वेन ज्ञानं तु नोत्कर्षाधायकमिति संक्षेपः॥ २५॥

संयमान्तरस्य सिद्धिमाह—

भुवनज्ञानं सूर्ये संयमात्॥ २६॥

भुवनेति। सूर्ये ब्रह्मलोकमार्गभूते सूर्यमण्डलान्तश्छिद्ररूपे द्वारे संयमात् [३]कथितप्रकारात् साक्षात्कृते सति भुवनज्ञानं भूर्भुवःस्वर्महर्जनस्तपःसत्यम्। अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालं चेति चतुर्दशभुवनानां साक्षात्कारो भवतीत्यर्थः। भुवनविस्तारो वर्णितः पुराणेषु यथा—

भूरादिसत्यान्तान्युपरितनानि, अतलादिपातालान्तान्यधस्तनानि। तत्रोपरितनानां सर्वेषामधस्थानं भूमिः। जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्कराख्यैः सप्तद्वीपैर्युक्तो भूर्लोको मेरुपृष्ठपर्यन्तं यस्य चतुराशीति[४]योजनोच्छ्रायो मूर्ध्नि द्वात्रिंशत्सहस्रयोजनविस्तारो मूले षोडशसाहस्रयोजनविस्तारः सुमेरुर्मध्ये सौवर्णः पर्वतराजः। तस्य पूर्वादिप्रदक्षिणक्रमेण राजतवैदूर्यस्फटिकहेममणिमयानि शृङ्गाणि। दक्षिणपार्श्वे चास्य जम्बूनामा वृक्षो यन्नाम्नायं लवणोदधिवेष्टितो भूमिभागो जम्बूद्वीपनामा भवति। तस्य सुमेरोः सूर्येण निरन्तरं प्रदक्षिणीकरणादवच्छेदभेदेन रात्रिन्दिवं लग्नमिव वर्तते। तथा तस्य मेरोरुत्तरदिशि नीलश्वेतशृङ्गवन्तस्त्रयः पर्वताः प्रत्येकं द्विसहस्रयोजनविस्ताराः। तत्र नीले वैदूर्यमये ब्रह्मर्षयः। श्वेते राजतमये देवासुराः शृङ्गवति हेमरत्नादिमये देवा एव सुरललनाभिः सह निवसन्ति। तेषां पर्वतानामवकाशेषु रमणकं हिरण्मयम् उत्तराः कुरव इति त्रीणि वर्षाणि प्रत्येकं नवयोजनसहस्रविस्ताराणि सन्ति। तत्रोत्तरकुरुषु सर्व-

---

१. क ग घ — **कारणत्वं**, ख — **करणत्वम्**।
२. क ख ग — **साक्षित्व०**, घ — **साक्षि०**।
३. क ख घ — **कथित०**, ग — **उक्त०**।
४. क ख घ — **योजन०**, ग — **सहस्रयोजन०**।

कामफला वृक्षाः मणिमयी सुखस्पर्शा[१] काञ्चनमयवालुका[२]वती भूमिः देवलोकच्युता देवकल्पास्त्रयोदशसहस्रवर्षायुषः सुरललनाकल्पाभिः सह विहरन्ति हिरण्मये यक्षानुगा मायाबलाः सदोत्सवमानसाः प्रियदर्शना एकादश[३]सहस्रायुषो हिरण्मय्यां स्वानुरूपाभिर्ललनाभिः सह विहरन्ति। रमणके सत्कर्मपुञ्जोपार्जितविग्रहाः श्रुताभिजनसम्पन्नाः सुप्रियदर्शना निःसपत्ना दशवर्षसहस्रायुषो मानवा नानाभोगैर्विहरन्ति। एवं मेरोः पूर्वदिशि माल्यवान् पर्वतस्तमेव सीमानं कृत्वा समुद्रपर्यन्तं भद्राश्व[४]नामका देशास्तन्नामकमेवैकं वर्षम्। तत्र माल्यवति बालखिल्यादिप्रभृतयो मुनीन्द्राः सिद्धाश्चोर्ध्वरेतस्का अहरहः सूर्यस्याभिमुखं गच्छन्तो निवसन्ति। भद्राश्वे महाबलास्तेजसा सम्पन्नाः श्वेताः पुरुषा दशवर्षसहस्रायुषो नृत्यगीतवादित्रकुशलाभिः कुसुमवर्णाभिश्चन्द्रप्रभाभिश्च ललनाभिः सह सिद्धचारणसेविते विशालवनादौ विहरन्ति। एवं मेरोः पश्चिमदिशि गन्धमादनः पर्वतस्तमेव सीमानं कृत्वा केतुमालनामका देशास्तन्नामकमेवैकं वर्षम्। तत्र गन्धमादने सानुगो यक्षराजः कुबेरोऽनुदिनं सुरललनाभिः सह हासगानादिना विहरति। केतुमाले सुवर्णवर्णाऽऽभा अनामया वीतशोका दशवर्षसहस्रायुषः स्वकर्मणा तत्र जातविग्रहा मानवा अप्सरोपमाभिर्ललनाभिः सह विहरन्ति। एवं तस्य मेरोर्दक्षिणदिशि निषेधहेमकूटहिमशैलास्त्रयः पर्वताः प्रत्येकद्विसहस्रयोजनविस्ताराः। तत्र निषधे सर्पनागगन्धर्वप्रभृतयो निवसन्ति। तेषां पर्वतानामवकाशेषु हरिवर्षं किम्पुरुषं भारतमिति त्रीणि वर्षाणि प्रत्येकं नवयोजनसहस्रविस्ताराणि सन्ति। तत्र हरिवर्षे प्रह्लादानुयायिनो दैत्यदानवाः श्रीनृसिंहादिना विविधानन्दाननुभवन्तो निवसन्ति। किंपुरुषे किम्पुरुषगन्धर्वादिभिः सह हनुमत्प्रभृतयो नानापुराणेतिहासादिभिः श्रीरामं गायन्तो दिव्योद्याननद्यादिषु विहरन्ति। भारते वर्षे स्वर्गनरकमोक्षाधिकारिणो मनुष्या विविधजातिभेदभिन्ना गङ्गायमुनासरस्वतीसरयूनर्मदागोदावरीकावेरीमहानदीगण्डकीपयोह्लादिनीजलपानस्नानादिनात्मनः कृतकृत्यतां सम्पादयन्तो विन्ध्यचित्रकूटकालञ्जरकामगिरिगोवर्धनरैवतकमलयश्रीशैलसह्याद्रिषु भगवद्भक्त्याऽऽनन्दानुभवेन कैवल्यपदमपि तृणीकुर्वन्तः सञ्चरन्ति महापुरुषाः। एवं विविधदुराशयाः कामक्रोधलोभहिंसासूयामदमात्सर्यादिभिरात्मनो वक्ष्यमाणाऽनेक-

---

१. क ख घ — **सुखस्पर्शा** उपलभ्यते, ग — **सुखस्पर्शा** नोपलभ्यते।

२. क ख ग — **वती०**, घ — **मती०**।

३. क ख ग — **सहस्र०**, घ — **सहस्रवर्ष०**।

४. क ख घ — **नामका देशास्तन्नामकमेवैकं वर्षं**, ग — **नामकं वर्षम्**।

नरकभागितां सम्पादयन्तो दुरात्मानः[१] कुललनाभिः क्षणभङ्गुराभिः सह विहरन्ति वाञ्छन्ति च। तेषां मोक्षो दुर्लभः। तस्माद्भारतं वर्षं श्रेष्ठतमं वर्णयन्ति धर्माधर्मव्यवस्थायाः सत्त्वादिति दिक्।

सुमेरोरधोभागेऽष्टादशसहस्त्रयोजनविस्तृतं नवममिलावृतं वर्षम्। तत्र च भवानीनाथाः स्त्रीगणा एव विहरन्ति। तत्र च भोगः पूर्णः। चतुर्दिशं मेरोरवष्टम्भगिरिषु मन्दरमेरुमन्दरसुपार्श्वकुमुदाख्येषु पयोमदिक्षुरसमिष्टजलह्रदान्वितेषु नन्दनचैत्ररथवैभ्राजकसर्वतोभद्राद्युपवनशोभितेषु वर्तमानविविधानेकवृक्षफललाभादिना [२]सुखम[३]नुभवन्ति। मेरोः पूर्वेण जठरदेवकूटौ, पश्चिमतः पवनपारियात्रौ, दक्षिणेन कैलासकरवीरौ, उत्तरतस्त्रिशृङ्गमकरौ। अष्टभिरेतैः परिस्तृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिर्मेरुः। तस्य शिरसि मनोवत्यमरावती तेजोवती संयमिनी कृष्णा अङ्गना श्रद्धावती महोदया यशोमती चेति नवपुरः। तत्र मध्यत उपक्लृप्ता भगवतः पुरी समचतुरस्त्रायां शातकौम्भीं वदन्ति। अन्यानि ब्रह्मेन्द्रादिदिक्पालानां पुराणि। तत्र भगवतो विष्णोस्त्रिविक्रमस्य पराक्रमाद् ब्रह्माण्डं भित्वा निःसृताः भगवच्चरणपङ्कजावनेजनेनारुणकिञ्जल्कोपरञ्जिताखिलजगदघमलापहोपस्पर्शनाऽमला गङ्गा भगवती स्वयं सीताऽलकनन्दा वक्षुभद्रेति चतुर्द्धा भिद्यमाना चतुर्दिशमभिस्पन्दती सागरं नदीपतिमभिनिविशति। तत्र सीता प्राच्यां, वंक्षुः प्रतीच्यां, भद्रा उत्तरस्याम्, अलकनन्दा भारते वर्षे हेमकूटादिमार्गेणागता जगत् पवित्रयति। यस्या नामग्रहणयात्रादर्शनस्पर्शनप्रवेशमज्जना[४]म्बुपानादिभिः श्रवणमननध्यानविधुरा विविधविषयानुशया दुरात्मानोऽपि मोक्षभाजो भवन्ति। तदेवं सुमेरुमादाय जम्बूद्वीपाख्यं स्थानं शतसहस्त्रमितम्। ततः सुमेरोश्चतुर्दिक्षु पञ्चाशद्योजनसहस्त्रेण परिसंख्यातम्। तत्र जम्बूद्वीपः पार्श्वद्वयमादाय द्विगुणेन लवणोदधिना वेष्टितः। ततो द्विगुणः प्लक्षाख्यो द्वीपः। तत्र शिवं वयसं सुभद्रं शान्तं क्षेमम् अमृतम् अभयमिति वर्षाणि। तेषु मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति शैलाः। अरुणानृम्णाङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेत्येता नद्यः। यासां जलोपस्पर्शेन निवृत्त[५]कल्मषाः सहस्त्रायुषो बहुप्रजाः सन्तः सूर्यमनुदिनं भजन्ते। स च [६]पार्श्वद्वय-

---

१. क ख घ — **दुरात्मानः**, ग — **दुरात्मनः**।
२. क ख घ — **सुखं** उपलभ्यते, ग — **सुखं** नोपलभ्यते।
३. क ख घ — **अनुभवन्ति**, ग — **भवति**।
४. क ख घ — **अम्बुपानादिभिः**, ग — **अम्बुपाननामाङ्कलिपिधारणादिभिः**।
५. क ख घ — **कल्मषाः**, ग — **मलाः**।
६. क ख घ — **पार्श्वद्वय०** उपलभ्यते, ग — **पार्श्वद्वय०** नोपलभ्यते।

स्वद्विगुणेन सुरोदधिनावृतः। तत्रापि सुरोचनं[१] सौमनस्यं रमणकं देववर्षं पारिभद्रम् आप्यायनम् अविज्ञातमिति सर्ववर्षाणि। शैलाश्च स्वरसः[२] शतशृङ्गो वामदेवः कुन्दः कुमुदः पुष्पवर्षः सहस्रस्तुतिरिति सप्तैव। नद्यश्च अनुमतिः सिनीवाली सरस्वती कुरुरजनी नन्दा राकेति सप्त। तासां जलोपस्पर्शेन पुरुषाः उक्तवीर्याः सोममनुदिनं भजन्ते। शाल्मलाद् द्विगुणः कुशद्वीपो घृतोदधिना पार्श्वद्वयमादाय स्वद्विगुणेन वेष्टितः। तत्रापि वसुवसुदानदृढरुचिनाभिगुप्तसत्य[३]कृतविविक्तनाभदेवाख्यानि वर्षाणि सप्तैव। शैलाश्च चक्रश्चतुशृङ्गः कपिल[४]श्चित्रःकूटो देवानीक ऊर्ध्वरोमा द्रविण इति सप्त। नद्यश्च घृतकुल्या रसकुल्या मधुकुल्या मित्रविन्दा देवगर्भा घृतच्युता मन्त्रमालेति सप्त। यासां जलैस्तथावीर्यास्तृप्ताश्च भगवन्तं जातवेदस्वरूपिणं यजन्ते। कुशात्[५] क्रौञ्चद्वीपो द्विगुणः पार्श्वद्वयमादाय स्वद्विगुणेन क्षीरोदधिना वेष्टितः। तत्रापि आमो मधुरुहो मेषपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति वर्षाणि सप्तैव। शैलाश्च शुक्रो वर्द्धमानो भोजन उपबर्हणो नन्दो नन्दनः सर्वतोभद्रमिति सप्त। नद्यश्च अभया अमृतौघा अर्वका तीर्थवती रूपवती पवित्रवती [६]शुक्लीति सप्तैव। यासां जलैरुक्तवीर्याः पुरुषाः वरुणमेव भजन्ते[७]। क्रौञ्चद्वीपाद् द्विगुणः शाकद्वीपः पार्श्वद्वयमादाय दधिमण्डो दधिना परीतस्तत्रापि पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधारानामभिः प्रसिद्धानि वर्षाणि सप्तैव। शैलाश्च ईशान उरुशृङ्गो बलभद्रः शतकेशरः सहस्रस्रोतो देवपालो महानस इति सप्तैव। नद्यश्च अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चनदी सहस्रस्तुतिर्निजधृतिः सप्तैव। तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानः प्राणं समाधिना यजन्ते। शाकद्वीपात् द्विगुणः पुष्करद्वीपः पार्श्वद्वयमादाय द्विगुणेन स्वादूदकेन परीतः। तस्मिन् द्वीपे मानसोत्तर[८]नामक एवाचलोऽयुतयोजनोच्छ्रायायामोऽर्वाचीनपराचीनवर्षयोर्मर्यादाभूतस्तिष्ठति। यस्मिन् चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिन्द्रादीनाम्।

१. क ख — सुरोचनम्, ग घ — सुरोवनम्।
२. क — स्वरसः, ख ग घ — सुरसः।
३. क ख — कृत०, ग घ — व्रत०।
४. क ख — चित्रःकूटः, ग घ — चित्रकूटः।
५. क ख — कुशात्, ग घ — कुशद्वीपात्।
६. क ख घ — शुक्ला, ग — शुक्ली।
७. क ख — भजन्ते, ग घ — यजन्ते।
८. क ख — नामकः, ग — नामैकः, घ — नामकैकः।

[1]तदुपरिष्टात् सूर्यरथस्य मेरुपरिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति। तत्रत्या भगवन्तं ब्रह्माणं कर्मणा भजन्ते[2]। एतेषु द्वीपेषु [3]सहजसिद्धाः सन्ति। क्षीरोदात् परतः सप्तलक्षोत्तरा सार्द्धकोटिपरिमिता भूः। तत्रापि लोकाः सन्ति। अनन्तरं लोकालोकपर्वतः। तदुपरि दिक्पालगजाः सन्ति। ततो बहिरुर्वरिता काञ्चनमयलौकिकीदेवक्रीडाभूमिः। सेयं वसुमती भूमिः सर्वापि पञ्चाशद्योजनकोटिपरिमिता आवरणेन शतकोटिविस्तृता अण्डस्य मध्ये संक्षिप्ता। भूर्लोकस्य सर्वाधस्तात् पातालं तत्र वासुकिप्रभृतयो नागाधिपतयः सपरिवारा निवसन्ति। तदुपरि रसातलम्। तत्र दैतेयदानवनिवातकवचप्रभृतयो निवसन्ति। तदुपरि महातलम्। तत्र तक्षकप्रभृतयो निवसन्ति। तदुपरि तलातलम्। तत्र मयो मायावी तदनुगाश्च तिष्ठन्ति। तदुपरि सुतलम्। तत्र भगवता स्वीयत्वेनानुगृहीतो बलिरात्मनिवेदी परमभागवतः सगणस्तिष्ठति। तदुपरि वितलम्। तत्र हाटकेश्वरो भवान्या सह मिथुनीभूय विहरति। यतः प्रवृत्ता हाटकी नाम नदी। एवं तत्र तदीया भूतप्रेतपिशाचापस्मारब्रह्मराक्षसकूष्माण्डविनायकादयो निवसन्ति। तदुपरि अतलम्। यत्र मयपुत्रादयोऽसुरा निवसन्ति। तत्र[4] ते सप्तपाताललोकाः स्वर्गादप्यधिक[5]सुखसाधनाः। एतेषामुपरि जलावरणः।

तदुपरि भूमेरधस्ताद् विविधदुःखमयास्तामिस्रान्धतामिस्ररौरवकुम्भीपाक[6]मूलाऽसिपत्रवनसूकरमुखाऽन्धकूपक्रिमिभोजनमदशतप्रभूमिवज्रकण्टकशाल्मलीवैतरणीपयोदप्राणरोधविशसनलालाभक्षणसारमेयोदनमदीचिरयपानक्षारकर्दमरक्षोगणभोजनशूलप्रोतदन्दशूकावटनिरोधनपर्यावर्त्तनसूचिमुखप्रभृतयो नरकाः सन्ति। तेषु च परवित्तकलत्रापहारकपरवञ्चकभूतद्रोहकुटुम्बादिपोषकदेहम्भरपशुपक्षिप्राणपीडकपितृगुर्वादिविद्वेषकपाखण्डधर्मपोषकवृथादण्डप्रदाविवेकिमत्कुणाभिघातकस्वयमेवमिष्टान्नभुजो बलात्कारेण परस्वाऽपहारकपरवधूरतधर्मनाशकवृषलीपतिमृगयासक्तदाम्भिकयाज्ञिकसवर्णभार्यागामिगरदाग्निदमिथ्यावादिसुरापायिविद्यादिमद्[7]द्वेषिभूतोद्वेजकातिथिविद्वेषककृपणपिशुनगणिकागामिविपरीतधर्माचारिधर्मानभिरुचिप्रभृतयो नानाविधयातनाभिर्या-

---

१. क ख — तत्, ग घ — यत्।
२. क ख घ — भजन्ते, ग — यजन्ते।
३. क — सहसिद्धाः, ख ग घ — सहजसिद्धाः।
४. क ख ग — तत्र ते, घ — त एते।
५. क ख घ — सुखसाधनाः, ग — सुखाः।
६. क — मूल० ख ग घ — कालसूत्र०।
७. क ख घ — द्वेषि०, ग — द्वेष०।

त्यमाना हाहेति रुदन्तो वसन्ति। तदुपरि इयं वर्णिता भूमिः। एतस्या उपर्यन्तरिक्षाऽपर-पर्यायो भुवर्लोकः। तत्र ग्रहनक्षत्रतारका ज्योतिष्चक्रे निबद्धाः सञ्चरन्ति।

ननु मेरोरुपरि भुवर्लोकः। तत्र ज्योतिश्चक्रं भ्रमतीति न युक्तम्। तथा सति मेरुणा ज्योतिश्चक्रावरणासम्भवादवच्छेदभेदेन रात्रिन्दिनभेदेन व्यवस्था न स्यादिति चेन्न। वृक्षे-णेव पार्श्वान्तरेण मेरोरेकपार्श्वस्थसूर्यादेर्व्यवधानसम्भवेन रात्रिन्दिनव्यवस्थाया उपपत्तेः।

तदुपरि स्वर्लोको माहेन्द्रापरपर्यायः। तत्र षड् देवनिकायाः त्रिदशाः। अग्नि-ष्वात्ताः याम्याः तुषिताः अपरिनिर्मितवशवर्त्तिनः परिनिर्मितवशवर्त्तिनश्चेति सर्वे संकल्प-सिद्धाः। अणिमाद्यैश्वर्योपपन्नाः स्वेच्छोपात्तविग्रहाः कल्पायुषः कामलम्पटा निवसन्ति। तदुपरि महर्लोके प्राजापत्या देवसमूहाः कुमुदा ऋभवाः प्रतर्दना अजनाभा अमिताभा[१] इति पञ्चविधा इत्येते महाभूतवशिनो ध्यानाहाराः कल्पसहस्रायुषो निवसन्ति। तदुपरि जनलोकः। तत्र भूतेन्द्रियवशिनो ब्रह्मपुरोहिताः ब्रह्मकायिकाः ब्रह्ममहाकायिका अमरा इत्येते चतुर्विधा द्विगुणद्विगुणोत्तरोत्तरायुषो निवसन्ति। तदुपरि तपोलोकः। तत्राहंकारवशिनस्त्रिविधा देवनिकायाः अभास्वरा महाभास्वराः सत्यमहाभास्वरा इत्येते देवसमूहा द्विगुणद्विगुणोत्तरायुषः स्वेच्छया स्वपरान्य-परस्योपान्तचित्ता ऊर्ध्वरेतसो निवसन्ति गच्छन्ति च। तदुपरि सत्यलोकः। तत्राकृत-गृहनिर्माणा आत्मारामाः प्रधानवशिनो यावत्सर्गायुषोऽच्युताः शुद्धनिवासाः सत्याभाः संज्ञासंज्ञिनश्च क्रमेण सवितर्कसविचारानन्दास्मितायोगिन उपर्युपरि निवसन्ति गच्छन्ति च परमहंसास्तल्लोकवासिनः परोक्षविद्वांसः प्रणवाद्युपासकाश्च। ते च तत्र गतास्ततः पुनर्नावर्त्तन्ते। किन्तु तेनैव [२]सहाधिकाराः सन्तो मुच्यन्ते।

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे॥

इत्यादिश्रुतेस्तदेतत्सर्वं ब्रह्माण्डमध्ये संक्षिप्तं ब्रह्माण्डं च प्रधानस्या[३]ऽवयवो यथाकाशे खद्योतः। तदुक्तं विष्णुपुराणे प्रकृतिं प्रकृत्य—

अण्डानान्तु सहस्राणां सहस्राण्ययुतानि च।
ईदृशानां तथा तत्र कोटिकोटिशतानि चेति॥

एतद्बहिश्च प्रकृत्यावरणम्। तत्र भवप्रत्यया असंप्रज्ञातयोगिनो निवसन्ति। उपायप्रत्ययास्तु कैवल्यपदे तिष्ठन्ति।

---

१. क — **अमिताभाः**, ख घ — **प्रमिताभाः**, ग — **प्रचिताभाः**।

२. क ख — **सहाधिकाराः सन्तः**, ग — **सहाधिकारां ते**, घ — **सहाधिकारां तेषु**।

३. क ख ग — **अवयवः**, घ — **अणुरवयवः**।

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
अनन्यचेताः सततं यो मां स्मरति नित्यशः॥
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः।

इत्यादि वदता भगवतोपायप्रत्ययाऽसंप्रज्ञातयोगजप्रमाया एव कैवल्यहेतुत्व-ज्ञापनादिति संक्षेपः। ज्योतिष्शास्त्रे तु पाञ्चभौतिको वर्त्तुलः कन्दुकाकारश्चन्द्रबुधशुक्र-सूर्यमङ्गलबृहस्पतिशनिनक्षत्रकक्षावृतैर्वृतः समन्ताद्देवमनुष्यदैत्यैः समेतः पर्वताराम-ग्रामचैत्यचयैः केसरैः कुसुम इव चितो नान्याधारः स्वशक्त्यैव पञ्चसहस्रयोजनपरिमित आकर्षणशक्तिमान् भूपिण्ड आकाशे नियतं तिष्ठति। आकाशे एव वर्त्तमानो भूपिण्डो निरन्तरमधो यातीति बौद्धाः। तत्र ऊर्ध्वक्षिप्तशरादेर्भूप्राप्त्यनापत्तिप्रसङ्गात्। न च भूमे-र्मन्दा शरादेश्च शीघ्रा गतिरिति वाच्यम्। गुरोः शीघ्र[१]पतनस्य लघोर्मन्दपतनस्यानुभव-सिद्धत्वात्।

ननु भूः सर्वैरपि समैवानुभूयते न कन्दुकाकारेति चेन्न। कन्दुके पिपीलिकादेरे-वाल्पकायानां साम्यभ्रमसम्भवात्। भूसाम्ये देवानामिव मनुष्याणामपि सूर्यदर्शनापत्तिः। स्वर्णमयमेरुप्रतिबिम्बितसूर्येण रात्रिविलोपापत्तिः। उत्तरायाः प्राचीव्यवहारापत्तिश्चेत्या-दयो दोषा आकरे एवोद्भाविताः। अत्र भूगोलस्योत्तरार्द्धं जम्बूद्वीपः।

तत्र भूमध्ये लङ्का दक्षिणे, पूर्वे यमकोटिः, पश्चिमे रोमकः, अधः [२]सिद्धपुरमिति पुरचतुष्टयम्। तेषामुत्तरे मेरुर्दक्षिणे वडवानलः। तेषु पुरेषु लङ्कायां[३] उत्तरतो हिमवान् गिरिः। तन्मध्ये भारतखण्डः। तदुत्तरे हेमकूटः। तन्मध्ये किन्नरखण्डः। तस्योपरि निषधस्तन्मध्ये हरिखण्डः। एवं सिद्धपुरादु[४]त्तरः शृङ्गवान् पर्वतः। तन्मध्ये कुरुखण्डः ततः श्वेतगिरिः। तन्मध्ये हिरण्मयः खण्डः। ततो नीलगिरिः। तन्मध्ये [५]रम्यखण्ड इति। अथ यमकोटेरुत्तरतो माल्यवान् गिरिः। निषधनीलपर्यन्तदैर्घ्यस्तस्य जलधेश्च मध्ये भद्राश्वखण्डः। एवं [६]रामकादुत्तरतो गन्धमादनः। तस्य जलधेश्च मध्ये केतुमालः खण्डः। एवं निषधनीलमाल्यवद्गन्धमादनैरावृतमिलावृतं नाम [७]भवखण्डम्। सा स्वर्गभूमिः।

---

१. क ख घ — **पतनस्य**, ग — **पातस्य**।
२. क ख घ — **सिद्धपुरमिति पुरचतुष्टयं**, ग — **सिद्धपुरचतुष्टयम्**।
३. क ग घ — **लङ्कायां**, ख — **लङ्कायाः**।
४. क ख — **उत्तरः**, ग घ — **उत्तरतः**।
५. क ख घ — **रम्य०**, ग — **रम्यक०**।
६. क ख घ — **रामकात्**, ग — **रोमकात्**।
७. क ख — **भव०**, ग घ — **नवमम्**।

तत्र मेरुः कनकरत्नमयः। तस्य शिखरत्रयम्। तेषु ब्रह्मविष्णुशिवपुराणि। शिखराणामधस्तादिन्द्राद्यष्टलोकपालानां पुराणि। मेरोः पूर्वं मन्दरगिरौ कदम्बः केतुवृक्षश्चैत्ररथं वनमरुणोदं सरः। दक्षिणगन्धशैलगिरौ जम्बूकेतुवृक्षः नन्दनं वनं मानसं सरः। पश्चिमे विपुलशैले केतुवृक्षो वटो धृतिवनं महाह्रदं सरः। उत्तरे सुपार्श्वशैले पिप्पलः केतुवृक्षो वैभ्राजं वनं मानसं सरः। मेरौ विष्णुपदात्पतिता गङ्गा च [1]चतुर्भिर्नामभिश्चतुर्धा याति। तत्र सीताख्या भद्राश्वम्, अलकनन्दा भारतं, चक्षुः केतुमालं, भद्रा चोत्तरान् कुरून् अखिलपावनाय याति। ऐन्द्रः, कसेरुः, ताम्रपर्णः, गभस्तिमान्, कुमारिकाखण्डः, नागः, सौम्यः, हिमवारणः, गान्धर्व इति [2]भारतखण्डेऽपि नवखण्डाः। तत्र वर्णाश्रमव्यवस्था कुमारिकाखण्ड एव। माहेन्द्रशुक्तिप्रलयर्क्षकपारियात्रसह्यविन्ध्य इति सप्तकुलाऽचलाः। भारतवर्षस्य लङ्कासमीपे कुमारिकाखण्डो इति भूर्लोकस्तस्मादुत्तरे भुवर्लोकः। मेरुः स्वर्लोकस्तत्रैवोत्तरोत्तरं महर्जनस्तपःसत्यमित्युत्तरार्द्धव्यवस्था। पूर्वार्द्धे च क्षारोदधेर्दक्षिणे शाकद्वीपः। ततो दुग्धसिन्धुर्यस्माद्रत्नानि। ततः शाल्मलीद्वीपस्ततो दधिसिन्धुस्ततः कुशद्वीपस्ततो घृतसिन्धुस्ततः क्रौञ्चद्वीपस्तत इक्षुरससिन्धुस्ततो गोमेदद्वीपस्ततो मद्यसिन्धुस्ततः पुष्करद्वीपस्ततः स्वादूदकसिन्धुस्तदन्तर्वडवानलस्तन्निकटे नरकाणि पृथिवीपुटानि सप्त पातालानीति भुवनसंस्था। सा पुराणविरुद्धेत्यत्र केचित्। ग्रहचारादेर्ज्योतिःशास्त्ररीत्यैवानुभवात् पुराणमहत्त्वमुपासनापरम्। कोटिशब्दस्य नानार्थत्वाच्छतवाचकत्वं वेति समादधुरिति दिक्॥ २६॥

पुराणमते[3] संयमान्तरस्य सिद्धिमाह—

चन्द्रे ताराव्यूहज्ञानम्॥ २७॥

चन्द्र इति। चन्द्रे संयमात् ताराणां नक्षत्रादिज्योतिषां यो व्यूहः सन्निवेशविशेषस्तस्य साक्षात्कारो भवतीत्यर्थः। सूर्यस्य नक्षत्राद्यभिभावकत्वात्तत्संयमात् साक्षात्कारकाले नक्षत्रादिज्ञानं कठिनमिति मत्वा पृथगुपायः कथितः[4]॥ २७॥

नक्षत्रादिज्ञानफलमाह—

ध्रुवे तद्गतिज्ञानम्॥ २८॥

ध्रुव इति। तारादि[5]रूपज्ञानानन्तरं ध्रुवे निश्चले ज्योतिषां प्रधाने संयमात् तासां

---

१. क ख — **चतुर्भिर्नामभिश्चतुर्धा याति** उपलभ्यते, ग घ — **चतुर्भिः....याति** नोपलभ्यते।
२. क ख — **भारत०**, ग घ — **भरत०**।
३. क ख — **पुराणमते** उपलभ्यते, ग घ — **पुराणमते** नोपलभ्यते।
४. क ख घ — **कथितः**, ग — **उक्तः**।
५. क ख घ — **रूप०**, ग — **स्वरूप०**।

ताराणां या गतिः प्रत्येकं [१]नियतकाला नियतदेशा च तस्याम्। इयं तारा अयं ग्रह [२]इयतिकालेऽमुकराशिं यास्यति इत्यादिसाक्षात्कारो भवतीत्यर्थः ॥ २८ ॥

बाह्यसिद्धीरुक्त्वान्तःसिद्धीराह—

नाभिचक्रे कायव्यूहज्ञानम् ॥ २९ ॥

नाभीति। शरीरमध्यवर्तिनाभिकन्दरूपं चक्रं कदलीमूलवदादावुत्पन्नं यतः शाखापल्लवादिवच्छिरःपादाऽऽदिकमवयवजातम् ऊर्ध्वमधश्चाविर्भवति। तस्मिन्नाभिचक्रे संयमात् साक्षात्कृते सति कायस्थं पदार्थ[३]समूहं रसमलधातुनाडीजीवानामवस्थानं सञ्चारं च जानाति। एतस्मिन् ज्ञाते जीवस्य देहान्तरे प्रवेशमपि जानातीत्यर्थः ॥ २९ ॥

संयमान्तरस्य सिद्धिमाह—

कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥ ३० ॥

कण्ठेति। जिह्वाया अधस्ताज्जिह्वातन्तुः। ततोऽधस्तात् कण्ठः। कण्ठादधस्तात् कूप इव कूपः [४]पुरःपर्यन्तं कूपाकारश्छिद्रम्। तत्र संयमादशेषविशेषतः साक्षात्कृते सति क्षुत्पिपासानिवृत्तिर्भवतीत्यर्थः ॥ ३० ॥

संयमान्तरस्य सिद्धिमाह—

कूर्मनाड्यां स्थैर्यम् ॥ ३१ ॥

कूर्मेति। कण्ठकूपस्याधस्ताद् उरसि कुण्डलितसर्प इव[५] स्थिततया कूर्माकारं हृदयपुण्डरीकाख्यं नाडीचक्रं कूर्मनाडीशब्दाभिधेयम्। तस्मिन् संयमाच्चित्तस्य स्थैर्यमचापल्यं सिद्ध्यतीत्यर्थः।

यदिदं ब्रह्मपुरं दहरं पुण्डरीकं वेश्म।

इति श्रुत्या ब्रह्मवेश्मत्वेन प्रतिपादिते तस्मिन् प्रविष्टचित्तस्यानन्दविशेषलाभेन नान्यत्र मनो गच्छतीति भावः ॥ ३१ ॥

संयमान्तरस्य सिद्धिमाह—

मूर्द्धज्योतिषि सिद्धदर्शनम् ॥ ३२ ॥

मूर्द्धेति। [६]ब्रह्मरन्ध्रस्थे स्वप्रकाशरूपे ज्योतिषि संयमात् सिद्धदर्शनम्। सिद्धानां

---

१. क ख घ — **नियतकाला नियतदेशा**, ग — **नियतदेशकालाः**।
२. क — **इयति काले**, ख ग — **इयत्ता कालेन**, घ — **इयत्ता काले**।
३. क ख — **समूहं**, ग — **व्यूहं**, घ — **समूह०**।
४. क ख — **पुरः**, ग घ — **उरः**।
५. क ख — **इव**, ग घ — **वत्**।
६. ग घ — **मूर्द्धज्योतिषि** [**ब्रह्मरन्ध्रस्थे** प्राक्] उपलभ्यते, क ख — **मूर्द्धज्योतिषि** नोपलभ्यते।

द्यावापृथिव्योरन्तरालवर्त्तिनां दिव्यपुरुषाणां प्रमाणान्तरैरदृश्यमानानां दर्शनं साक्षात्कारो भवतीत्यर्थः ॥ ३२ ॥

सर्वज्ञत्वे उपायान्तरमाह—

प्रातिभाद्वा सर्वम् ॥ ३३ ॥

प्रतिभादिति। विवेकख्यातिर्हि प्रसंख्यानं संसारतरणोपायः। तदर्थं संयमे क्रियमाणे विवेकख्यातिसूचकं प्रातिभम् उपदेश[1]नैरपेक्ष्येण यथार्थज्ञानशक्तिरूपप्रतिभोत्थम[2]नौपदेशिकं ज्ञानं सर्वार्थविषयकं भवति। तज्ज्ञानबलात् पूर्वोक्तसूर्यादिसंयमान्तरं विनापि योगी सर्वं जानातीत्यर्थः। यथा सूर्योदयसूचकारुणप्रभया लोकः सर्वं पश्यति॥ ३३ ॥

संयमस्याऽवान्तरसिद्धय उक्ताः। इदानीं सत्त्वपुरुषान्यताख्यातिरूपां मुख्यां सिद्धिं विवक्षुरादौ तत्संयमहेतुभूतायाश्चित्तसंविदः कारणमाह—

हृदये चित्तसंवित् ॥ ३४ ॥

हृदय इति। हृदयं परमात्मसिंहासनकल्पं चित्तस्थानमधोमुखं हृत्[3]पङ्कजम्। तस्मिन् संयमात् सवासनस्य स्वपरचित्तस्य साक्षात्कारो भवतीत्यर्थः ॥ ३४ ॥

चित्ते साक्षात्कृते तद्विवेकेनात्मज्ञानं भवतीति क्रमानुसारेणाह—

सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थात् स्वार्थसंयमात् पुरुषज्ञानम् ॥ ३५ ॥

सत्त्वेति। सत्त्वाधिक्यात् सत्त्वं बुद्धिः पुरुषो भोक्ता सच्चिद्रूपः पुष्करपलाशव[4]न्निर्लेपः। अत एव तयोरत्यन्तासंकीर्णयोरत्यन्तभिन्नयोः सादृश्यादिनाप्यसंभाविताभेदयोरिति यावत्। एतयोर्यः प्रत्ययाविवेकः प्रत्यययोर्विविच्याग्रहणं सुखादिमती विषयाद्याकारा वृत्तिरन्तःकरणस्य। तत्र भासकांशः प्रत्ययः पुरुषस्येत्येवं विशिष्य भास्यभासकभावेन पृथग्ग्रहणमिति यावत्। भोगः असमाप्ताधिकारस्यान्तःकरणस्य परिणामे हेतुत्वाद्भोगः। स्वस्य साक्षित्वमात्राज्ञानेनाकृतार्थपुरुषस्याभिमानहेतुत्वाद्भोगः। अत एव तयोः सांकर्यम्। आध्यासिकाऽभेदः पुनः पुनः संसार[5]संपादकमतोऽस्तीति

---

१. ग — **नवनवोल्लेख०** [**नैरपेक्ष्येण** पश्चात्] उपलभ्यते, क ख घ — **नव....**नोपलभ्यते।

२. क ख घ — **अनौपदेशिकं** उपलभ्यते, ग — **अनौपदेशिकं** नोपलभ्यते।

३. क ख — **पङ्कजं**, ग घ — **पद्मम्**।

४. क ख घ — **निर्लेपः**, ग — **निर्लिप्तः**।

५. क — **संपादकमतः**, ख ग — **संपादकः**, घ — **संपादकम्**।

तयोर्मध्ये परार्थात् पुरुषभोगसंपादकादन्तःकरणविवेकेन स्वार्थे भासकरूपे साक्षिप्रत्यये संयमात् साक्षात्कृते सति परिपूर्णत्वादिधर्मैः पुरुषस्याविप्लवः साक्षात्कारो भवतीत्यर्थः। यदनन्तरं द्वैत[१]ज्ञानं न पश्यति॥ ३५॥

अस्यैव संयमस्य फलान्तरमाह—

ततः प्रातिभं श्रावणवेदनादर्शास्वादवार्ता जायन्ते॥ ३६॥

तत इति। ततः पुरुषसंयमात् प्रातिभं पूर्वोक्तमनौपदेशिकं श्रावणं श्रोत्रेन्द्रियजं, वेदना त्वगिन्द्रियजम्, आदर्शश्चाक्षुषम्, आस्वादो रासनं, वार्ता घ्राणजम्। इमानि दिव्यशब्दस्पर्शरूपरसगन्धविषयकाणि ज्ञानान्यपि भवन्ति, न पुरुषज्ञानमात्रमित्यर्थः। एतेन विविदिषोरलौकिकविषयानुभवा[२]र्थः। [३]पृथक्कृतस्य योगोऽनावश्यकः पुरुषसंयमेनैव तत्सिद्धेरिति ज्ञापितम्।

अथवा पुरुषसाक्षात्कारस्य न सर्वपरोक्षज्ञानमात्रं फलं, किन्तु परोक्षमपरोक्षं चेति द्विविधमपि ज्ञानं भवतीत्याह—**ततः प्रातिभे**ति। ततः पुरुषसाक्षात्कारात् प्रातिभं प्रतिभामात्रसहकारेण जातं परोक्षं श्रावणं श्रोत्रेन्द्रियसहकारेण जातम्। एवं वेदनादिकमपि बोध्यम्। कृतात्मसाक्षात्कारस्य तत्तदर्थसाक्षात्कारार्थं भूतभौतिकानि प्रणिधानमात्रेणोपस्थितानि भवन्ति। एतेन योगिनो या सिद्धिः सा सुतरां योगसाध्यब्रह्मापरोक्षप्रमावतो भवत्येवेति ज्ञापितम्। तथा च यस्येत्थं श्रुतिसिद्धं सर्वविज्ञानं स एवाऽपरोक्षप्रमावानिति निश्चीयते इति भावः॥ ३६॥

ननु तर्ह्ययं योगी[४] कृतकृत्यस्तत्राह—

ते समाधावुपसर्गा व्युत्थाने सिद्धयः॥ ३७॥

त इति। ते प्रातिभादयः फलविशेषाः समाधौ निःश्रेयसफले असम्प्रज्ञाते उपसर्गाः। हर्षविस्मयादिद्वारा शैथिल्यसम्पादनविघ्नरूपाः। अतो मुक्त्यर्थी तानुपेक्षेत। न ह्यात्मसाक्षात्कारं विना सिद्धिकोटिभिः कृतकृत्यता भवति। उक्तं च भगवता—

एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत।

इति। अत एव वसिष्ठ आह—

सर्वेच्छाजालसंशान्तावात्मलाभोदयो हि यः।

---

१. क — ज्ञानम्, ख ग घ — जातम्।
२. क ख — **अर्थः**, ग घ — **अर्थम्**।
३. क ख — **पृथक्कृतस्य योगः**, ग घ — **पृथक् लक्ष्ययोगः**।
४. ग — **सिद्धिभिरेव** [योगी पश्चात्] उपलभ्यते, क ख घ — **सिद्धिभिरेव** नोपलभ्यते।

स कथं सिद्धिवाञ्छायां मग्नचित्तेन लभ्यते॥

न केचन जगद्भावास्तत्त्वज्ञं रञ्जयन्त्यमी।

नागरं नागरीकान्तं कुग्रामललना इव, इति॥

तर्हि तत्साधननिरूपणं व्यर्थम्? तत्राह—**व्युत्थान** इति। व्युत्थाने व्यवहार-दशायां सिद्धयः पुमर्थरूपा भवन्ति। अतस्तन्निरूपणं न व्यर्थम्॥ ३७॥

तदेवं ज्ञानादिरूपाः संयमसिद्धीः प्रदर्श्य क्रियारूपा अपि विभूतयः संयम-फलान्याह—

बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः॥ ३८॥

बन्धेति। सर्वत्र व्याप्तिशीलस्य चित्तस्य स्वशरीरमात्रे संकोचेन स्थितिर्बन्धः। तस्य कारणं धर्माधर्मौ तयोः संयमेन शैथिल्यं दृढबन्धनाऽक्षमता भवति। प्रचारसंवेदनम् अपाननाड्या एवम्प्रकारेण चित्तं शरीरे प्रविशति निर्गच्छति चेत्यादिविशेषैश्चित्त-गतिसाक्षात्कारो भवति। तथा च बन्धकरज्जुनाशे मार्गज्ञस्य देशान्तर इव चित्तस्य योगिचित्तस्य परशरीरावेशः परकाये मृते जीविते वा प्रवेशो भवति। प्रचारे ज्ञाते योगी स्वशरीरान्निष्कृष्य चित्तं शरीरान्तरे प्रक्षिपतीति यावत्। प्रक्षिप्तं चित्तं चेन्द्रियाण्यनुपतन्ति मधुकरराजमिव मक्षिकाः॥ ३८॥

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च॥ ३९॥

उदानेति। द्वयी खल्विन्द्रियाणां प्रवृत्तिर्बाह्या आभ्यन्तरी च। आद्या रूपाद्या-लोचनरूपा च। अन्त्या जीवनयोनियत्नरूपा सर्वकरणसाधारणी। तस्याः क्रियाभेदात् प्राणादिभिः संज्ञाभिर्व्यपदेशः। तत्र नासिकाग्रादाहृदयं स्थितः प्राणः। आनाभेरापादतलं मलापनयनादपानः। नाभिप्रदेशं परिवेष्ट्य भुक्तस्य समनयनात् समानः। देहे व्यापनाद् व्यानः। आनासादाशिरोवृत्ति उदान उत्क्रान्तिहेतुः। तत्र उदानस्य संयमेन जयादितरेषां वायूनां निरोधादुदानभावाज्जले महानद्यादौ पङ्के कर्दमे कण्टकेषु च योगिनोऽतिलघुत्वात् तूलपिण्डवदसंसर्गो भवति। उत्क्रान्तिश्च स्वेच्छया मरणं च भवति लभते इत्यर्थः॥ ३९॥

सिद्ध्यन्तरमाह—

समानजयाज्ज्वलनम्॥ ४०॥

समानेति। नाभिनिकटस्थाग्निव्यापिनः समानस्य जयात् संयमेन वशीकरणाद् अग्नेर्ज्वलनं दीप्तिर्भवतीत्यर्थः। समानेनाविष्टो वह्निर्मन्दस्तिष्ठति। समानजये तु निरावृतः सन् प्रदीप्तो भवतीति तत्तेजसा योगी ज्वलन्निव प्रतिभाति इति यावत्॥ ४०॥

संयमान्तरस्य सिद्धिमाह—

श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम्॥ ४१॥

श्रोत्रेति। उपलक्षणमेतच्चक्षुस्तेजःप्रभृतीनामपि ज्ञेयम्। तथा च तयोस्तयोः सम्बन्धेष्वाश्रयाश्रयिभावादिलक्षणेषु संयमादुक्तप्रकाराद्दिव्यातीन्द्रियाणि दिव्यशब्दस्पर्शरूपरसगन्धग्राहकाणि श्रोतृत्वगक्षिरसनघ्राणाख्यानि भवन्ति यैर्योगी यथेष्टं व्यवहरतीत्यर्थः॥ ४१॥

संयमान्तरस्य सिद्धिमाह—

कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम्॥ ४२॥

कायेति। कायः पाञ्चभौतिकः स्थूलदेहः। आकाशं शब्दतन्मात्रकार्यम्। तयोः सम्बन्धो व्याप्यव्यापकभावः। आकाशोऽवकाशप्रदातृत्वादिहेतुर्व्यापकः। ततो न्यूनं शरीरम्। तच्च खद्योतकल्पं व्याप्यमिति तस्मिन् सम्बन्धे संयमात् [1]कथितप्रकारात् लघुतूलसमापत्तेश्च लघुतूलादि[2]समताभावनातश्च लघुत्वप्राप्त्या योगिन आकाशे गमनम् ऊर्णनाभेस्तन्तुजालेनेवादित्यरश्मिभिः स्वेच्छया यथेष्टं सञ्चारो[3] भवतीत्यर्थः॥ ४२॥

संयमान्तरस्य सिद्धिमाह—

बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः॥ ४३॥

बहिरिरिति। देहे साहङ्कारस्य शरीरसापेक्षा स्वशरीरस्येव बहिर्वस्तूनां सङ्कल्पादिवशता विदेहा सिद्धिः कल्पितेत्युच्यते। या तु शरीरे निरहङ्कारस्य स्वशरीरनैरपेक्ष्येण परशरीरादावपि मनसो बहिर्वस्तूनां सङ्कल्पादिवशता सा महाविदेहाख्या सिद्धिरकल्पितेत्युच्यते। सेयं महाविदेहाख्या सिद्धिः। मनसो बहिरकल्पिता वृत्तिर्योगशास्त्रोक्तस्वगोचरसंयमाद्भवति। ततः शरीरे अहम्भावत्यागादिसंयमात् प्रकाशावरणक्षयः प्रकाशात्मनो बुद्धिसत्त्वस्य यदावरणं क्लेशकर्मविपाकरूपावरणं तस्य समूलस्य क्षयो भवतीत्यर्थः। तेषां क्षये च निरावरणं योगिनश्चित्तं स्वेच्छया विहरति विजानाति चेति भावः॥ ४३॥

तदेवं परिणामत्रयसंयमादित्यारभ्य भूतेन्द्रियाद्यात्मान्तरसंयमानां ज्ञानक्रियादि-

---

१. क ख घ — **कथित०**, ग — **उक्त०**।

२. क — **समता**, ख ग घ — **मयता**।

३. क ख घ — **सञ्चारः**, ग — **संसारः**।

रूपाः सिद्धीः प्रदर्श्येदानीं वितर्कादिसूत्रैः स्वशास्त्रे मुख्यतः प्रकृतेषु ग्रहीतृग्रहणग्राह्येषु ये संयमास्तेषां सिद्धीः प्रतिपादयिष्यन् ग्रहीतृग्रहणयोर्ग्राह्यनिरूप्यत्वादादौ ग्राह्यसंयमस्य सिद्धिमाह—

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद् भूतजयः॥ ४४॥

स्थूलेति। स्थूलं च स्वरूपं च सूक्ष्मं चान्वयश्चार्थवत्त्वं च स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वानि। तेषु संयमात् साक्षात्कारपर्यन्तात् तत्तद्रूपवतां पञ्चभूतानां जयो वशवर्तिता भवतीत्यर्थः। तत्र स्थूलं परिदृश्यमानमवयवसंस्थानं, स्वरूपं काठिन्यसांसिद्धिकद्रवत्वोष्णत्वतिर्यग्गमनाऽवकाशदानादि, सूक्ष्मं शान्तघोरमूढवृत्तिशून्यत्वाच्छब्दस्पर्शरूपरसगन्धतन्मात्रारूपं कारणम्। अन्वयः प्रकाशक्रियास्थितिरूपेणान्वेतीत्यन्वयः सत्त्वादिगुणत्रयम्, अर्थवत्त्वं भोगापवर्गार्थता। एतेषु भूतानां पञ्चरूपेषु क्रमेण प्रतिरूपं संयमाद् भूतानि भूतप्रकृतयश्च योगिसंकल्पानुसारिण्यो भवन्ति वत्सानुसारिण्य इव[१] गाव इति यावत्॥ ४४॥

तस्यैव भूतजयस्य फलमाह—

ततोऽणिमादिप्रादुर्भावः कायसंपद्धर्मानभिघातश्च॥ ४५॥

तत इति। ततो भूतजयादणिमादिप्रादुर्भावः।

अणिमा लघिमा चैव महिमा गरिमा तथा।

प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टमं स्मृतम्॥

इत्येवमष्टविधैश्वर्यस्य प्राप्तिर्भवति। प्रादुर्भाव इत्यनेन सत्त्वप्रधानस्य चित्तस्य स्वरूपत एव तद्योग्यत्वात् संयमेनाभिव्यक्तिमात्रमिति ज्ञापितम्। अणिमा संकल्पमात्रेण तत्क्षणादेव [२]प्रकृत्यपगमेन परमाणुवद्देहस्य सूक्ष्मता। लघिमा गुरुतरस्यापि पर्वतादेस्तूलवल्लघुभावः। महिमा आकाशादिवन्महद्भावः। गरिमा लघुतरस्यापि तूलादेः पर्वतादिवद् गुरुभावः। प्राप्तिः परिच्छिन्नभावस्यैव संकल्पमात्रेणावयवदैर्घ्याद्देशान्तरस्थवस्तुस्पर्शः[३]। यथा अङ्गुल्यग्रेण चन्द्रादिवस्तुस्पर्शशक्तिः। एताः पञ्चसिद्धयः स्थूलसंयमस्य फलम्। स्वरूपस्य प्राक्राम्यं तच्चेच्छानभिघातः। सूक्ष्मस्य वशित्वम्। तच्च भूतभौतिकानां स्वाधीनकरणम्। अन्वयस्य ईशित्वं भूतानामुत्पत्तिविनाशयोः संस्थानविशेषे च सामर्थ्यम्। अर्थवत्त्वस्य यत्र कामावसायित्वं तच्च सत्यसंकल्पता प्राकाम्यमेव।

---

१. क ख घ — **इव गावः**, ग — **गाव इव**।

२. क ख — **प्रकृति०**, ग — **प्रकृष्ट०**, घ — **प्रकृत०**।

३. क ख घ — **स्पर्शः**, ग — **स्पृष्टिः**।

नन्वेवं योगी कदाचि[१]ज्जलात्तेजः कुर्यात्। तथा चेश्वरसत्प्रतिपक्षः स्यादिति चेन्न। ईश्वरसंकल्पानुसारेणैव तत्संकल्पस्योत्पत्तेरित्यन्यत्र विस्तरः। एवं कायसम्पद्वक्ष्यमाणा भवति। तद्धर्मानभिघातश्च। तद्धर्मैः पृथिव्यादिभूतधर्मैः काठिन्यादिभिरनभिघातोऽप्रतिबन्धश्च भवति। शिलादिष्वपि योगिशरीरप्रवेशदर्शनादिति संक्षेपः॥ ४५॥

कायसंपदमाह—

रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत्॥ ४६॥

रूपं चक्षुःप्रियो गुणः, लावण्यं सर्वाङ्गसौन्दर्यम्, बलं वीर्यं, वज्रसंहननत्वं वज्रस्येव निविडो[२] दृढः संघातो[३] यस्य वज्रस्येव संहननं प्रहारो यस्येति वा। तस्य भावो वज्रसंहननत्वं हनुमत्प्रभृतिषु प्रसिद्धम्। एतानि योगिनः कायसंपद्भवतीत्यर्थः॥ ४६॥

ग्राह्यसंयमस्य सिद्धय उक्ताः। सम्प्रति, ग्रहणसंयमस्य सिद्धिमाह—

ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः॥ ४७॥

ग्रहणेति। ग्रहणं च स्वरूपं चास्मिता चान्वयश्चार्थवत्त्वं च ग्रहणस्वरूपास्मितान्वयार्थत्त्वानि। तेषु संयमात् कथितप्रकारात् साक्षात्कारपर्यन्तात्तद्रूपाणामिन्द्रियाणां जयो वशवर्त्तिता भवतीत्यर्थः। ग्रहणं किञ्चिदिदमिति सामान्यतोऽमुक इति विशेषतश्चेन्द्रियाणां विषयाकारपरिणामः। स्वरूपं प्रकाशत्वम्। अस्मिता कारणीभूतसात्त्विकाहङ्कारानुगमः। अन्वयार्थवत्त्वं पूर्ववत्। एतेष्विन्द्रियाणां पञ्चरूपेषु क्रमेण प्रतिरूपं संयमात् सर्वाणीन्द्रियाणि योगिसंकल्पानुसारीणि भवन्तीति यावत्॥ ४७॥

ततः किं तत्राह—

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च॥ ४८॥

तत इति। ततोऽ[४]स्मिन्निन्द्रियजये सति मनोजवित्वं कायस्य मनोवच्छीघ्रतरो गतिलाभः। विकरणभावो विकीर्णता स्वभावाद् व्यापिता स्थूलदेहसम्पर्करहितानामिन्द्रियाणामभिप्रेत[५]देशादिषु [६]प्रवृत्तिलाभ इति यावत्। प्रधानजयो भूतेन्द्रियादि-

१. क ख — जलात्, ग घ — जलम्।
२. क ख घ — **निविडः** उपलभ्यते, ग — **निविडः** नोपलभ्यते।
३. क ख घ — **संघातो यस्य वज्रस्येव संहननं प्रहारो यस्येति वा तस्य भावः वज्रसंहननत्वम्,**
   ग — **संघातः प्रहारो वा यस्य तस्य भावो वज्रसंहननत्वम्।**
४. क ख — **अस्मिन्**, ग घ — **तस्मिन्।**
५. क ख घ — **देशादिषु**, ग — **देशे।**
६. क ख — **प्रवृत्ति०**, ग घ — **वृत्ति०।**

कारणस्य साम्यावस्थोपलक्षितस्य गुणत्रयस्य जयः स्वेच्छया अनुविधानं भवतीत्यर्थः। तस्मिन् सति सर्वेषां जयोऽयत्नसिद्धः। अत एव सर्ववशित्वं शास्त्रेषु प्रधानजयशब्देन निर्दिश्यते। एताश्च तिस्रः सिद्धयोऽस्मिन् शास्त्रे मधुप्रतीका इत्युच्यन्ते। तत्र कर्मेन्द्रियजयफलं मनोजवित्वम्। अन्यस्यान्यदिति संक्षेपः॥ ४८॥

तदेवं ग्राह्यग्रहणसंयमयोः[१] सिद्धिमुक्त्वा ग्रहीतृसंयमस्य सिद्धिमाह—

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च॥ ४९॥

सत्त्वाधिक्यात् सत्त्वं बुद्धिः, पुरुषस्तद्भोक्ता स्वामी चेतनः। तयोरन्यताया भेदस्य ख्यातिः साक्षात्कारमात्रं प्रमाणस्य[२] तथाभूतस्य साक्षात्कारपर्यन्तस्य संयमस्य सर्वभावाधिष्ठातृत्वं सर्वेषां [३]परिणामिभावापन्नानां गुणादिघटान्तानां भावानामधिष्ठातृत्वं स्वामिवदाक्रमणं नियन्तृत्वं च सिद्ध्यति। तथा तेषामेव शान्तोदिताव्यपदेश्यधर्मत्वेन स्थितानां युगपद्यथार्थज्ञानवत्त्वरूपं सर्वज्ञातृत्वं च सिद्ध्यतीत्यर्थः। एषा विशोका नाम सिद्धिः॥ ४९॥

एवं संयमेन जातायाः ख्यातेः फलमाह—

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्॥ ५०॥

तदिति। तस्यां विशोकाख्यायां[४] सिद्धौ वैराग्यात् [५]तद्धेतोः सालम्बने समाधावपि यदा परं वैराग्यं, कृतं कृत्यं, प्राप्तं प्राप्तव्यं, ज्ञातं ज्ञातव्यं, हातं हातव्यमित्यव्यवस्थाफलकं भवति। तस्माद्दोषाणां रागादीनां यद् बीजमविद्या, तस्याः क्षये निःशेषतो नाशे सति कैवल्यम् आत्यन्तिकदुःखनिवृत्तिविशिष्टे स्वरूपे प्रतिष्ठत्वरूपं कैवल्यं भवति। इयं संस्कारशेषाख्या सिद्धिः॥ ५०॥

अथ कैवल्याख्यसिद्ध्यर्थिनो योगिनो यथोक्तवैराग्यवदेव साधनान्तरमाह। अथवा सम्प्रति कैवल्यप्रसङ्गतः कैवल्यसाधने प्रवृत्तस्य योगिनस्तत्प्रत्यूहसम्भवे तन्निराकरणप्रकारमाह—

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणे पुनरनिष्टप्रसङ्गात्॥ ५१॥

स्थानीति। स्थानिनः स्वर्गादिलोकाधिकारिणो देवा इन्द्रादयस्तेषां स्वर्गलोक-

---

१. क ख घ — **ग्राह्यग्रहणसंयमयोः**, ग — **ग्राह्यग्रहणयोः**।

२. क ख घ — **प्रमाणस्य**, ग — **प्रमाणमस्य**।

३. क ख — **परिणामिभाव०**, ग घ — **परिणामपरिणामिभाव०**।

४. क ख — **विशोकाख्यायां**, ग — **विशोकायां**, घ — **विशोकाख्यायाः**।

५. क ख — **हेतोः**, ग घ — **हेतौ**।

भोगार्थं योगिनो निमन्त्रणे सति तत्र सङ्गः प्रीतिः, स्मयश्च तादृशप्रार्थने [१]सत्यपि आपाततस्त्यागेनात्मनि कृताभिमानः[२] सिद्धोऽहं विरक्तोऽहं कोऽन्योऽस्ति सदृशो मयेत्याद्यात्मकः। तयोः सङ्गस्मययोरकरणमु[३]पायः।

ननु सङ्गस्मये[४] च का क्षतिरित्यत आह—**पुनर**िति। सङ्गस्मयाभ्यामहंकार-गर्भाभ्यां पुनरेतच्छरीरोत्तरमप्यनिष्टप्रसङ्गात् संसार[५]पाशरूपानर्थप्रसङ्गादित्यर्थः।

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वापि स इमांल्लोकान् न हन्ति निबद्ध्यते॥

इति वदता भगवता निवृत्ताहङ्कारस्यैव मोक्षप्रतिपादनेन साहङ्कारस्य पुनः पुनर्बन्ध एव ज्ञापितः।

अथात्र प्रथमकल्पिको मधुभूमिको प्रज्ञाज्योतिरतिक्रान्तभवनीयश्चेति योगिनश्च-त्वारः। एतेषु प्रथमस्य नोपमन्त्रणम्। अभ्यासिमात्रत्वात्। तृतीयचतुर्थयोस्तु स्वयमीश्वर-कल्पत्वादुपेक्षणीया एव ते भवन्ति। अतो मधुभूमिकस्यैव कृत्यप्रज्ञावतो द्वितीयस्यैव तद्भवति। तेन कैवल्यार्थिना वासनावर्धकेषु तेषु सङ्गः स्मयश्च न कार्यः। पुनरपि संसारावरोहणरूपानिष्ट[६]प्रसङ्गादिति यावत्॥ ५१॥

सर्वज्ञतासाधनं संयमान्तरमाह—

क्षणतत्क्रमयोः संयमाद् विवेकजं ज्ञानम्॥ ५२॥

क्षणेति। क्षणः स्ववृत्तिध्वंसप्रतियोग्यनाधारः समयः। मुहूर्तादयस्तत्समूह-रूपत्वात् तदात्मका एव। तेषां क्रमोऽयमस्मात् पूर्वः क्षणोऽयमुत्तर इत्येवं पौर्वापर्यम्। तयोः संयमात् साक्षात्कारपर्यन्ताद् विवेकजं ज्ञानं विवेकेन इतरव्यावृत्ततया जायमानं सर्ववस्तूनां ज्ञानम्भवतीत्यर्थः। सर्वं वस्तु प्रतिक्षणं परिणमते इति विकारितया क्षणरूपमेव। पठन्ति च नैयायिका अपि, जन्यमात्रं कालोपाधिरिति। जन्याभिन्नं चास्मन्मते प्रधानान्तं कारणम्। कार्यकारणयोस्तादात्म्यसम्बन्धाऽङ्गीकारात्। अतः क्षणक्रमयोः संयमः कार्यकारणसर्वविषयक इति। तस्मात् साक्षात्कारपर्यन्तात् सर्वेषां वस्तूनां विवेकेन ज्ञानं भवतीति यावत्॥ ५२॥

---

१. क ख घ — **सत्यपि आपाततः**, ग — **अपि**।
२. क ख — **कृताभिमानः**, ग घ — **कृतार्थताभिमानः**।
३. क ख घ — **उपायः**, ग — **तादृशचित्तवृत्तेरुत्सारणं योगिना विधेयम्**।
४. क ख — **सङ्गस्मये च**, ग — **सङ्गस्मयाभ्यां**, घ — **सङ्गे स्मये च**।
५. क ख घ — **पाश०**, ग — **यात्रा०**।
६. क ख घ — **प्रसङ्गात्**, ग — **सङ्गात्**।

तस्य विवेकज्ञानस्यासङ्कीर्णमुदाहरणमाह—

जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ॥ ५३ ॥

जातीति। तुल्ययोरेकजात्येकलक्षणैकदेशावच्छिन्नयोर्जातिर्गोत्वमहिषत्वादिः। लक्षणं नीलपीतादि। देशः पूर्वपश्चिमादिः। एतैरन्यतानवच्छेदात् भेदावधारणस्यासम्भवात्। ततः संयमविवेकज्ञानात् प्रतिपत्तिर्निश्चयो भवतीत्यर्थः। एतच्च क्षणसंयमजन्यज्ञानस्यैकदेशोदाहरणम्। क्षणक्रमसंयमज्ञानस्य तु ज्येष्ठ[१]कनिष्ठताविवेकज्ञानमुदाहरणं स्वयमूह्यम्॥ ५३॥

विवेकज्ञानस्यैकदेशेनासङ्कीर्णोदाहरणं प्रदर्श्येदानीं सहेतुकां विवेकजज्ञानस्य मोक्षोपयोगितामाह—

तारकं सर्वविषयं सर्वथाविषयकं चेति विवेकजं ज्ञानम्॥ ५४॥

तारकमिति। इति शब्दो हेत्वर्थे[२]। यतो विवेकजं ज्ञानं सर्वविषयं व्यक्ताव्यक्ताः सर्वे पदार्था विषया यस्येति सर्वार्थगोचरम्। तच्च प्रमारूपं यतः सर्वथाविषयं यस्य। योऽवस्थाविशेषः परिणामविशेषादिश्च। तस्मिन् तत् सर्वप्रकारविषयम्। तच्च दिनपक्षमासाब्दयुगकल्पजन्माऽनेकभेदैर्योगिनः क्रमशः सर्वार्थगोचरज्ञानमिव न, किन्तु अक्रमं क्षणजन्मादिघटितपौर्वापर्यरूपक्रमशून्यं युगपदेव सर्वसमूहावलम्बनरूपम्। अतः सर्वत्र दोषसाक्षात्कारेणोक्तवैराग्यद्वारा संसारतारकं भवतीत्यर्थः॥ ५४॥

ननु किमेतासां विभूतीनामनन्तरमेव मोक्षो ज्ञानेन भवति? आहोस्विदेतद्व्यतिरेकेणापीति। तत्राह—

सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम्॥ ५५॥

सत्त्वेति। सत्त्वपुरुषावुक्तलक्षणौ। तयोः शुद्धिसाम्ये सत्त्वस्य समाप्ताधिकारत्वेन सर्ववृत्तिराहित्यं शुद्धिः। पुरुषस्य तद्भोक्तृत्वादिराहित्यं शुद्धिरित्येवं समानायां शुद्धौ पुरुषस्य कैवल्यं मोक्षो भवति, न तत्र सिद्ध्यपेक्षेत्यर्थः॥ ५५॥

[३]इति श्रीनारायणतीर्थकृतायां योगसिद्धान्तचन्द्रिकायां
तृतीयो विभूतिपादः॥ ३॥

---

१. क ख घ — **कनिष्ठता**, ग — **कनिष्ठतादि०**।

२. क ख — **हेत्वर्थे**, ग घ — **हेत्वर्थः**।

३. क ख — **इति श्रीनारायणतीर्थकृतायां योगसिद्धान्तचन्द्रिकायां तृतीयो विभूतिपादः**, घ — **इति श्रीनारायणतीर्थस्वामिविरचितायां योगसूत्रवृत्तौ विभूतिपादस्तृतीयः**, ग — **इति श्रीनारायणतीर्थविरचितायां पातञ्जलसूत्रवृत्तौ गूढार्थद्योतिकायां योगसिद्धान्तचन्द्रिकायां विभूतिपादस्तृतीयः**।

चतुर्थः कैवल्यपादः

पादद्वयेन समाधितत्साधनमिति विस्तरतः प्रतिपाद्य तत्फलवैभवं तृतीयपादे प्रदर्श्य कैवल्येनो[१]पसंहारः कृतः। तेन कैवल्यमेव परमपुरुषार्थ इति ज्ञापितम्। तच्च हेयतत्साधनहानरूपं स्वरूपतो द्वितीयपादे कथितमपि तस्या[२]विशेषरूपो व्यूहो नोक्त इत्यतस्तत्प्रतिपादनाय चतुर्थपादारम्भः। तत्र कैवल्ययोग्यं निर्धारयितुं पञ्चप्रकारां सिद्धिमाह—

जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः॥ १॥

जन्मेति। जन्मना विशेषयोगेन यथा देवविशेषाणाम्[३]। औषधिना दिव्यरसायनाद्यात्मकेन यथा माण्डव्यादीनाम्। मन्त्रेण शिवविष्ण्वादिमन्त्रजपेन। होम[४]पूजादिसिद्धिस्तु मन्त्रप्रधानत्वान्मन्त्रान्तर्गतैव। यथा वत्सराजनन्दीश्वरप्रभृतीनाम्। तपसा अनशनशीतोष्णादिबाधासहनादिरूपेण। यथा विश्वामित्रादीनाम्। समाधिना आत्मविषयकभावनाविशेषरूपेण। यथा याज्ञवल्क्यदत्तात्रेयप्रभृतीनां सिद्धिरित्येताः पञ्चसिद्धयः। एताः सर्वा अपि पूर्वजन्मकृतसुकृतक्षपित[५]कल्मषाणामेव लभ्या भवन्ति। एतासु चतसृषु[६] विषयविज्ञेयनिरसनदेहादिदार्ढ्यद्वारा समाधावुपयुक्ताः, समाधिना तु कैवल्यमेव तेभ्य उत्कृष्टः। तस्मात् कैवल्यार्थं समाधौ इह जन्मन्येव तदर्थमौषधादौ इह जन्मनि, जन्मान्तरेऽपि वा तल्लाभाय मन्त्रतपआदौ सोत्साहानां विवेकिनां प्रयत्न आवश्यक इति भावः॥ १॥

ननु सिद्धिस्तृतीयपादे वर्णिता अणिमादिप्रादुर्भावरूपा। तत्राऽणोर्महद्भावः। एवं—

स एकधा भवति त्रिधा भवति पञ्चधा।
शतञ्च दश चैकश्च सहस्राणि च विंशतिः॥

---

१. क ख घ — **उपसंहारः कृतः। तेन** ग — **उपसंहारात्।**
२. क ख ग — **अविशेष०,** घ — **अशेष०।**
३. क ख घ — **देवविशेषाणां,** ग — **देवानाम्।**
४. ग घ — **जन्या [पूजादि०** पश्चात्] उपलभ्यते, क ख — **जन्या** नोपलभ्यते।
५. क ख घ — **कल्मषाणां,** ग — **कल्मषैः।**
६. क ख ग — **चतसृषु,** घ — **चतस्रः।**

इत्यादिश्रुतिसिद्धकामरूपतादशायां मनुष्यादिरूपेण परिणम्य स्थितानां देवतिर्यगादिजातिपरिणामः। एवम्महतोऽणुभावादिश्च कथम्। पूर्वपरिणामवति परिणामान्तरायोगात्। नानुपमृद्यप्रादुर्भाव इति न्यायेन पूर्वपरिणामनाशस्य हेतुत्वात्। न च तेषां संकल्पमात्रेण तत्सिद्धिः। संयमस्य[1] निमित्तमात्रत्वात्[2]। तत्राह—

जात्यन्तरपरिणामः प्रकृत्यापूरात्॥ २॥

जातीति। प्रधानादिपृथिव्याद्यन्ताः कायेन्द्रियादिप्रकृतयः। तासाम् आपूराद् धर्माद्यनुरोधेन मनुष्यादिदेहावयवेषु अनुप्रवेशात् कामरूपतादशायां देवतिर्यगादिरूपजात्यन्तरपरिणामः। अणोर्महद्भावश्च भवति। एवं महतोऽणुभावः प्रकृत्यपगमादित्यपि बोध्यम्॥ २॥

ननु तर्हि प्रकृत्यापूरः परमेश्वरस्य योगिनो वा संकल्पमपेक्षते न वा? न चेत्—

इच्छामात्रं प्रभोः सृष्टिः।

इति श्रुतीनां,

स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति।

इत्यादिश्रुतीनाञ्च विरोधप्रसङ्गः।

आद्ये प्रकृतिस्वातन्त्र्यहानिप्रसङ्गः। एवं धर्मादिनिमित्तानुरोधेन प्रकृत्यापूरेऽपि प्रकृतिस्वातन्त्र्यहानिः। न चेत् सर्वत्रापूरापत्तिरित्यत आह—

निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्॥ ३॥

निमित्तमिति। निमित्तं परमेश्वरयोगिसंकल्पधर्माधर्मादिरूपं सहकारि अप्रयोजकं प्रकृतीनामापूरे हेतुर्न भवति। कार्यस्य कारणप्रवर्त्तकत्वायोगात्। किञ्चाकाशे द्रव्याणामनारम्भिकाऽप्यनुक्षणमणूनां क्रिया सर्वसम्मता।

न च तत्र धर्मादिकारणं कस्यापि भोगाहेतुत्वात्। नापि तत्रेश्वरादिसंकल्पः कारणं गौरवात्। अतो निरन्तराणुक्रियाद्युपपत्तये लाघवेन गुणत्वेनैव सामान्यतः प्रवृत्तिकारणत्वात् प्रकृतिस्वातन्त्र्यं सिद्धम्।

अपि च, कदाचिद्दण्डचक्रादिकं विनापि योगिसंकल्पादेव घटो जायते। आदिसर्गे चेश्वरसंकल्पेनैव विनैव सर्वाणि बीजान्युत्पद्यन्ते इति परस्परव्यभिचारान्निमित्तानां न [3]साक्षात्कारणत्वसम्भवः। तृणारणिमण्यादिषु चाग्निकारणत्वेऽन्योन्यव्यभिचारो लोकसिद्ध एवास्ति। अतः सहकार्यप्रयुक्ता प्रकृतिरेव परिणामे स्वतन्त्रेति सिद्धम्।

---

१. क — **संयमस्य**, ख ग घ — **संकल्पस्य**।

२. क ख ग — **निमित्तमात्रत्वात्**, घ — **निमित्तत्वात्**।

३. क ख ग — **साक्षात्कारणत्व०**, घ — **साक्षात्कारत्व**।

ननु चैवं तर्हि[१] कथं धर्मेश्वरयोगिसंकल्पादीनां प्रकृतिपरिणामहेतुत्वोक्तिः। तत्राह—**वरणे**ति। ततो निमित्तविशेषात् कथिताद् वरणस्यावरकस्य प्रकृतिप्रवृत्तिप्रतिबन्धकस्याधर्मादेर्भेदः क्षयो भवतीत्यर्थः। तथा प्रतिबन्धकोत्सादकत्वेनैव धर्मादेः परिणामे कारणत्वमुक्तमिति भावः।

तत्र दृष्टान्तः[२] **क्षेत्रिकवदि**ति। यथा क्षेत्रिकः कृषीवलः केदारात् केदारान्तरं जलानि[३] निनीषुर्जलप्रतिबन्धकावरणमात्रं भिनत्ति। अनन्तरं तत्र स्वयमेव गतं जलं केदाराद्याकारेण परिणमते। न तत्र जलप्रसारणे कस्यचित्प्रयत्नः। एवं धर्मादेर्बोद्धव्यमिति संक्षेपः॥ ३॥

ननु योगिनः कामरूपतादशायां किमेकस्मिन् चित्ते समाधिभोगयोर्ज्ञानाज्ञानयोश्च विरोधान्निर्माणचित्तैर्व्यवहारभाजो भवन्ति अथवा बहूनामेकचित्ताभिप्रायानुसारिप्रवृत्तिदर्शनात्। निर्मातृचित्तस्यैकस्यैव सावयवस्य प्रदीपवद्विस्तारितया कायव्यूहेषु प्रवृत्तिसम्भवाच्च, निर्मातृचित्तेनैव व्यवहारभाजो भवन्तीत्येतयोः पक्षयोः प्रथमं पक्षं सूत्रेण सिद्धान्तयति—

निर्माणचित्तान्यस्मितामात्रात्॥ ४॥

निर्माणेति। योगप्रभावात् स्वसङ्कल्पेन निर्मीयन्त इति निर्माणचित्तानि देहसमसंख्यानि मनांसि भवन्ति। कारणमाह—**अस्मितामात्रात्**। योगिसंकल्पप्रेरितस्वप्रकृतिप्रधानबुद्ध्यापूरणान्वितादहंकारादित्यर्थः। मात्रशब्देन मनोव्यावृत्तिः सङ्कल्पमात्रेण मनसो निमित्तमात्रत्वात्।

अत्र द्वितीयपक्षे लाघवसत्वेऽपि

एकस्तु प्रभुशक्त्या वै बहुधा भवतीश्वरः।
भूत्वा यस्मात्तु बहुधा भवत्येकः [४]पुनस्तु सः॥
तस्माच्च मनसो भेदा जायन्ते चैत एव हि।
एकधा तद् द्विधा चैव त्रिधा च बहुधा पुनः॥

---

१. ग — **तर्हि** उपलभ्यते, क ख घ — **तर्हि** नोपलभ्यते।

२. ग — **तत्र दृष्टान्तः** उपलभ्यते, क ख घ — **तत्र दृष्टान्तः** नोपलभ्यते।

३. क ख — **जलानि** इतिपर्यन्तमेव ग्रन्थ उपलब्धः, ग घ — **जलानि** इति अग्रेऽपि ग्रन्थ उपलब्धः।

४. घ — **पुनस्तु सः**....इत्यारभ्य (४/४) **ननु प्रख्याक्रियास्थितिशीलाः** इतिपर्यन्तं (४/१४) उपलभ्यते, ग — **पुनस्तु सः**....इत्यारभ्य **ननु प्रख्याक्रियास्थितिशीलाः** इतिपर्यन्तं नोपलभ्यते।

योगीश्वरः शरीराणि करोति विकरोति च।
प्राप्नुयाद्विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत्॥
संहरेच्च पुनस्तानि सूर्यो रश्मिगणानिव।

इति स्मृतेः। सर्वज्ञस्यापि भगवतः स्वसंकल्पनिर्मितदुराप्तरामशरभादिचित्तभेदेनैव कदाचित् कदाचिदज्ञानाच्च प्रथमपक्ष एव साधीयानिति भावः।

अनेककायव्यूहादौ शरीरभेदेन नानाचित्तैरेवात्मन एकत्वेऽपि ज्ञानाऽज्ञानाद्यवस्था, तथा सर्वशरीरेषु आत्मन एकत्वेऽपि चित्तभेदैरेव व्यवस्था युक्ता, नात्मभेदैस्तत्कल्पनायां गौरवेणायुक्तत्वात् श्रुतिविरुद्धत्वाच्च।

न च स्वप्रतिबिम्बितदुःखभोगतदभावयोर्बन्धमोक्षयोर्विषयानुभवाऽननुभवयोश्च विरुद्धयोर्व्यवस्थार्थमात्मनानात्वमावश्यकमिति वाच्यम्। तार्किकसम्मतश्रोत्रस्यैकत्वेऽपि कर्णशष्कुलीभेदेन शब्दग्रहणव्यवस्थावत्तद्व्यवस्थोपपत्तेः। तस्माद्वस्तुत आत्मनोऽपि नानात्वमुक्तमित्यपि ज्ञापितम्॥ ४॥

तर्हि चित्तानां भिन्नाभिप्रायकत्वाद्योगिनो भोगाऽसिद्धिरित्यत आह—

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम्॥ ५॥

प्रवृत्तीति। एकं मुख्यं यन्निर्मातृचित्तं तदेव तेषामनेकेषां बहूनां निर्माणचित्तानां प्रवृत्तिभेदे व्यापारनानात्वे प्रयोजकं नियामकं करोति। अतस्तदभिप्रायानुसारिणी सर्वेषां प्रवृत्तिरित्यर्थः। ऐश्वर्यनिर्वाहार्थमनेकचित्तेष्वन्तर्यामिविधया स्थितमेकं चित्तं तेषामुत्पत्तिस्थितिव्यापारं संहारञ्च करोतीति यावत्। प्रमाणञ्चात्र प्रागेव दर्शितम्—

संहरेच्च पुनस्तानि।

इति। एतेनेश्वरस्यांशावतारा अपि व्याख्याताः॥ ५॥

तदेवमुक्तेषु पञ्चसिद्धचित्तेषु मध्येऽपवर्गयोग्यं चित्तं निर्धारयति—

तत्र ध्यानजमनाशयम्॥ ६॥

तत्रेति। तत्र तेषु पञ्चसु मध्ये ध्यानजं तु अनाशयं न सन्त्याशयाः क्लेशकर्मादिवासना अस्मिन्नित्यनाशयं ध्यानसिद्धं चित्तमेवानाशयं भवति। योगेनैव ज्ञानोत्पत्त्यापि वासनोच्छेदसम्भवात्, न मन्त्रादिभिरित्यर्थः। अतः क्षीणक्लेशत्वात्तदेव चित्तमपवर्गयोग्यमिति भावः॥ ६॥

योगिनोऽपवर्गप्रयोजकं कर्मापि विलक्षणमित्याह—

कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्॥ ७॥

कर्मेति। योगिनो निष्पन्नयोगस्य क्षीणक्लेशस्य विद्यावतः कर्म कायेन्द्रियादि-व्यापारोऽशुक्लाकृष्णः पुण्यपापाहेतुः इतरेषां जन्मादिसिद्धानामयोगिनां वा त्रिविधं यथायोग्यं कर्म शुक्लकृष्णयोः प्रत्येकसमुच्चयाभ्यां त्रिविधमित्यर्थः।

तथाहि, कर्म सामान्यं चतुर्विधं—कृष्णं, शुक्लकृष्णं, अशुक्लम्, अशुक्लाकृष्णं चेति। तत्र आद्यं, पापप्रधानं तमोवर्धकत्वाद् दुःखप्रधानफलदं केवलमूढानामर्थकामा-भिलाषिणां दुरात्मनाम्। द्वितीयं, पुण्यपापात्मकं पुण्यप्रधानं रजोवर्धकत्वात् सुखदुःख-फलदं परपीडादिविनिवर्त्यं यागादिषु यदास्तिककामुकानाम्। तृतीयं, केवलं पुण्यात्मकं सत्त्ववर्धकत्वात् सुखफलदं बहिर्योगशून्यानामन्तर्याजिनां तपःस्वाध्यायध्यानाभ्यास-वताम्। चतुर्थः, ज्ञानसाधनव्यापाररूपं कर्मसामान्यं वा दृष्टानुश्रविकविषयवैराग्येणाभि-मानत्यागेन च गुणाऽहेतुत्वात् सुखदुःखफलशून्यकैवल्यमात्रफलदमभिमानफलादित्या-गिनां परमहंसानां भगवद्भक्तानाञ्च भवतीत्यर्थः। शास्त्रप्रमाणं चात्र—

त्यक्त्वा कर्म फलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः॥
यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वाऽपि स इमाँल्लोकान् न हन्ति न निबध्यते॥

इत्यादिभगवद्वाक्यम्। तस्मादशुक्लाकृष्णकर्म ज्ञानिनामेव संभवतीति। त्यक्ता-भिमानिनामेव तेषु तेषु ज्ञानहेत्वधिकारो नान्येषामास्तिककामुकादीनाम्—

ब्रह्मचर्यं तपःश्रद्धा नित्यमेकान्तशीलता।
विषयेष्वस्पृहताऽस्तेयं सर्वभूतदया क्षमा॥
लज्जा धृतिः शुचित्वं च निरोधो मनसस्तथा।
एतैरुपायैः संयुक्तस्ततः प्रणवमभ्यसेत्॥
नैनमर्हत्यशुद्धात्मा केवलं प्रणवं द्विजः।
ततः परतरं ब्रह्म नाऽशुद्धोऽत्र च लभ्यते॥
अशुद्धात्माऽभ्यसेन्नैनं प्रत्यवैति न संशयः।
कर्मानर्होऽशुचिर्विप्रो न वेदं समुदाहरेत्॥
नाऽभ्यसेत्प्रणवं तद्वदपि शुद्धतरो द्विजः।
प्रणवेन परं ब्रह्म ध्यायीत ब्रह्मविद् यतिः॥

इत्यादिशौनकादिस्मृतेरिति ज्ञापितम्।

न च

न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः।

इत्यादिश्रुतेः,

त्यज धर्ममधर्मञ्च उभे सत्यानृते त्यज।
उभे सत्यानृते त्यक्त्वा येन जानासि तत्त्यज॥

इत्यादिस्मृतेश्च कैवल्यार्थिनां कर्म सामान्यप्रतिषेधलाभात् कथमुक्ता व्यवस्था? शौनकादिवाक्यं च तृतीयकोटिस्थानपरं भविष्यतीति वाच्यम्।

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्त्वा विद्ययाऽमृतमश्नुते॥
आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः।

इत्यादिश्रुतेः,

कायेन मनसा वाचा केवलैरिन्द्रियैरपि।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये॥

इत्यादिभगवद्वाक्यैश्च कर्मणामपि कैवल्यहेतुसत्त्वशुद्धौ ज्ञानाङ्गतया साहित्य-प्रतिपादनात्,

न कर्मणा।

इत्याद्युदाहृतवाक्यैर्वर्जनाच्च, प्रणवजपतदर्थभावनाहठयोगादिकर्मणामेव ब्रह्म विना चानुष्ठेयत्वलाभाद् उक्तव्यवस्थोपपत्तिः।

अत एव न ज्ञानकर्मसमुच्चयादप्रसंगोऽपि भगवद्भक्तिरूपाणां तेषाम्,

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥

इति वदता भगवता।

छान्दोग्ये—

त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति। प्रथमस्तप एव द्वितीयो ब्रह्म-चर्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्य-लोका भवन्ति ब्रह्मसꣳस्थोऽमृतत्वमेति।

इति पृथगेव प्रणवजपतदर्थभावनादिरूपेश्वरप्रणिधानवतः संन्यासिनाऽमृत-बोधकश्रुत्या च कर्मशब्दाऽनभिधेयत्वप्रतिपादनात्।

योगिनः कर्म कुर्वन्ति।

इत्यत्र कर्मशब्दोक्तिः प्रयत्नसाध्यत्वाभिप्रायेण। तथा—

अयन्तु परमो धर्मो यद्योगेनात्मदर्शनम्।

इत्यत्र आत्मसाक्षात्कारे धर्मशब्दः साधनमुखेन तस्यापि प्रत्यक्षसाध्यत्वादिति दिक्।

ननु धर्माधर्मावतिसूक्ष्मौ शास्त्रैकसमधिगम्यौ। तत्र वेदनिन्दितं कर्म, यत् कृष्णस्य पराङ्गनागमनादिरूपत्वं, वेदविहितं कर्म शुक्लं तपःस्वाध्यायादिवद् यागादिकमपि ब्रह्मणे, नात्मने। क्षेत्राय राजन्यं अब्भ्यो वैश्यं तमसे शूद्रं इति मैत्रायणीयानामाश्वमेधिके कर्मणि। एवं गोसवने यावत्संवत्सरं गोव्रतं भवति, तृणानि छिनत्ति, उदकं द्विषि, उपैति मातरं, उपैति श्वसारं, उपैति दुहितरं, उपैति सगोत्रां तदेवमनु इह लोकान्जयतीति।

य एवं विद्वान् सुरां पिबति प्रजायते वा तनुवीर्यमस्मिन्नुपरि दधाति।

इति सौत्रामणे,

व्रीहीनवहन्ति।

अग्नीषोमीयं पशुमालभेत।

इत्यादिना दर्शपूर्णमासज्योतिष्टोमादौ विहितहिंसादिघटितं उक्तमेव। एवं योगिनामप्युक्तं कर्म विहितत्वाद् युक्तमेव। तथा च शुक्लकृष्णभेदेन कर्मणो द्विविधत्वान्न चतुर्विधकथनमुचितमिति चेत्,

न।

न वा ह्येते अदृष्टाय,

यथा अष्टादशोक्तमवरं येषु कर्म।

एतच्छ्रेयो येऽभिनन्दन्ति मूढाः।

जरामृत्युं ते पुनरेवाऽपियन्ति॥

इत्यादिश्रुत्या षोडश ऋत्विजो यजमानः, पत्नी चेत्यष्टादश, तैर्निष्पादितानां यज्ञानामदृढत्वस्य तत्कर्तॄणाञ्च कामुकानामविद्वद्गृहस्थानां मूढत्वस्य प्रतिपादनेन,

न हिंस्यात्।

इति निषिद्धहिंसाघटितकर्मणः केवलशुक्लत्वव्यवच्छेदात्।

न च विधिस्पृष्टनिषेधानवकाशः, इति न्यायात् सामान्यनिषेधस्य च यागीयेतरत्वाद् यागीयहिंसायां न कृष्णत्वम्। अदृढत्वोक्तिस्तु तेषामनित्यफलत्वेन तत्कर्तॄणां मूढत्वोक्तिरपि अनित्यफलकामुकत्वेनेति वाच्यम्। पाककर्मणो हितकारकत्वतृप्तिसाधनत्वयोरिव यागादेरपि सुखसाधनत्वदुःखसाधनत्वयोरविनाभावेन सामान्यशास्त्रविधायकविशिष्टशास्त्रयोर्बाध्यबाधकत्वायोगात्। अत एव

जप्येनैव तु संसिध्येदात्मानं नात्र संशयः।
कुर्याद् अन्यन्न वा कुर्यान् मैत्रो ब्राह्मण उच्यते॥

इति वदता मैत्रमहिमानं प्रशंसता मनुना

इतिहासःपुराणानि पञ्चमो वेद उच्यत इति

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्,

वेदानध्यापयामास महाभारतपञ्चमान्।

इत्यादिना श्रुतिसमोक्तमहाभारतेऽयमर्थः स्फुटीकृतो भगवता व्यासेन। तथाहि, वनपर्वणि युधिष्ठिरं प्रति शौनकवचनम्—

ज्ञानविवित्सुर्दोषेषु कर्मसु श्रेयोघातिषु।

न च श्रेयोघातित्वं कामकृतानामेव सुरापानादिकर्मणां, न पुनर्विहितानां यागादीनां शिष्टैरपि पारुष्येण तदाचरणादिति वाच्यम्।

अष्टाङ्गां बुद्धिमाहुर्यां सर्वश्रेयोनिवासिनीम्।
श्रुतिस्मृतिसमायुक्तां राजन् कुर्वन्ति तां बुधाः॥
इज्याध्ययनदानानि तपः सत्यं क्षमा दमः।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥
अत्र पूर्वश्चतुर्वर्गः पितृयानपथे स्थितः।
कर्त्तव्यमिति यत्कार्यं नाभिमानात्समाचरेत्॥
उत्तरो देवयानस्तु सद्भिराचरितः सदा।
अष्टाङ्गेनैव मार्गेण विशुद्धात्मा समाचरेत्॥
सम्यक्संकल्पसंबन्धात् सम्यक् चेन्द्रियनिग्रहात्।
सम्यग्व्रतविशेषाच्च सम्यग्क्रतुसुसेवनात्॥
सम्यगाहारयोगाच्च सम्यगध्ययनागमात्।
सम्यक् कर्म तु संन्यासात् सम्यक् चित्तनिरोधनात्॥
एवं कर्माणि कुर्वन्ति संसारविजिगीषवः।

इत्यादिवाक्यैरष्टाङ्गयोगेनाऽऽसादिताऽऽत्मबुद्धेरेव सात्त्विकपुरुषकर्त्तव्यतां प्रतिपादयता शौनकेन।

अर्थ एव हि केषाञ्चिदनर्थं भजते नृणाम्।
अर्थश्रेयसि चासक्तोपश्रेयो विन्दते नरः॥
धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्॥

इत्यादिना बहिःसाधनसाध्यानां विहितकर्मणामेव दोषदुष्टत्वं ज्ञापयताऽकर्त्तव्यत्वकथनात्। तथा गदापर्वणि जनमेजयं प्रति वैशम्पायनवचनम्। जैगीषव्ययोगिनो गृहे आगतस्याऽऽतिथ्येन पूजयित्वाऽऽगन्तुकामस्य पृष्ठतः स्वर्गादिलोकपर्यन्तं गत्वा तत्र तत्राऽश्वमेधादिकर्मवर्त्तिनां लोकानवलोक्य ब्रह्मलोकगतं जैगीषव्यं दृष्ट्वा, तत्रापि गन्तुकामं देवलं तपोदानादिसाध्यमहर्ल्लोकस्थैः सिद्धैस्तव प्रवृत्तिर्धर्मणि दृष्ट्वा गतिर्न सम्भवतीति कथनादतिखिन्नः पुनः स्वगृहमागत्य संन्यासबुद्धिं कृतवन्तं प्रति—

संन्यासकृतबुद्धिं तं भूतानि पितृभिः सह।
ततो दृष्ट्वाऽऽस्मदुःखोऽस्मान् तद्धि संविभजिष्यति॥
देवलस्तु वचः श्रुत्वा भूतानां करुणां तथा।
दिशो दशव्याहरतां त्यक्तुं मोक्षं मनोदये॥
ततस्तु फलमूलानि पवित्राणि च भारत।
पुरोरप्यश्वोपवृतैरवरोधति सहस्रशः॥
पुनर्नो देवलः क्षुद्रो नूनं छेत्स्यति दुर्मतिः।
अभयं सर्वभूतेभ्यो यो दत्वा नाऽवबुध्यते॥
ततो भूयो व्यगणयत्स्वबुद्ध्या मुनिसत्तमः।
मोक्षो गार्हस्थ्यधर्मो वा किं नु श्रेयस्करो भवेत्॥
इति निश्चित्य मनसा देवलो राजसत्तमः।
त्यक्त्वा गार्हस्थधर्मं स मोक्षधर्ममरोचयत्॥
इति।

मोक्षधर्मे च भीष्म उवाच—

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
प्रजानामनुकम्पार्थं गीतं राज्ञा विचख्नुना॥
छिन्नस्थूलं वृषं दृष्ट्वा विलापं च गवां भृशम्।
गोग्रहे यज्ञवाटस्य प्रेक्षमाणः स पार्थिवः॥
स्वस्ति गोभ्योऽस्तु लोकेषु ततो निर्वचनं कृतम्।
हिंसायां हि प्रवृत्तायामाशीरेषा तु कल्पिता॥
अव्यवस्थितमर्यादैर्विमूढैर्नास्तिकैर्नरैः।
संशयात्मभिरव्यक्तैर्हिंसा समनुवर्णिता॥
सर्वकर्मस्वहिंसां हि धर्मात्मा मनुरब्रवीत्।
कामकाराद् विहिंसन्ति बहिर्वेद्यां पशून् नराः॥

तस्मात् प्रमाणतः कार्यो धर्मः सूक्ष्मो विजानता।
अहिंसा सर्वभूतेभ्यो धर्मेभ्यो ज्यायसी मता॥
उपोष्य संशितो भूत्वा हित्वा वेदकृताः श्रुतीः।
आचार इत्यनाचारः कृपणाः फलहेतवः॥
यदि यज्ञांश्च वृक्षांश्च यूपांश्चोद्दिश्य मानवाः।
वृथा मांसं न खादन्ति नैष धर्मः प्रशस्यते॥
सुरा मत्स्या मधु मांसमासवं कृसरौदनम्।
धूर्तैः प्रवर्तितं ह्येतत् तत् त्रिवेदेषु कल्पितमत्र
मानान्मोहाच्च लोभाच्च लौल्यमेतत्प्रकल्पितम्।
विष्णुमेवाभिजानन्ति सर्वयज्ञेषु ब्राह्मणाः॥
पायसैः सुमनोभिश्च तस्यापि यजनं स्मृतम्।
यज्ञीयाश्चैव ये वृक्षा वेदेषु परिकल्पिताः॥
यच्चापि किञ्चित् कर्त्तव्यमन्यच्चोक्षैः सुसंस्कृतम्।
महासत्त्वैः शुद्धभावैः सर्वं देवार्हमेव तत्॥

इत्यादिग्रन्थेनेति। तथा तत्रैवान्यत्र यज्ञे गवालम्भनं दृष्ट्वा सर्वज्ञेन कपिलेन **हा वेद३** इति प्लुतेन वेदानामविक्षेपेण स्वतःप्रमाणवेदेषु कथमेतत्कृतमिति सन्देहनिवृत्तये गोशरीरे प्रविश्य स्यूमरश्मिनामा ऋषिः प्रवृत्तिधर्मेष्वावश्यकत्वं निवृत्तिधर्मस्य च हेयत्वमब्रवीत्।

स्वर्गकामो यजेतेति सततं श्रूयते श्रुतिः।
पशवश्चाथ धान्यं च यज्ञस्याङ्गमिति श्रुतिः॥
गृहस्थ एव यजते गृहस्थस्तप्यते तपः।
गार्हस्थ्यमस्य धर्मस्य मूलं यत्किंचिदेजते॥
ऋणवन्तो यदा मर्त्याः पितृदेवद्विजातिषु।
श्रिया विहीनैरलसैः पण्डितैः सम्प्रवर्तितम्॥
निराशैरलसैः श्रान्तैस्तप्यमानैः स्वकर्मभिः।
शमस्योपरमो दृष्टः प्रव्रज्यायामपण्डितैः॥
कस्यैषा वाग् भवेत् सत्या मोक्षो नास्ति गृहादिति।
अश्रद्दधानैरप्राज्ञैः सूक्ष्मदर्शनवर्जितैः॥
प्रजनाद्यभिनिर्वृत्ताः सर्वे प्राणभृतो जनाः।
प्रजनं चाप्युतान्यत्र न कथंचन विद्यते॥

नायं लोकोऽस्त्ययज्ञानां परश्चेति विनिश्चयः।
वेदवादविदश्चैव प्रमाणमुभयं तदा॥
एतानि सह यज्ञेन प्रजापतिरकल्पयत्।
तेन प्रजापतिर्देवान् यज्ञेनायजत प्रभुः॥
इत्यादिवाक्यैः प्रतिपादयन्तं योगिस्यूमरश्मिं प्रति—
अपवर्गेऽथ संत्यागे बुद्धौ च कृतनिश्चयाः।
विशोका नष्टरजसस्तेषां लोकाः सनातनाः॥
तेषां गतिं परां प्राप्य गार्हस्थ्ये किं प्रयोजनम्।
ब्रह्मणैव स्म ते देवांस्तर्पयन्त्यमृतैषिणः॥
एतावदनुपश्यन्ति यतयो यान्ति मार्गगाः।
नैषां सर्वेषु लोकेषु कश्चिदस्ति व्यतिक्रमः॥
ज्ञानं प्लावयते सर्वं योऽज्ञानं ह्यनुवर्तते।
ज्ञानादपेत्य या वृत्तिः सा विनाशयति प्रजाः॥
शास्त्रं ह्यबुद्ध्वा तत्त्वेन केचिद् वादबलाज्जनाः।
कामद्वेषाभिभूतत्वादहङ्कारवशं गताः॥
याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः।
ब्रह्म-स्तेना निरारम्भा दम्भमोहवशानुगाः॥
नैर्गुण्यमेव पश्यन्ति न गुणाननुयुञ्जते।
तेषां तमःशरीराणां तम एव परायणम्॥
आनृशंस्यं क्षमा शान्तिरहिंसा सत्यमार्जवम्।
अद्रोहोऽनभिमानश्च ह्रीस्तितिक्षा शमस्तथा॥
इत्यादिवाक्यैः सात्त्विकेन मुमुक्षुणा—
त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम्।
त्यजतैव हि विज्ञेयं त्यक्तुः प्रत्यक् परं पदम्॥
इति श्रुत्यनुसारात्
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ् समाः।

इत्यादिश्रुत्या नित्यकर्त्तव्यतया बोधितानि दर्शपूर्णमासाग्निहोत्रादिरूपाणि राजसाधिकारिकाणि हिंसादिवद्धटितानि तु सूनादीनि नाम साधिकारिकाणि त्याज्यानीत्युक्तम्।

तथैव पितापुत्रसंवादेऽपि—

तातैतद्बहुशोऽभ्यस्तं जन्मजन्मान्तरेष्वपि।
त्रयीधर्ममधर्माख्यं न सम्यक् प्रतिभाति मे॥

तथा नारदेन भीष्मं प्रति किञ्चिदुञ्छवृत्तेन उक्तम्। तथाहि,

सत्याख्येनोञ्छवृत्तिना केन विदूषिणा।
यदन्तः पुरुषो लोके तदन्तः पितृदेवता॥

इत्यादिशास्त्रमवलम्ब्य रामादीनां तादृगनुष्ठानञ्च श्रुत्वा श्यामाकादिभिर्यज्ञे क्रियमाणं तद्धर्मपरीक्षार्थं धर्मः स्वयं मृगो भूत्वा तमाह—

यदि मन्त्राङ्गहीनो यो यज्ञो भवति वैकृतः।
मां भो भक्षीय होत्रे त्वं गच्छ स्वर्गमनिन्दितः॥
ततस्तु यज्ञे सावित्री साक्षात्तं स न्यमन्त्रयत्।
निमन्त्रयन्ती प्रत्युक्ता मानसं सहवासिनम्॥

इति वदता सत्येन

पर्यग्निकृतानाख्यानुत्सृजन्तीति शास्त्रदृष्ट्या मृगस्त्यक्तः।
ततः स हरिणो गत्वा पदान्यष्टौ न्यवर्त्तत॥
सा च हिंसय मां सत्य हतो यास्यामि सद्गतिम्।
पश्य ह्यप्सरसां दिव्यां मया दत्तेन चक्षुषा॥
मृगमालोक्य हिंसायाः स्वर्गवासं समर्थयत्।
स तु धर्मो मृगो भूत्वा बहुवर्षोषितो वने॥
तस्य निष्कृतिमाधत्त न ह्यसौ यज्ञसंविधिः।
तस्य तेनानुभावेन मृगहिंसात्मनस्तदा॥
तयोर्महत्समुच्छिन्नं तस्माद् हिंसा न याज्ञिया।
ततस्तं भगवान् धर्मो यज्ञं याजयत स्वयम्॥
सा समानं सभार्याय लोभेन तपसा परम्।
अहिंसा सफलो धर्मो हिंसाधर्मस्तथा हितः॥

इत्यादिना विहितहिंसादेरपि कृष्णत्वस्यैव स्फुटीकरणात्।

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥
यावनर्थ उदपाने सर्वतः संप्लुतोदके।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥

इत्यादिना कर्मकाण्डस्य

नाल्पे सुखमस्ति।

इति श्रुत्यवगतदुःखरूपगुणत्रयकार्यपरिच्छिन्नार्थपरत्वम्। तत एव तत्त्यागेनाऽऽत्मज्ञस्य सर्वानन्दावाप्तिं च वदता भगवताऽपि तथैव ज्ञापनाच्च। अत एव मनुनाऽपि—

यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्॥
एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः।
प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा॥ इति

ननु यद्येवं तदा ज्योतिष्टोमादिकर्माण्युद्दिश्य अशुद्धमिति चेत्, न।

शब्दादिति, प्रणयनं भगवतो बादरायणस्य व्यर्थं स्यादिति चेत्, न। तस्य सर्वं वाक्यं सावधारणमितिन्यायेन मारणाख्यं कर्म हिंसादिदोषघटितत्वाल्लौकिकतादृशवदशुद्धं कृष्णमेव इति चेत्, न।

अग्निषोमीयं पशुमालभेत।

इति विधिशब्दात् कामुकानां शिश्नोदरार्थिनां देवतोद्देशेन तद्विधायकशब्दादिति यावत्। अन्यथाऽशुद्धत्वव्यवच्छेदकार्थस्य शुद्धमेव शब्दादिति सावधारणकस्य शुद्धं शब्दादित्येव सूत्रस्य प्रणयनसम्भवेन न तु द्वयगर्हितं, प्रणयनवैयर्थ्यापत्तेः। तस्मान्नेदं छिन्नं केवलशुद्धत्वमात्रैः, किन्तु केवलाशुद्धव्यवच्छेदकमिति न तद्विरोधलेशोऽपि।

न चात्रैतस्य शुद्धत्वमात्रपरत्वाभिप्रायसमर्थकस्य भगवत्पादीयभाष्यविरोध इति वाच्यम्। मीमांसकमतानुसारेण तस्य तादृशार्थपरत्वात्। अत एव पुराणेषु स्वयमेव भगवता व्यासदेवेन हिंसादिवर्तिनां चतुर्णामप्यसमानं साक्षात्परम्परया मोक्षसाधनत्वं तत्तदा समाभिमानेन स्वशास्त्रविहितकर्मानुष्ठायिनां तु तत्तदुचितलोकावाप्तिः। सर्वथा यमिनां संन्यासिनां तु मोक्षः कपिलेनैवोक्तः—

देवयानादिवै यानं चत्वारः शाश्वता मताः।
एषां ज्यायः कनीयस्त्वं शास्त्रेषूक्तं बलाऽबलम्॥
एवं विदित्वा सर्वार्थानारभेतेति वैदिकम्।
नाऽऽरभेतेति वान्यत्र नैष्ठिकी श्रूयते श्रुतिः॥
अनारम्भे ह्यदोषः स्यादारम्भे दोष उत्तमः।
एवं स्थितस्य शास्त्रस्य दुर्विज्ञेयं बलाऽबलम्॥
संन्यासी मोक्षमाप्नोति ब्रह्मलोकं वनाश्रमी।
स्वर्लोकमृषिलोकं वा गृहस्थब्रह्मचारिणौ॥

इत्यादिना। अयमत्र निष्कर्षः

जायमानो वै नरस्त्रिभिर्ऋणैर्ऋणवान् भवति।

ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्य प्रजया पितृभ्यः॥

इत्युक्तश्रुतेर्यथान्विताश्रमैरनधीत्याऽनिष्ट्वा, प्रजामनुत्पाद्य वाऽनृणत्वस्याऽसम्भ-वात्,

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।

अनपाकृत्य मोक्षं तु सेवमानः पतत्यधः॥

इत्यादिना पापफलस्य पतनस्य श्रवणान्नित्यतया प्राप्तेश्च

असमयेषु संन्ध्यावन्दनादेरिव गार्हस्थ्ये।

वसन्ते वसन्ते ब्राह्मणोऽग्नीनाऽऽदधीत।

वसन्ते ज्योतिषा यजेत।

प्रतिसंवत्सरं सोमेन।

इत्यादिश्रुतिस्मृतिभिर्नित्यतया विहितेष्वग्निहोत्रज्योतिष्टोमादिषु विहितो व्रीहि-पश्वाद्यालम्भो न कामकारः, किन्तु नित्याऽकरणे प्रत्यवायश्रवणात्। तथा च संध्यादि-वन्नित्यस्य यज्ञादेः,

प्रवृत्तिसंज्ञके धर्मे फलमभ्युदयः परः।

न हि धर्माद्भवेत्किञ्चित्पापं नरकदं क्वचित्॥

धर्मः प्रज्ञां वर्द्धयति मानस्तु च पुनः पुनः।

वृद्धप्रज्ञस्तपश्चर्या पापं नारभते क्वचित्॥

धर्मेण पापमपनुदति।

न हि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छति।

इत्यादिपुराणेतिहासादिवाक्यैः पापाजनकत्वव्याप्यं शुक्लत्वमेव प्रतीयते, न पापजनकत्वव्याप्यं कृष्णत्वम्। तथा सति सदभावस्य प्रत्यवायजनकत्वं नोच्येत। न हि पापजनकत्वं पराङ्गनागमनादिरूपकर्मणोऽभावः प्रत्यवायसाधनमिति वक्तुं युक्तं च शुभं वा कृतं वा कुत्रचित् कदाचित् केनचित्। अपि च,

पदे जुहोति, वर्त्मनि जुहोति।

इत्यादिविशेषविधिना

आहवनीये जुहोति।

इति सामान्यविधिर्बाध्यते।

अग्नीषोमीयं पशुमालभेत।

इति विधायकविशेषविधिना

न हिंस्यात्।

इति साक्षात्सामान्यनिषेधो निन्दार्थवादानुमितनिषेधश्च बाध्यत एव, सामान्यस्य विहितातिरिक्ते सावकाशत्वात्। आनुमानिकविशेषस्य च प्रात्यक्षिकविधितो दुर्बलत्वात्। अन्यथा तेन बलवद्द्वेषविषयाऽनिष्टसाधनताबोधरूपां निवर्त्तनां कुर्वतेष्टसाधनत्वप्रतिक्षेपान्नित्यप्राप्तालम्भनादेः प्रवर्तनाविषयत्वानुपपत्तितो विधिर्बाध्येत। न चैतद्युक्तमतिप्रसंगात्। तस्मादुक्तो विशेषविधिर्बलवदिच्छाविषयस्वर्गादिसाधनताबोधरूपां प्रवर्त्तनां कुर्वन् स्वविषयस्य यागादेरनर्थसाधनत्वाभावमप्यर्थादाक्षिपति विधिविषयस्यानर्थसाधनत्वाऽभावादुक्तमेव। नञोऽसत्वे लिङादिविधेः प्रेरणाऽपरपर्याया प्रवर्त्तनैवार्थः। नञःसत्वे तु निवर्त्तनैव। ते च प्रवृत्तिनिवृत्तिप्रयोजकव्यापारद्वयम्।

तत्र प्रधानविधिप्रवृत्तौ भाव्यत्वेन स्वर्गादिफलमन्वेति। अङ्गविधौ तु प्रधानं कर्मैवाऽन्वेति। अङ्गविधिपर्यालोचनया तथैव लाभात्। तथा च हिंसादिविधिना क्रतोर्हिंसादिसाध्यत्वलाभः। निषेधविधिना तु हिंसाद्यनर्थसाधनत्वलाभः। अत्र चानर्थसाधनंत्ववगतमपि न प्रधानविधिर्बाधं प्राप्नोति। अङ्गजन्याऽनिष्टे प्रधानस्याऽप्रयोजकत्वात्। अतो विषयभेदेनाऽविरोधान्न तयोर्बाध्यबाधकभावः सम्भवतीति। क्रत्वर्थापि हिंसा दुष्टैवेति, तद्घटितं कर्म न शुक्लमेव, किं तु कृष्णमपीति चेत्, सत्यं, यद्यप्यङ्गविधिपर्यालोचनायां नास्ति विरोधस्तथापि ज्योतिष्टोमविधिः साङ्गप्रधानं पुरुषस्य विहितपुरुषार्थहिंसानिषेधमग्नीषोमीयहिंसायामनवरतम्।

न ह्यग्नीषोमीयहिंसां वर्जयित्वा ज्योतिष्टोमः शक्यते अनुष्ठातुम्। तत्र च निषेधप्रवृत्तौ प्रधानविधिरेव बाध्येत। निषिद्धाङ्गं न प्रधानं केवलं कारणं, साङ्गस्यैव फलसाधनत्वश्रवणात्। तस्मादस्ति विरोध इति सामान्यबाधः। अतः हिंसाया अदुष्टत्वात् तद्घटितं कर्म ज्योतिष्टोमादिकं शुक्लमेव।

एवं श्येनस्यापि वैधप्रवर्त्तनाविषयत्वात् पुरुषकामितपुरुषार्थसाधनत्वाच्च। धर्मत्वमेव अभिचारहीनं च त्रिभिः कृच्छ्रैर्व्यामोहनित्यादिप्रायश्चित्तं तु तत्र तज्जन्यफलस्य शत्रुवधस्याऽशास्त्रीयस्य नरकरूपाऽनिष्टसाधनाऽधर्मत्वात्। अत एवास्मात् काम्यान्नित्यानां ज्योतिष्टोमानां भेदः। तत्र फलसाधनयोरप्यनिष्टसाधनत्वाभावात्।

तस्माद्विधिविषयः सर्वोऽपि हिंसादिवर्जस्तदनुष्ठितो वा धर्म एव शास्त्रप्रामाण्यादिति जैमिनीयानामाशयः। तथा फलसाधने रागत एव प्रवृत्तिसिद्धेर्न तु यागस्य प्रवर्त्तकत्वम्। तेन श्येनस्य रागजन्यप्रवृत्तिविषयत्वादौदासीन्यान्न तस्यानर्थहेतुत्वं विधिना प्रतिक्षिप्यते।

अग्नीषोमीयहिंसायां तु क्रत्वङ्गभूतायां फलसाधनत्वाभावेन रागाभावाद्विधिरेव प्रवर्त्तकः। स च स्वविषयस्यानर्थहेतुतां प्रतिक्षिपतीति। प्रधानभूता हिंसा अनर्थं जनयति, न क्रत्वर्थेति। न हिंसाया निश्चितत्वेन ज्योतिष्टोमादेर्दुष्टत्वमिति जैमिनीयैकदेशिनां प्राभाकराणामाशयः।

तथा श्येनादेरभिचारस्य साक्षाद्वेदेन निषेधात्। प्रायश्चित्तोपदेशाच्च बलवदनिष्टाऽजनकत्वरूपविध्यर्थस्य बाधादधर्मत्वम्। अग्नीषोमीयहिंसादेस्तु निषेधाद्यश्रवणाच्च बलवदनिष्टाऽजनकत्वरूपविध्यर्थस्याऽबाधाद् धर्मत्वमिति तार्किकाणामाशयः। साधुश्चैतद् भाति शास्त्रप्रामाण्याऽभ्युपगन्तृणाम्।

धर्माधर्मयोः शास्त्रैकप्रमाणत्वादिति चेत्, सत्यम्। अत्रायमभिप्रायः पतञ्जलिकपिलव्यासप्रभृतीनां **न हिंस्यात्** इति निषेधशास्त्रं हिंसाविधायकविशेषशास्त्रेण बाध्यते। तेन हिंसामात्रस्यानर्थसाधनत्वावगतावपि वैधहिंसायां क्रतूपकारकत्वस्य तद्घटितप्रधाने च स्वर्गादिफलसाधनत्वस्यावगतौ बाधकाभावात्।

न हि अनर्थसाधनत्वावगतप्रवर्तनाविषयत्वं विरुध्येत्, येन प्रवर्तना स्वविषयस्याऽनिष्टसाधनत्वमाक्षिपेत्। तादृशानर्थे बलवद्द्वेषाणाञ्च दशायां स्वर्गादौ रागौत्कट्यमात्रेण प्रवृत्त्युपपत्तेः। अत एव लौकिकहिंसाद्यनेकानर्थेऽपि तज्जन्यानर्थे बलवद्द्वेषाऽभावदशायां तात्कालिकेष्टे रागौत्कट्यमात्रेण दृश्यते प्रवृत्तिः। वस्तुतस्तु बलवद्द्वेषविषयाऽनिष्टसाधनमिदमिति ज्ञानसत्वेऽपि दृश्यते रागौत्कट्यादास्तिकस्य मुमुक्षोरपि प्रवृत्तिरिति बलवद्द्वेषविषयोद्दिष्टेष्टसाधनताज्ञानस्य उत्कटरागजन्यप्रवृत्तावेव विरोधित्वं कल्प्यते।

तथा च तादृशाऽनर्थे साक्षान्निषेधवाक्यैर्निन्दार्थवादानुमितवाक्यैर्यागादौ बलवद्द्विष्टसाधनत्वेऽवगतेऽप्यास्तिककामुकस्य स्वर्गादौ रागौत्कट्यादुपपद्यते प्रवृत्तिः। सर्वत्रैव हि विधिना सर्वस्यैवाधिकारिणो यागादौ रागौत्कट्याऽविषया या स्वर्गादितत्साधनताबोधमात्ररूपा प्रवर्त्तनैव क्रियते। रागद्वेषयोरौत्कट्यं तु जन्मान्तरीयकर्मवशात् कादाचित्कमेककालिकञ्च। न तत्र विधिनिषेधयोर्व्यापारः। तद्व्यापारभूतयोश्च कर्म बलाबलतारतम्येन पापाद्यनिष्टसाधनत्वस्वर्गसाधनत्वयोस्तात्कालिकसुखदुःखसाधनत्ववन्नैव कश्चिद्विरोधः। अतः,

भूतिकामो वायव्यं श्वेतमालभेत।

इति वायव्यादिपशुहिंसायाः प्रत्यवायसाधनत्वैकरूपकारकत्वभूत्यादिसाधनत्वादिविरोधित्वाच्च निषेधस्तद्भिन्नपरत्वेन संकोच्यते। अत्र संकोचे मानाभावात्। यत्रापि

नित्यपशुयागस्थले अकरणे प्रत्यवायश्रवणम्। तत्रापि करणे स्वल्पः प्रत्यवायोऽकरणे तु भूयानित्येवं कल्पनात् प्रवृत्त्युपपत्तेर्न कश्चिद्विरोधः।

न हि धर्माद्भवेत्किञ्चित्पापमित्याद्युदाहृतवाक्यं तु तुल्यबलपापाऽजनकत्वव्याप्यं शुक्लत्वं बोधयति। न तु केवलं पापजनकत्वव्याप्यं पापं, कथमिति वाक्यशेषेणैव तथा प्रतिपत्तेः। अन्यथा,

तस्य तेनानुभावेन मृगहिंसात्मनस्तदा।
तपो महत्समुच्छिन्नं तस्माद् हिंसा न यज्ञिया॥

इत्यादिमोक्षधर्मायोदाहृतवाक्यैर्यज्ञीयहिंसाया दुष्टत्वं प्रतिपाद्यमानं वितुद्येत। तस्मात्सिद्धं यज्ञीया हिंसा प्रधानाङ्गविधिविषयत्वात् प्रधानमुपकरोति समिधादिवद् इष्टोपपत्तिनाऽऽन्तरीयकमनर्थं च जनयतीति। तद्घटितज्योतिष्टोमादिकं कर्म शुक्लकृष्णं विधितो निन्दार्थवादानुमितनिषेधात् षोडशिग्रहणाऽग्रहणवत्कृताऽकृतमेव। तद्दोषसहिष्णोस्तत्राधिकार इति न्यानेन न श्येनादिष्विव कामकारकृतमेव अश्रद्दधानस्य तत्र प्रवृत्तिः। अपि च,

उपनयनादूर्ध्वमेनानि प्राग्वद्विसृजेत्।

इयं मानुषी श्रुतिः।

यदि वेतरथाऽब्रह्मचर्यादेव प्रव्रजेत्।
यदहरेव विरजेत् तदहरेव प्रव्रजेत्॥

इत्यादिजाबालश्रुत्याऽनावश्यकतया सूचितेषु ब्रह्मचर्याद्याश्रमेषु सलिङ्गेष्वनित्येषु गार्हस्थ्यस्य,

शिश्नोदरकृतेऽप्राज्ञो विवसं बहु भुञ्जते।
मोहरागवशाक्रान्त इन्द्रियार्थवशानुगः॥
मनोपस्थेन्द्रियस्येह विषयान्याति सेवितुम्।
तस्यौत्सुक्यं च भवति प्रवृत्तिश्चोपपत्तितः॥
ततो विहारैर्नात्मानं स सम्यगवबुध्यते।
अविद्यानां गतिस्त्वेषा बुध्यतां योग उत्तमः॥

इत्यादिशौनकवाक्योपोद्बलिताऽनुभवप्रमाणकशिश्नोदरार्थे हेतुरागद्वेषकृतत्वेनाऽतितुच्छत्वात् सुतरां तन्मूलकरागनित्यत्वं तुच्छत्वञ्च। अतो रागिणः पुरुषस्य मुमुक्षोः शुद्धकरणे प्रत्यवायगन्धोऽपि नास्ति, उक्तवाक्यैरेव व्यवस्थालाभसम्भवात्।

न च ऋणित्वश्रुतिविरोधः। इत्थञ्च ऋणिश्रुतौ जायमान इत्यस्यापि नोत्पद्यमान

इत्यर्थः, किन्त्वधिकारिसम्पद्यमान इत्यर्थः। न चात्र किं विनिगमकमिति वाच्यम्। आश्रमाऽनित्यबोधकप्रमाणस्य नैष्ठिकब्रह्मचर्याद्यङ्गीकारेण जायमानप्रजोत्पादनाऽनङ्गीकारपक्षादेश्च विनिगमकत्वात्। न च ऋणित्वश्रुतिविरोधात्,

यावज्जीवमग्निहोत्रं जुहूयात्।

इत्यादिविधिविरोधाय संन्यासादिश्रुतिरेवाऽन्धपंग्वादिविरक्तपरा भविष्यति।

तत्रैव शक्यते वक्तुमन्धपंग्वादयो नराः।
गृहस्थे हि न शक्नोति कर्तुं तेषामिमं विधिम्॥
नैष्ठिकब्रह्मचर्यं वा परिव्राजकतापि वा।

इति मीमांसावार्त्तिककृद्भिस्तथा प्रतिपादनादिति वाच्यम्।

यदहरेव विरजेत् तदहरेव प्रव्रजेत्।

इति प्रत्यक्षसंन्यासविधितो ऋणश्रुतेरर्थवादस्य दुर्बलत्वात्। अतः सन्निहितयावज्जीवाग्निहोत्रविधिस्तुतिमात्रपरस्य विध्यन्तरकल्पनेऽसामर्थ्यात्। कल्पनेऽपि वा रागवदाऽऽधिकारिकविधेरेव कल्पनात्। तद्विरोधेन न संन्यासविधिः संकोच्यते। प्रत्यक्षश्रुतिसंकोचापेक्षयाऽर्थवादबाधस्यैवौचित्यात्।

अपि च मीमांसायां विधानार्थाऽसमर्थेऽधिकारित्वादिवाक्यैः श्रुत्यर्थज्ञानवतः कर्मफलरागिणः समर्थस्यैव कर्मण्यधिकारप्रतिपादनात्। जातमात्रस्य श्रुत्यर्थबोधाऽनर्हस्याधिकारत्वाऽयोगात्। कर्मफलाऽनभिलाषिणां गर्गाक्षपादशुक्रवसिष्ठमार्कण्डेयशौनकप्रभृतीनामसमर्थानां शिलोञ्छवृत्तिमुद्गलप्रभृतीनां गृहस्थानामपि नित्यज्योतिष्टोमाद्यकरणश्रवणात्। अकरणे प्रत्यवायाऽश्रवणात्। देवलप्रभृतीनामनुत्पादितसुतानामपि संन्यासश्रवणाच्च जायमानपदं लाक्षणिकं वाच्यमिति।

ऋषीणामभिज्ञनिष्कामाऽसमर्थभिन्नपरत्वेनाऽवश्यं संकोचनीयम्। तथा च न तदनुरोधात् संन्यासविधीनां संकोचः शक्यः कर्तुं केनापि। एवं यावज्जीवाऽग्निहोत्रविधिरपि रागिसमर्थविज्ञपरतयैव व्यवस्थाप्यते। रागाभावेऽग्निहोत्रानुष्ठानासम्भवात्। संन्यासे यदहरेवेत्येवकारोदये क्षणीयान्तराऽभावावगमाच्च। एतदपि प्रेत्यैव वेदान्तवार्त्तिकेऽप्युक्तम्।

न चेहाऽविदुषोऽपि स्यादृणित्वं हेत्वसम्भवात्।
न किञ्चिन्नः सुरैर्वृत्तं ऋणित्वं येन नो भवेत्॥

शास्त्रादृणित्वमिति चेत्, न। शास्त्रस्यार्थवादतः अवदानविधेरर्थवादो ऋणिवचः श्रुताविति। तस्मात्सिद्धमवशीकृतचित्तेन रागिणा शुक्लकृष्णानि कर्माणि प्रायो वशीकृते,

न तु शुक्लान्येव सर्वथा वशीकृते, न तु संन्यासादिनाऽशुक्लाऽकृष्णान्येव कार्याणि नान्यानि। जातबोधस्य विरक्तस्य

त्यज धर्ममधर्मञ्च उभे सत्याऽनृते त्यज।

उभे सत्यानृते त्यक्त्वा तस्मात् त्यजसि तत् त्यज॥

इत्यादिना शुक्लकृष्णयोर्द्वयोस्तद्बीजस्य च त्यागप्रतिपादनात्। पितापुत्रसंवादेऽपि पुत्रस्याऽशुभभयादिग्रहात् प्रागेव जातबोधस्य धर्मार्थदयात्रयीधर्मत्यागलाभाच्च। अतो ऋणानि त्रीण्यपाकृत्येतिमनुवाक्यमप्यपक्वचित्तपरतयैव नेयम्। यः पक्वकषायः पुरुष आपातबोधजातवैराग्येण क्रोधवियोगादिजनितेन तौष्टिकेन वा गार्हस्थ्यादेस्तुच्छत्वमभिसंधाय हठात् ऋणान्यनपाकृततयाऽकृतमोक्षः शमं संन्यासं करोति, स अधो याति नान्यो भगवद्भक्तादिरिति तादृशस्य यजने प्रजोत्पादने च समर्थस्यापि देवर्षितुल्यानां चित्तानाम्,

न किंकरो नायमृणी च राजन् सर्वात्मना यः शरणं शरण्यम्।

गतो मुकुन्दं परिहृत्य कृत्यं तत्पादमूलं भजतः प्रियस्य॥

त्यक्तान्यभावस्य हरिः परेशः,

विकर्म यच्चोपपतितं, कथञ्चिद् धूनोति सर्वं हृदि सन्निविष्टम्॥

इत्यादिना निष्कामत्वभक्त्या माहात्म्येनैवानृणित्वनिष्पापयोः प्रतिपादनात्।

न चार्थित्वनिष्कामत्वयोः स्वाधीनत्वाद् इष्टां प्रजां चोत्पाद्यैव निष्कामभक्तिरुचिता। अत एव जरत्कारप्रभृतेर्गार्हस्थ्याऽसम्पादनमपि श्रूयत इति वाच्यम्। परीक्ष्य कर्मचिताञ्छोकान् ब्राह्मणो निर्वेदमायात्।

नास्य कृतः कृतेन।

इति श्रुत्या निर्वेदस्य कर्मफलाऽनित्यत्वबोधादिपरीक्षामात्रकर्त्तव्यत्वोक्त्या गार्हस्थ्योत्तरकर्त्तव्यत्वादिविषयाभावात्।

पूर्वाऽभ्यासेन तेनैव ह्रियते ह्यवशोऽपि

सः सदृशं चेष्टते। तस्याः प्रकृतेर्ज्ञानवानपि॥

इत्यादिना रागनिर्वेदादयः प्राक्तनसंस्काराधीनत्वं वदता भगवता स्वाधीनत्वाऽभावप्रतिपादनाच्च। अपि च

यदहरेवैनस्तदहरेवोपरमेदधीत्याथ यजेत्।

इति शतपथश्रुतेराधानादिषु सश्रद्धोपकारित्वम्। श्रद्धा चाधीतवेदस्याऽऽपाततः प्रतिपन्नवेदार्थस्य अदृढेत्याद्युदाहृतश्रुत्या यज्ञानामदृढत्वं दर्शयन्त्या प्रागेवापनीता। तया च गृहस्थस्याप्यधिकारिणः श्रद्धाऽधीनस्यैव रागौत्कट्यात् तत्र प्रवृत्तिः। यथा केवलकृष्णे

कदाचिद्विज्ञाऽविज्ञस्य वा। न चोपनिषदध्ययनात् यागे च यज्ञपतिः सम्भवति। येन निन्दाश्रवणात् प्रागेववन्न श्रद्धाऽऽवश्यकत्वबुद्धिश्च सम्भाव्येत।

स्वाध्यायोऽध्येतव्यः।

इति ब्रह्मचर्येण नार्थज्ञानपर्यन्तस्योपनिषदध्ययनस्य सिद्धत्वात्। यदि तु काण्डद्वयव्यापि अपि पूर्वकाण्ड एव श्रद्धावान् भवति, तर्हि तस्य मोहशंकारागवशात् तस्य ऐन्द्रियरागस्य कर्मनिबन्धनमधरीकुर्वतस्तत्त्वज्ञानासिना छिन्नः। अतो न नः किञ्चिच्छिन्नम्। सर्वथाऽप्यज्ञानाद् रागौत्कटनादेव हिंस्रकर्मणि प्रवृत्तिरिति सिद्धम्। वस्तुतस्तु स्वर्गपदार्थः—

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्॥

इति शास्त्राद्दुःखाऽसंस्पृष्टं धारावाहिकं सुखं तच्च जगतः स्वत एव काम्यं, तत्साधने च साङ्गे रागत एव प्रवृत्तिः सम्भाव्यते। साधनतामात्रं च वेदादवगम्यते। यथा शत्रुवधो दुःखनिदाननिवृत्तितया सर्वस्य काम्यः तत्साधने च रागत एव प्रवृत्तिः। साधनतामात्रं श्येनस्य वेदेन बोध्यते, एतावन्मात्रेण च न विधिविषयत्वमिष्टसाधन-तयाऽवगतेऽपि रागं विनाऽनुष्ठानाऽसम्भवात्। अतो रागजन्यप्रवृत्तिविषयत्वात् श्येन इव साङ्गज्योतिष्टोमाऽवधिरौदासीन्यमेव।

यथा वा ऋतुगमनसौत्रामणीसुराग्रहादौ ऋतुकालादावपि व्यवायादेः रागत एव प्राप्तत्वात्। तदुक्तं भागवते—

लोके व्यवायामिषमद्यसेवानित्यास्तु जन्तोर्न हि तत्र चोदना।
व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासुनिवृत्तिरिष्टा॥

इति। अयमर्थः, हि यस्मात् लोके प्राणिनां व्यवायः स्त्रीसम्भोगः। आमिष-मद्यसेवा आमिषं मांसादि, मद्यं सुरा, अनयोः सेवा भक्षणं, पानं चरति। नित्यास्तु रागत एव यास्ता एव, तेषां रागौत्कट्येन तत्साधनतया गतेषु रागत एव प्रवृत्तेरानुभावि-कत्वात्। तत्र तेषु व्यवायादिषु न चोदना ऋतौ भार्यामुपेयात्।

सौत्रामण्यां सुराग्रहान् गृह्णाति।

इत्येवं वाक्यं न विधिः। नाऽत्यन्ताऽप्राप्तप्रापकविधिः, किन्तु नियमविधिरूप-मित्याह—**व्यवस्थितिरि**ति। तेषु व्यवायामिषमद्यसेवासु विवाहयज्ञसुराग्रहैर्व्यव-स्थितिः। स्वीयायां न परकीयायाम्, स्वीयायामपि ऋतुदिनेषु तद्भिन्नदिनेषु च रागतः प्राप्तं मैथुनं, विवाहे न स्वीयायां ऋतुदिनेष्वेव। एवं रागतः सदाप्राप्तमामिषभक्षणं ज्योतिष्टो-मादियज्ञ एव।

सुरापानं च सौत्रामणे यज्ञ एव कर्त्तव्यम्।

इत्येवंविधानुमतिरूपनियमो व्यवस्थितिः। यथा

व्रीहीनवहन्ति।

इत्यत्र पुरोडाशसाधनीभूततुषविमोकसाधनतया लोकत एव प्राप्तं नखविदलनावघातश्च। तत्र नखविदलनपक्षेऽप्राप्तस्यावघातमेव कुर्यादिति। न तु तथापि तत्र नियमादृष्टलाभेन तत्र कुर्यादेव नियमलाभादावश्यकतेत्याशङ्क्याह—**आसु निवृत्तिरिष्टेति**। आसु व्यवायामिषमद्यसेवासु निवृत्तिः परिसंख्यैवेष्टा, नाऽयोगव्यवच्छेदफलको नियमः, प्रापकप्रमाणप्रवृत्त्युत्तरमेवास्य शास्त्रस्य प्रवृत्तेः। यथा वा प्राप्तेयं पञ्चनखभक्षणे।

पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव।
शशकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः॥

इति परिगृहीतपञ्चातिरिक्तमार्जारादिनिवृत्तिफलकत्वात्। उपलक्षणमेतत् यागीयहिंसादेः।

हिंसायां यदि रागः स्याद् यज्ञ एव न चोदना।

इत्यादिना भागवते तत्रापि विधिविषयत्वनिरासात्। यद्यपि नित्यनैमित्तिकयोः कामनाविशेषानुबन्धो नास्ति, किन्तु नित्यनैमित्तिकयोरकरणे प्रत्यवायमात्रम्। अकरणे प्रत्यवायभियैवानुष्ठानाद्विधिविषयत्वमपि। अतो न श्येनादाविव रागप्राप्तत्वमपि। तथाहि,

श्येनेनाभिचरन् यजेत।

इति सामानाधिकरण्येन श्येनकर्तृकतयाऽवगतस्याऽभिचारस्य मरणानुकूलविषदानादिरूपस्य मरणप्रयोजकव्यापारस्य श्येनफलस्य प्रमाणान्तरतोऽवगतत्वात् तत्साधने श्येने सम्भवति रागतः।

न हिंस्यात्।

इति निषेधविषयत्वेन विधिशक्तिस्फुटीभावश्च श्येनेनावश्यं वैरिमरणमिति। नैवमग्नीषोमीयहिंसायां तत्फलस्य तद्घटितप्रमाणान्तरतोऽप्राप्तत्वात् तत्साधने रागतः प्रवृत्तेर्बाधात्।

यदि व यथाकथञ्चित्फलज्ञानमादाय तज्जनितोपायेच्छाप्रयुक्तकृतिविषयत्वरूपाद् रागतः प्राप्तिः समानेत्यभिमानस्तदा सर्वत्रैव विधिलोपप्रसङ्गः। सुखे सुखसामान्येच्छया योऽर्थः इच्छयैव सर्वप्रवृत्तेः विशिष्य तत्तत्सुखरूपविशेषज्ञानमित्यर्थः। ज्ञानं प्रकृतेऽपि समानम्। अतो ऋतुकालीनगमनादिफलभूतायाः प्रजायाः विधिप्रवृत्तिर्नापि उपप्लवते, तन्निमित्तीकृत्य ऋतुगमननियमनद्वाराऽन्यदा सम्भोगमात्रनिवृत्तिर्लभ्यत इति युक्तम्।

तत्र न चैव परम्परया प्रत्यवायनिवृत्तिर्वा, तच्च न मानान्तरेणाऽवगतम्। पुरोवादाभावाच्च नानुवादरूपमपि। वाक्यं यदा लभेत तदाऽग्नीषोमीयमिति देवतामात्रविधायकं येन सामान्येन आलभतेरवगतफलकत्वं स्यात् किन्तु पशुविशिष्टं कर्म, पशोश्च संस्कारात् हृदयस्याग्रेऽवद्यतीत्यादिना विधीयन्ते। तस्मात् चोदनेत्यनेन तत्र विधिविषयत्वखण्डनं न युक्तम्।

शास्त्रेणैवेष्टसाधनत्वावगमात्, प्रवृत्तेः रागतः प्राप्तत्वाऽभावात्। तथापि,

अकामस्य क्रिया काचित् दृश्यते नेह कर्हिचित्।
यद् यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम्॥

इति स्मृतेर्नित्ये नैमित्तिके च सर्वत्रेष्टसाधनत्वमेव विधिनाऽऽक्षिप्यते। इष्टञ्च

कर्मणा पितृलोकः।

इति श्रुतेः। पितृलोकादिकं तत्र सकामं हिंस्रकर्मणि प्रेरयति। चोदनाऽन्यत्राऽऽलम्भननिवृत्तिं सूचयति। सकामो यदि हिंस्रकर्मणि सरागः स्यात्तदा स्वर्गाद्युद्दिश्य

क्रत्वादिरूपतेव हिंस्रकर्म कुर्यात्।

इत्यभ्यनुज्ञा द्वाराऽन्यल्लौकिकं हिंस्रं कर्म न कुर्यादिति सिद्धपरिसंख्या। अत एव चान्तःकरणशुद्ध्यर्थं कृत्येभ्योऽपि तेभ्यो नात्यन्तिकीपापनिवृत्तिः, किन्त्वभिनयमात्रमिति सूचितम्,

कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते।
अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनम्॥

इत्यादिना भागवते। तस्माद्युक्तमुक्तं हिंसायां यदि रागः स्याद् यज्ञ एव न चोदनेति। न चोदनेत्यनेनाऽत्यन्ताऽप्राप्तप्रापकमेव वाक्यं मुख्यो विधिः।

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते॥

इति विधेः स्वार्थेऽज्ञाताबाधितार्थकत्वेन प्रामाण्यात्। नियमविधिस्तु अन्यतः प्राप्तकर्त्तव्यताकस्याऽर्थस्याऽयोगव्यवच्छेदमात्रफलत्वात्। परिसंख्या तु विध्यभाव एव। स्वार्थहानिः, परार्थकल्पना, प्राप्तबाधश्चेति दोषत्रयोपेतत्वात्।

न च, अत एव मास्त्वत्र परिसंख्येति वाच्यम्। अगत्या

पञ्च पञ्चनखा भक्ष्याः।

इत्यादाविवावश्याऽऽदरणीयत्वात्। स्वार्थस्य यागकर्त्तव्यत्वस्य हानेः, परार्थस्याऽन्यनिवृत्तिरूपार्थस्य कल्पनायाः, प्राप्तस्य स्वर्गादिरागेण प्रवृत्तिरूपार्थस्य बाधः

इष्टापत्तिः। तस्मात्सिद्धयागादिकर्मविध्याभासविषयत्वान्न शुक्लमेव, किन्तु शुक्ल-कृष्णमेव न वेदं मुमुक्षुजनकर्त्तव्यताकं किन्त्वशुक्लाऽकृष्णमेव। तथैव शिष्टाचारादिति संक्षेपः।

ननु तर्हि शिष्टजनकादीनां शुक्लकृष्णकर्मानुष्ठानमनुपपन्नमिति चेत्, न तेषामपि

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।

इत्यनेन ज्ञानोत्पत्तेः पूर्वमेव गार्हस्थ्याभिमानोचितं तथा कर्मसूचनादनुपपत्तेर-भावात्। न यदि तु ज्ञानकालेऽपि तादृशानां तथा कर्मणि प्रमाणमस्ति तदा लोक-संग्रहार्थानि मन्तव्यानि,

लोकसंग्रहमेवाऽपि संपश्यन् कर्तुमर्हसि॥

इति वदता भगवता आज्ञापनात्।

न च तथापि वस्तुतस्तेषां शुक्लकृष्णत्वात् तत्फलयोः सुखदुःखयोरापत्तिः। वस्तुतः परपीडाऽनुगृहीतत्वेन शुक्लकृष्णत्वे ह्यभिमानफलयोस्त्यागेन तान्प्रत्यशुक्लाऽ-कृष्णरूपत्वस्योक्तत्वेन तत्फलस्याऽसम्भवात्। फलकामनावत एव कर्मभ्यः फलोत्पत्तिश्रवणादित्यन्यत्र विस्तरः॥७॥

ननु तिष्ठत्वयोगिनामथाऽविद्यकर्म, तथाप्यनाद्यनन्तकाले कदाचिद्वासनाऽनभि-व्यक्त्या मोक्षः स्यादेवेति किमर्थं नियमेन ध्यानजस्यानाशयचित्तस्यापेक्षेत्यत आह—

ततस्तद्विपाकानुगुणानामेवाऽभिव्यक्तिर्वासनानाम्॥८॥

तत इति। त्रिविधात्कर्मणो मरणकालानन्तरं जात्यायुर्भोगरूपविपाकदानायाऽ-भिव्यक्तात् तद्विपाकानुगुणानामेव वासनानां यस्य कर्मणो विपाकस्तस्यानुगुणा या वासनाः कर्मविपाकमनुकुर्वन्ति, तासामेवानादिकालसञ्चितानामभिव्यक्तिरुद्गमो भवति। फलोन्मुखादेव कर्मणो देवजातीयभोगोचितवासनानामेवोद्भवः। मानुष-नारकादिकर्मणः फलोन्मुखात्तु मनुष्यादिजातीयभोगोचितवासनानामेवोद्भवो न दैवानाम्। सर्वासामेव सर्वत्राभिव्यक्तौ तत्तज्जातिनियतभोगो न स्यात्। हीने प्रकृष्ट-वासनायाः, प्रकृष्टे हीनवासनायाः प्रतिबन्धकत्वात्। तस्माद्वासनाऽभिव्यक्ते-र्नैयत्यान्नाऽयोगिनां तत्त्वज्ञानं विना मोक्षाऽऽशङ्का गन्धोऽपीति दिक्॥८॥

बहुजन्मव्यवहितानामपि वासनानामभिव्यक्तिं कर्मफलान्यथानुपपत्तिप्रमाणेन साधयति—

जातिदेशकालाव्यवहितानामप्यानन्तर्यं स्मृति-
संस्कारयोरेकरूपत्वात्॥९॥

जातीति। जातिः योन्यन्तरं, देशः भूर्भुवःस्वर्लोकादिः, कालो युगकल्पादिः तैः व्यवहितानामपि अन्तरितानामपि वासनानां आनन्तर्यं अव्यवहितवत्कारित्वं भवति। अन्यथा कर्मफलाऽनुपपत्तेः, स्मृतिसंस्कारयोरेकरूपत्वात्, एकाकारत्वादित्यर्थः। नानायोनिषु परिभ्रमन् जीवः कामपि मनुष्यादियोनिमनुभूय यदा सुकृतासुकृतकर्मबलतो देवादियोन्यन्तरसहस्रव्यवधानेन, स्वर्गादिलोकव्यवधाने, युगकल्पादिव्यवधानेनैव पुनर्मनुष्यादियोनिं प्रतिपद्यते, तदा तद्योनिभोगोचितवासनास्तदानीन्तना एव मध्ये योन्यन्तरेण तिरोहिताः। पुनस्तद्योनिरूपोद्बोधकसमवधानेन तद्योन्युचितकर्मफल-भोगार्थं प्रकटीभवन्ति। अतस्तासां व्यवहितानामप्यानन्तर्यमर्थाद्भवति, अव्यवहित-फलजननात्। न तु व्यवहितप्राग्जन्मन्येवान्यादृशेऽपि योन्यन्तरवासना वक्तुं शक्या।

न चान्यजातिसंस्कारेणैवाऽन्यजात्युचितविपाकनिर्वाहिका स्मृतिः सम्भवति, स्मृतिसंस्कारयोरेकरूपत्वात्। यथाऽनुभवास्तथाः संस्काराः। ते च कर्मफलोन्मुख-वासनारूपाः। यथा च वासनास्तथा स्मृतय इति स्मृतिसंस्कारवासनोद्बोधाद् योनिवि-शेषाद् युज्यते। अत एव व्यवहितानामपि धारानुच्छेदात् पुनः सजातीयविपाकान्तरा-रम्भकत्वं सम्भवत्येवेति दिक्॥ ९॥

ननु जन्मान्तरितवासनाः न सन्ति मानाभावात्। न च योनिव्यवहितभोगानु-पपत्तिरेव प्रमाणमिति वाच्यम्। रूपादिविशिष्टस्य सवासनस्यैव जनकत्वस्वाभाव्या-दुत्पत्तिः, तां विनाऽनुपपत्तेरिति चार्वाकाशङ्कायामाह—

तासामनादित्वं चाशिषो नित्यत्वात्॥ १०॥

तासामिति। तासां वासनानाम्, अनादित्वं धाराऽनादित्वम्। कुतः? आशिषो नित्यत्वात्'सदा जीव्यासमि' ति मरणत्रासस्य प्रतिजन्मनियतत्वात्। तथा च तत्तज्ज-न्मन्यनुभूते मरणे भयस्य पूर्वजन्मानुभवाधीनसंस्कारजस्मृत्यैव सम्भवाद्वासनानामना-दित्वम्। चकारात् कार्यकारणभावश्च सिध्यति। सर्वत्र जन्मानुभवस्मृत्यादौ प्राथम्या-भावेन वासनापरम्पराभिः कार्यपरम्परासम्भवात्। यदुक्तं सवासनस्यैव जनकत्वस्वाभा-व्यादुत्पत्तिरिति। तन्न युक्तं, सवासनजन्मप्रत्यपि संस्कारजाऽदृष्टस्य हेतुत्वेन ममतादि-वैचित्र्योपपत्तयेऽवश्यवक्तव्यतया संस्कारधाराया अनादित्वमिति सिद्धम्। यद्यप्य-त्राऽऽशीर्नित्यतया तद्धेतुवासनाया एवाऽनादित्वं सिध्यति न भोगवासनानां, तथापि तत्राऽनवस्थायाः प्रामाणिकत्वेनाऽदोषत्वे तदद्दृष्टान्तेनाऽन्यासामप्यनादित्वमनुमेयमिति भावः॥ १०॥

ननु अनादिवासनानां कथमुच्छेदोऽनादिभावस्य नित्यत्वनियमात्? तत्राह—

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः॥ ११॥

हेत्विति। नैताः पुरुषवदनादयः, किन्तु प्रवाहानादय इति उच्छेदसम्भवः, तदेव दर्शयति। हेतुः अविद्या तत्कार्यञ्च। तथाहि—सत्त्वाद्धर्मस्तस्मात् सुखं, रजस्तमोभ्याम-धर्मः तस्माद् दुःखम्। सुखाद्रागो दुःखाद्द्वेषः, ततश्च प्रपञ्चः। तेन मनसा वाचा कायेन वा परिस्पन्दमानः परमनुगृह्णाति उपहन्ति, ततः पुनर्धर्माधर्मौ, ततः सुखदुःखे रागद्वेषाविति प्रवृत्तमिदं षडरं संसारचक्रं देहाद्यनेकानर्थरूपम्। तस्य प्रतिक्षण-मावर्त्तमानस्याऽविद्यैव मूलकारणम्। फलं शरीरादि स्मृत्यादयश्च, आस्कन्दितत्वात्। एषां योगजविवेकज्ञानेन दग्धबीजभावकल्पत्वे विहिते निर्मूलत्वान्न वासनाः प्ररोहं यान्तीति तासामभावः॥ ११॥

ननु वासनानामत्यन्तोच्छेदाऽभ्युपगमे सत्कार्यवादहानिप्रसंगः। सत्कार्यवाद-पक्षेऽसतः सम्भवस्य सतो विनाशस्य चानङ्गीकारात्। अत एव नात्यन्तोच्छेदस्तदा कुतः कैवल्यवार्त्ता? तत्राह—

अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम्॥ १२॥

अतीतेति। भवेदप्ययं दोषो यदि स्वरूपाऽपायो वासनानामस्माभिरुच्येत, किन्त्वत्यन्ताऽतीततामात्रम्। यतोऽतीतानागतं भूतभविष्यद्वर्तिवस्तु दृश्यं स्वरूपतोऽस्ति। कारणादौ नास्ति योगिनां दर्शनम्, अतिप्रसंगोत्पत्तेः। सतो विनाशाऽसम्भवाच्च।

नन्वेकदा विरुध्यमानानां धर्माणां कथमेकत्र सत्ता घटेत? तत्राह—**अध्व-भेदादि**ति। भिन्नाध्वकत्वादविरोध इत्यर्थः। वर्तमानलक्षणानामेव धर्माणामेकदा विरोधो नाऽन्यादृशाम्। इत्थञ्च वर्तमानाऽध्वनि दुःखादिवासनाश्रयं चित्तं साधिकारभोग्यता-माऽऽयत् बन्ध इत्युच्यते। तत्त्वज्ञाने सति निरधिकारमतीताध्वनि प्रवेशितम्। प्रकृत्या-त्मना पुरुषार्थस्य कृतकृत्यत्वात् पुनरावृत्तिरहितमुक्तमिति भावः।

एतच्च वेदान्तिनामपि वस्तुतोऽविरुद्धम्—

वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्।

इत्यादिश्रुतेः। कार्यस्य कारणमेव स्वरूपमिति तैरप्यङ्गीकारात्। तथा च कार्याऽऽकारेण भासितैव स्वप्न इति। योगिज्ञानेऽप्यतीतानागतवर्त्मना परिणामो विषयः। अतो न कार्यस्य भानार्थे पृथक्सत्त्वमाऽऽवश्यकम्। कारणसद्भावेनैव नित्यत्वसम्भवात्। कारणञ्च पूर्वपूर्वाऽविद्यावान्नोत्तरोत्तराऽविद्याकल्पकश्चेतन एव। एवं मुख्यः सद्रूपः स एव।

प्रकृतिस्तु स्वकार्याऽपेक्षयैव सद्रूपा न स्वरूपतः शुक्तिरजतादिवदृश्यत्वात् जडत्वाच्च। तस्माद् यदुक्तमतीतानागतं स्वरूपतोऽस्ति तदपि युक्तम्।

सदेव सोम्येदमग्र आसीत्।

इत्यादिश्रुतेः। उत्पत्तेः पूर्वपरतश्च ब्रह्मात्मनाऽस्ति, न तद्व्यतिरेकेण। कथं तर्हि नित्यरूपाणामुत्पत्तिर्लयो वा? तत्राह—**अध्वभेदा**दिति। फेनबुद्बुदादिवद्विवर्ता-ऽवस्थाभेदाऽभिप्रायकत्वात्। तस्मान्न वासनोच्छेदानुपपत्तिरिति संक्षेपः॥ १२॥

नन्वतीतानागतं स्वरूपतोऽस्तीत्युक्तं, तत्र किं तस्य परिणामिस्वरूपम्? तत्राह—

ते व्यक्तसूक्ष्मा गुणात्मानः॥ १३॥

त इति। ते महदादिघटाद्यन्ताः व्यक्ताः वर्तमानावस्थाः, सूक्ष्मा अतीता-नागतावस्थाः, गुणात्मानः सत्त्वरजस्तमोरूपा गुणाः आत्मपरिणामिस्वरूपं येषां ते तथाभूता गुणा परिणामा इति यावत्। अत एव जडत्वमप्युपपद्यत इति भावः। अत एवोक्तं भाष्यकृता—

सर्वमिदं गुणानां सन्निवेशविशेषमात्रम्। परमार्थतो गुणात्मानः, तथा च शास्त्रानुशासनम्—गुणानां परमं रूपं न दृष्टिपथमृच्छति, यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्छकम्।

इति। परमं मूलकारणभावापन्नं मायेव। मृषा निर्विकारेण व्यामोहकेन्द्रजाला-दिवत् क्षणभङ्गुरम्। अतः सुतुच्छकमत्यल्पसारं स्थिरांशाभावादिति यथा श्रुतार्थः। वस्तुतस्तु परमं रूपम् अधिष्ठानम्—

अस्तिभातिप्रियात्मकं दृष्टिपथं प्राप्तम्।
नानारूपात्मकं स्वरूपं मायेव मिथ्या॥

इति प्रतिभासहेतुकं लौकिकमायावत्। सुतुच्छकं मिथ्यैवेत्यर्थः॥ १३॥

ननु प्रख्याक्रियास्थितिशीलाः सत्त्वरजस्तमोगुणाः सर्वत्र कार्येष्वन्वयितया परिणामिकारणं, तर्हि स्वशास्त्रे सांख्ये च कथं कारणस्यैकत्वसाधर्म्यनिर्देशस्तत्राह—

परिणामैकत्वाद् वस्तुतत्त्वम्॥ १४॥

परिणामेति। सत्त्वरजस्तमसां सत्त्वरजस्त्वादिना परस्परं भेदेऽपि प्रकृतित्वेनै-कत्वमित्यर्थः। यद्यपि त्रयो गुणास्तथापि तेषामङ्गाङ्गिभावलक्षणो यः परिणामः, क्वचित्सत्त्वमङ्गं, क्वचिद्रजः, क्वचित्तम इत्येवंरूपस्तस्यैकत्वाद् वस्तुनः कारणस्य तत्त्वमेकत्वमित्यर्थः।

अथवा परिणामस्य महदादिरूपकार्यस्यैकत्वाद्वस्तूनां गुणानां परमार्थतो नाना-त्वेऽप्येकत्वमित्यर्थः। यथा तन्तूनां वस्तुतो भेदेऽपि परिणामरूपेण पटैकत्वव्यवहार-

स्तथा गुणानां नानात्वेऽपि व्यावहारिकेणाऽनित्येन परिणामरूपेण महदादिनैकत्वव्यवहार इति यावत्। अत एव व्यावहारिकस्याऽग्न्याद्यवयविन एकस्यावयवविभागे सति नानात्वमेव पारमार्थिकमुक्तवती छान्दोग्यश्रुतिः—

यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य अथागादग्नेरग्नित्वं त्रीणि रूपाणीत्येव सत्यम्।

इति॥ १४॥

इदानीं मुक्तिहेतुज्ञानविषयं चित्तात्मनोर्विवेकं ज्ञाताऽज्ञातविषयत्वसदाज्ञातविषयत्वाभ्यां वक्ष्यमाणसूत्रैः समर्थयिष्यन् तदुपपादकं चित्तार्थयोर्विवेकं दर्शयति। चित्तार्थयोर्भेदनिश्चयं विना ज्ञाताऽज्ञातविषयत्वस्याऽसिद्धेः। तत्सिद्धिं विना च चित्तात्मनोर्विवेकसिद्धिः कुतः? तत्र रज्जुसर्पतत्प्रत्ययोरिव महदादिघटाद्यन्तपदार्थतत्प्रत्यययोरपि सहोपलम्भादभेद एव युक्तः। अतो न विज्ञानव्यतिरेकेणाऽर्थोऽस्ति। किन्तु सत्वेन प्रतिक्षणविनाशिविज्ञानमेव स्वाऽध्यस्तवासनावैचित्र्यबलात् कार्यकारणभावेनाऽवस्थिततया भातीति क्षणिकविज्ञानवादी बौद्धस्तं प्रत्याह—

वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः॥ १५॥

वस्त्विति। तयोर्विज्ञानार्थयोः विभक्तः पन्थाः भिन्नो मार्गः। विज्ञानार्थयोर्भेद इति यावत्। कुतः? वस्तुसाम्ये चित्तभेदात्। वस्तुनः स्त्रीपिण्डादेः साम्ये एकत्वे चित्तानां प्रमातॄणां सुखदुःखमोहरूपतया स्फुटभेदादित्यर्थः।

अयं भावः—एकस्यां रूपलावण्यवत्यां योषिति पत्युः सुखं, सपत्नयास्तु द्वेषः, कामुकस्य मोहः, परमहंसस्य जुगुप्सेत्येकस्मिन् वस्तुनि नानाविधत्वचित्तोदयो दृश्यते। वस्तु च तदेवाऽस्ति। अतः स्वरूपभेदोन्नयनवर्त्मकत्वाऽनेकत्वरूपविरुद्धधर्माऽध्यासाद्भेद एव। चित्तं च तेषां क्षणिकविज्ञानमेव। अतश्चित्तभेदेनैव विज्ञानार्थयोरपि भेदः सिध्यति। उपलक्षणमेतन्नीलपीतावित्यादिसमूहालम्बने विज्ञानैक्येऽपि नीलपीतादेरर्थस्य भेदात्तयोर्विभक्तः पन्थाः।

न च तत्र नीलपीतत्वाद्याकारभेदादसाङ्कर्यमिति वाच्यम्। आकारस्याऽतिरिक्तत्वे सर्वविज्ञानात्मत्वहानिः। अनतिरेकत्वे तद्दोषतादवस्थ्यम्।

न च घटे नीलादिवज्ज्ञानगते एव ज्ञानाऽभिन्न इति वाच्यम्। नीलत्वपीतत्वयोर्विरोधेनैकस्मिन् धर्मिणि समावेशाऽयोगादित्यन्यत्र विस्तरः॥ १५॥

नन्वस्तु विज्ञानाद्भिन्नोऽर्थः, तथापि विज्ञानसमकालीन एव सोऽस्तु, अन्यथा प्रमाणाभावात्। अनुमानं चात्र—ज्ञानसहभूरेवायमर्थः, भोग्यत्वात्, सुखादिवदिति। तथा च सर्वं दृश्यं प्रातिभासिकमेव नाऽज्ञातसत्ताकम्।

न चैवं मोक्षाऽभावप्रसङ्गः, तदानीं प्रमातुश्चित्तस्याभावादिति वाच्यम्। निरुपप्लवस्वप्रकाशपरमानन्दबोधरूपस्याऽऽत्मन एव ज्ञानेन विस्मृतग्रैवेयकादेरिवाऽप्राप्तत्वभ्रमनिवृत्त्या मोक्षत्वाऽङ्गीकारेण तदानीं प्रमातुश्चित्तस्याऽनपेक्षणादिति दृष्टिसृष्टिवादिनो वेदान्तिनः सौगतैकदेशिनः सौत्रान्तिका वैभाषिकाश्च प्रष्टव्याः—

किं साक्षिनियतं दृश्यं उत वृत्तिनियतम्? तत्राऽऽद्ये दृष्टेर्नित्यत्वेन दृश्यस्यापि तन्नियतत्वेन नित्यत्वापत्तिः। द्वितीयेऽपि किमनेकविज्ञाननियतं, उतैकनियतम्? नाद्यः, प्रातिभासिकस्य स्वप्नवदेकविज्ञाननियतत्वात्। अतः परिशेषादेकविज्ञाननियतमेव तद्वाच्यम्। तदपि न युक्तमित्याह—

न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात्॥ १६॥

न चेति। वृत्त्याख्यज्ञानेन सह चित्तस्याऽभेदाद्विज्ञानमेवात्र चित्तं तत्तन्त्रं तन्नियतम्। तथा च नापि वस्तु एकविज्ञाननियतमिति प्रतिज्ञा। तत्र हेतुः—**तदप्रमाणकमि**ति। तदा तर्हि तदप्रमाणकम्। तच्चित्तनियतं किं स्यात्? चित्तापाये कुत्र विलीयेत, न कुत्रापीत्यर्थः। तस्माद्वस्तु स्थिरमज्ञातसत्ताकमिति शेषः।

अयं भावः—यदि पदार्थानां विज्ञानकारणेषु लय इत्युच्यते, तर्हि विज्ञानार्थयोरभेदाऽऽपत्त्या विज्ञानवादिनय एव प्रवेशः। तच्च दूषितं दूष्यं चावयोः। यदि तु स्वकारणेषु लय इत्युच्यते, तदा विनाशकारणाऽऽकाङ्क्षायामन्वयव्यतिरेकाभ्यां मुद्गरप्रहारादेव विनाशकारणत्वेन विज्ञाननाशसमकालं घटादिवस्तुनाशाऽनुपपत्तिरिति। अपि च यद्येकचित्तनियतं तदा सुखादिवदसाधारण्यापत्तिः, न चेष्टापत्तिः। अन्येन दृश्यमानत्वादिति संक्षेपः।

इदञ्च दृष्टिसृष्टिवादिनां वेदान्तिनामप्यविरुद्धम्। प्रतिकर्मव्यवस्थार्थं पदार्थानामज्ञातसत्तायास्तैरप्यङ्गीकारात्। वस्तुतस्तु स्ववासनयैवेदं दूषणम्। तन्मते स्वदृष्टान्तसलिलधारया सकलशङ्कामलप्रक्षालनादिति संक्षेपः॥ १६॥

चित्ततदर्थयोर्विवेकप्रकारः प्रदर्शितः। इदानीं ज्ञाताऽज्ञातविषयत्वसदाज्ञातविषयत्वाभ्यां चित्तात्मनोर्विवेकप्रकारं प्रतिपादयति—

तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम्॥ १७॥

तदुपरागेति। चित्तस्य कालभेदेन ज्ञातमज्ञातं च वस्तु भवति। कुतः? तदुपरागापेक्षित्वात्। इन्द्रियादिद्वाराऽर्थाकारतारूपो य उपरागस्तत्सापेक्षत्वात्। अर्थज्ञानमिति शेषः। अतो ज्ञाताऽज्ञातविषयतया चित्तं परिणाम्यपीति भावः।

अथवा सत्त्वप्रधानस्य चित्तस्य सर्वग्रहणसर्वव्यापनयोग्यत्वात् सदा सर्वं वस्तु

ज्ञायेतेत्यत आह—**तदुपरागे**ति। अर्थाकाराकारित्वरूपो य उपरागोऽर्थेनेन्द्रियस्य तत्सापेक्षत्वादित्यर्थः। यदा कर्मवशादयस्कान्तमणिकल्पा विषयाः अयस्कल्पं चित्तं स्वमाहात्म्यादाऽऽकृष्येन्द्रियादिद्वारा स्वस्मिन् संयोज्य स्वाकारैराकारयन्ति लाक्षारस इव वस्त्रं, तदा ते चित्तेनोपरक्ता विषयाश्चित्तस्य ज्ञाता भवन्ति। इतरे त्वज्ञाता इति यावत्॥ १७॥

नन्वेवं पुरुषोऽपि यस्मिन् काले नीलमनुभवति, तस्मिन् काले न प्रायः पीतादिकम्। अतस्तस्यापि चित्तवद् ज्ञाताऽज्ञातविषयत्वेन परिणामित्वाऽऽपत्तिरित्यत आह—

सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्याऽपरिणामित्वात्॥ १८॥

सदेति। पुरुषस्य हि विषयवृत्तिकं चित्तमेव साक्षाद्विषय इति, तत्प्रभोः विषयसाक्षिणः चित्तवृत्तयः चित्तपरिणामाः सुखादिरूपा भोगाः सदा स्वसत्ताकाले ज्ञाता भवन्ति। कुतः? पुरुषस्याऽपरिणामित्वात् साक्षिणोऽपरिणामित्वादित्यर्थः। परिणामित्वे हि परिणामस्य कादाचित्कत्वात्, पुरुषपरिणामस्यापि कादाचित्कत्त्वाऽऽपत्त्या विद्यमानाऽपि चित्तवृत्तिः कदाचिन्न ज्ञायेत। न चेष्टापत्तिः।

पुरुषो विषयी नित्यं सत्त्वं च विषयः स्मृतः।

इत्यनुगीता विरोधात्। तस्मात्सर्वाऽवभासनसमर्थे स्वप्रकाशचिद्रूपे कूटस्थनित्ये साक्षिणि यदा यदा सवृत्तिकं चैतन्यप्रतिबिम्बेन विज्ञानमच्चित्तं प्रतिबिम्बितं भवति, तदा तदा सर्वानेवाऽवभासयतीति। सदा ज्ञाता एव चित्तवृत्तयः पुरुषस्य भवन्ति। विषयाकारवृत्तीनां कादाचित्कत्वेऽप्यहमाद्याकारवृत्तेः सार्वदिकत्वात्, अहमादेर्निरावृतत्वादिति भावः॥ १८॥

ननु चित्तमेव क्षणिकं स्वप्रकाशं स्वस्वार्थयोर्भासकमस्तु किमन्तर्गडुना साक्षिणेत्याह—

न तत्स्वाभासं दृश्यत्वात्॥ १९॥

न तदिति। तच्चित्तं न स्वाभासं न स्वप्रकाशं, स्वस्वार्थगोचरवृत्त्यभावकाले आत्मवन्न स्वस्वार्थयोर्भासकमिति यावत्। कुतः? दृश्यत्वात् दुःख्यहं, क्रुद्धोऽहं, शान्तं मे मन इति घटादिवद्भास्यत्वात्। अतो दृश्यस्य द्रष्टृत्वमनुपपन्नमिति। चित्तभानार्थं पुरुष आवश्यक इति भावः॥ १९॥

किञ्च—

एकसमये चोभयानवधारणम्॥ २०॥

एकेति। क्षणिकवादिमते एकसमये च उत्पत्तिक्षण एव उभयानवधारणं

चित्तचित्योः प्रत्यक्षं न सम्भवतीत्यर्थः। पूर्वं सत एव प्रत्यक्षगोचरत्वात् स्वस्य च प्रागसत्वादिति भावः॥ २०॥

ननु मास्तु स्वप्रकाशं चित्तं स्वसन्तानेनोत्तरोत्तरेण चित्तान्तरेण तु गृह्यताम्। तथा च न कर्तृकर्मविरोधोऽपि। तत्राह—

चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च॥ २१॥

चित्तान्तरेति। वृत्तिरूपचित्तान्तरेण वृत्तिरूपचित्ते दृश्येऽभ्युपगम्यमाने तु बुद्धिबुद्धेर्वृत्तिवृत्तेरतिप्रसङ्गोऽनवस्थापातः।

न च द्वित्रा एव ग्राह्या इति नाऽनवस्थेति वाच्यम्। ग्राहकचित्ताऽनिश्चये ग्राह्यचित्ताऽनिश्चयात्। एतेनाऽऽत्मनित्यत्वजडत्वाऽभ्युपगमिनामपि तार्किकवैशेषिकाणामुत्तरोत्तरपूर्वपूर्वज्ञानग्रहणकल्पना परास्ता। ज्ञानगोचराऽनन्तज्ञानकल्पनागौरवस्याऽपरिहार्यस्य समानत्वात्।

एवमन्योऽपि दोषस्तेषां मत इत्याह—**स्मृतिसङ्करश्चे**ति। वृत्तिवृत्तेरिति शेषः। विषयानुभवकाले ज्ञानधारा जातेति विषयस्मृतिकालेऽप्यनन्तानां तज्ज्ञानानां स्मृतिरेकदैव भविष्यति। 'नीलं मया पुरा ज्ञातं' नीलज्ञानं तज्ज्ञानञ्चेत्येवमनन्ताकारः सोऽयं स्मृतीनां सङ्करोऽयुगपदुत्पत्तिरूपः प्राप्तः। तथा च—स्मृत्यानन्त्यात्कस्मिन्नर्थे स्मृतिरियमुत्पन्नेति ज्ञातुमशक्यत्वात्। नीलस्मृतिरियं न चित्तस्मृतिरिति विभागो न स्यादित्यर्थः। तस्माल्लाघवेन सकलवृत्तिगोचरैकविभुस्वप्रकाशज्ञानपक्ष एवाऽस्मदभिमतः साधीयानिति भावः॥ २१॥

ननु कूटस्थस्य साक्षिणश्चित्तेन सह विषयेन्द्रिययोरेव क्रियापूर्वकसम्बन्धाभावात्कथं तत्तेन संवेद्यमित्यत आह—

चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्॥ २२॥

चितेरिति। अपरिणामित्वेनाऽप्रतिसञ्चाराया अपि चितेः स्वीयबुद्धिदर्शनं बुद्ध्याकारताऽऽपत्त्यैव भवतीत्यर्थः।

अयं भावः—ज्ञातुः सञ्चारो न साक्षादेव ज्ञाने हेतुः, किं त्वर्थाकारता हेतुः सन्निकर्षद्वारा, अन्यथा स्वप्नादौ मनःसञ्चाराऽभावेनार्थभानाऽयोगात्। अतो विभुत्वेनैव सर्वत्र सन्निकृष्टस्याऽऽत्मनः सञ्चारो नापेक्षित इति। आपत्तिग्रहणं च विषयांशे मनस इव पारमार्थिकाकारो न, किं तु परस्परं दर्पणयोरिव प्रतिबिम्बवत्त्वम्, तस्मिन् सति स्वभोग्यतोपरक्तबुद्धिसाक्षितारूपं संवेदनमिति संक्षेपः॥ २२॥

ननु भवतु चितेः स्वीयबुद्धितद्वृत्तिसंवेदनं, शब्दादिसंवेदनं तु कथं भवेत्?

बुद्धिवच्छब्दादीनामपि चितौ प्रतिबिम्बनसामर्थ्याऽङ्गीकारे तु सर्वदैव सर्वार्थभान-प्रसङ्गात्। कथं वा चितेः स्वसंवेदनम्? उक्ता ह्यनवस्थायाश्चित्तवत् पुरुषेऽपि समानत्वात्। स्वविषयत्वरूपस्वप्रकाशत्वेन निर्वाहस्तु, चित्तात्मत्वपक्षेऽपि कर्तुं शक्य इत्याशंक्याह—

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्॥ २३॥

द्रष्टृदृश्येति। सर्वे ग्रहीतृग्रहणग्राह्याः पुरुषस्यार्थाः भोग्या अस्मिन्निति सर्वार्थम्। 'अयं घट' इत्यनन्तरं 'घटमहं जानामी' ति वृत्त्यन्तरस्य ग्रहीतृग्रहणग्राह्याकारस्य 'अयं घट' इति वृत्तिवदेव साक्षिभास्यस्य प्रायशो दर्शनात्। सर्वार्थत्वे हेतुः **द्रष्टृदृश्योपरक्तमि**ति द्रष्टृदृश्योभयाकारमित्यर्थः। बाधकं विना सन्निकृष्टवस्त्वाकारतास्वाभाव्यस्य चितेः सर्वसम्मतत्वादिति भावः।

तथा च बुद्धिसंवेदनमेव बुद्धिस्थस्य शब्दादेः स्वस्य च संवेदनं यद्धि शब्दादि-पुरुषोभयाकारा बुद्धिवृत्तिः पुरुषे प्रतिबिम्बिता भासते, इदमेव शब्दादेः पुरुषस्य च दृश्यत्वं बुद्धेर्दृश्यत्ववदिति। अतो न पुरुषदर्शनार्थं द्रष्ट्रन्तरापेक्षा। नापि कर्मकर्तृत्व-विरोधोऽन्तःकरणद्वारत्वादिति भावः।

वस्तुतस्तु द्रष्टृदृश्ययोर्द्वयोरुपरक्तमुपरागघटकं चित्तं सर्वार्थं सर्वभानप्रयोजकं, तथा नात्मा। यद्यपि न संविदन्तरविधयोऽनवस्थापत्तेः, नापि स्वविषये कर्तृकर्मविरोधः, तथापि यथा परेषामालोके आलोकान्तरसंयोगाऽभावेऽपि प्रतियोगिताऽनुयोगिताऽन्य-तरसम्बन्धेनाऽऽलोकसंयोगवत्वादेवाऽऽलोकघटादेः प्रत्यक्षम्। तथा प्रतियोगिताऽनु-योगिताऽन्यतरसम्बन्धेन विषयाकारवृत्त्यारूढसाक्षिविषयतासम्बन्धवत्वात्साक्षिदृश्य-योर्द्वयोरपि व्यवहारोपपत्तिरिति, न द्रष्ट्रन्तरापेक्षा। द्रष्टा च वृत्त्यारूढ एव विषयं विषयी-करोतीति विषयतासम्बन्धनिर्वाहकतया भवति। चित्तं सर्वार्थमिति संक्षेपः।

अथवा ननु यदि चित्ताऽतिरिक्तात्मा कथं तर्हि 'अहं करोमी' ति चित्तस्याऽऽ-त्मत्वभ्रमो लोकानां तार्किकादीनां चेत्याशङ्क्य क्वचिदुपरागेणैव चित्तस्य सर्वार्थसामर्थ्यबीजमाह—**द्रष्टृदृश्ये**ति। 'ममेदं कर्त्तव्यमि'ति मदंशविषयांशव्यापारा-ऽऽवेशविशिष्टं सर्वार्थं भोगापवर्गार्थं भवति। अतो मदंशाऽभेदाऽऽरोपादात्मेति भ्रम इति भावः॥ २३॥

ननु चित्तमेव यदि सर्वार्थं सर्वात्मकञ्च तदाऽसंख्येयवासनावशात् स्वत एव चित्तस्य परिणामोऽस्तु, किं पुरुषेण? वासनावशाद्बद्धस्य तस्यैव भोगाऽपवर्गयोः सम्भवादित्यत आह—

तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्॥ २४॥

तदसंख्येयेति। तच्चित्तं, असंख्येयवासनाभिः संख्यातुमशक्याभिः क्लेशादिवासनाभिः चित्रमपि नानारूपमपि कर्तृत्वेन भोक्तृकल्पमपीति यावत्। परार्थं परस्य स्वामिनश्चेतनस्याऽर्थो भोगापवर्गौ प्रयोजनं यस्य तथाविधं परभोगसाधनत्वेन भोग्यमेव न भोक्तेति यावत्। कुतः ? संहत्यकारित्वात्। देहेन्द्रियादिसाहाय्येनैव भोगादिकार्यकारित्वात्। यदितरसहायेन एवाऽर्थक्रियाकारि, तत्परार्थं, गृहशय्यादिवदिति भावः ॥ २४॥

तदेवं बुद्धिपुरुषविषयाणां विवेकं प्रदर्श्य तज्ज्ञानात् प्राप्यं कैवल्यं निर्णेतुं दशभिः सूत्रैरुपक्रमते—

विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः ॥ २५ ॥

विशेषदर्शिन इति। मातृमानमेयात्मकस्याऽखिलप्रपञ्चस्य तप्तायः—पिण्डवदेकीभावापन्नस्य यथोक्तप्रकारैरन्योन्यं विशेषदर्शिनः 'अयमस्मादन्य' इति विवेकसाक्षात्कारवतश्चित्तस्य आत्मभावभावनाविनिवृत्तिः 'चेतनोऽहं करोमी' त्यनादिकालप्रवृत्तचित्तात्मत्वसंस्कारविनिवृतिर्भवतीत्यर्थः।

अथवा आत्मभावना आत्मरूपे भावना जिज्ञासा 'कोऽहमासं, कुत आगतः, क्व गमिष्यामि, किं भविष्यती' त्येवंरूपा तस्या, सशोकप्रवृत्तिनिवृत्त्याद्यनर्थहेतोर्विनिवृतिस्तदपगमरूपा जीवन्मुक्तिर्भवतीति यावत्॥ २५ ॥

तदनन्तरं पुनः किं भवतीत्याशङ्कायामाह—

तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम्॥ २६ ॥

तदेति। तदा विशेषदर्शनाऽवस्थायां परवैराग्यवशाद् विवेकनिम्नं सत्त्वपुरुषान्यताख्यातिमात्रेण प्रवहणशीलम्। अत एव विषयोन्मुखतापरित्यागेन कैवल्यप्राग्भारं कैवल्ये प्राग्भारो यस्येति कैवल्याभिमुखं चित्तं भवतीत्यर्थः ॥ २६ ॥

अयञ्च विवेको यद्यपि शास्त्रादपि ज्ञायते तथापि परोक्षतयाऽनादिकालप्रवृत्तवासनानिवृत्तौ न समर्थः। किं तु भावनाविशेषजन्य एवेति समर्थयिष्यन् नाऽनेन शास्त्रीयविज्ञानेनैव कृतकृत्यता भवति। पूर्वपूर्ववासनावशान्मोहादिवृत्तीनामनुवृत्तेरित्याह—

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥ २७ ॥

तच्छिद्रेति। तच्छिद्रेषु विशेषदर्शनछिद्रेषु अन्तरालेषु व्यवहाराद्यवस्थासु व्युत्थानरूपासु प्रत्ययान्तराणि 'मनुष्योऽहं, ब्राह्मणोऽहमि' त्यादिविपरीतज्ञानानि जायन्ते। कुतः ? पूर्वसंस्कारेभ्यः। प्राक्तनतादृशाऽनुभवजन्येभ्यो विपरीतसंस्कारेभ्यो भवन्तीत्यर्थः ॥ २७॥

ननु ज्ञाने जातेऽपि चेतनविपरीतभावनाऽनिवृत्तिस्तर्हि कथं निवृत्तिः स्यात्? आत्मज्ञानस्यैव हृदयग्रन्थिभेदकत्वश्रवणात्। तत्राह—

हानमेषां क्लेशवदुक्तम्॥ २८॥

हानमिति। एषां संस्काराणां हानं दाहः क्लेशवदुक्तं क्लेशानामिव कथितं पूर्वाचार्यैरित्यर्थः। **ध्यानहेयास्तद्वृत्तयः, ते प्रतिप्रसवहेयाः सूक्ष्माः**, इति सूत्राभ्यां यथा स्थूलसूक्ष्मक्लेशानां समाधितत्त्वज्ञानचित्तलयाभ्यां दाहनाशौ प्रोक्तौ, तथा तत्संस्काराणामपीति फलितार्थः॥ २८॥

इदानीं तादृशभावनाविशेषरूपः समाधिर्येनोपायेन भवति, तत्राह—

प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः॥ २९॥

प्रसंख्यान इति। प्रसंख्यानं साधर्म्यवैधर्म्याभ्यां तत्त्वानां सम्यक् साक्षात्कारः। तत्राऽप्यकुसीदस्य फलमलिप्सोरन्तरायाऽभावेन सर्वथा निरन्तरं विवेकख्यातेः सत्त्वपुरुषान्यताख्यात्युदयात् परवैराग्येण धर्ममेघः समाधिः प्रकृष्टमशुक्लाऽकृष्णं धर्मं पुरुषार्थसाधकं मेहति सिञ्चतीति व्युत्पत्तेः ज्ञानहेतुभूतधर्मसाधनो धर्ममेघनामाऽसम्प्रज्ञातयोगो भवतीत्यर्थः। अनेन विवेकज्ञानहेतुकं परवैराग्यमेव तादृशसमाधेः साधनम्। फलन्तु निःशेषेण क्लेशादीनामुन्मूलको धर्मविशेष इति समर्थितम्॥ २९॥

समाधेर्मुख्यफलमाह—

ततः क्लेशकर्मनिवृत्तिः॥ ३०॥

तत इति। ततोऽसम्प्रज्ञातसमाधितः क्लेशकर्मनिवृत्तिः क्लेशानामविद्याद्यभिनिवेशान्तानां कर्मणां च पुण्यपापहेतुनां चोक्तत्रिविधानामऽत्यन्ताऽतीतताऽवस्था भवतीत्यर्थः॥ ३०॥

ननु यदि समाधिबलादेव क्लेशादिनिवृत्तिस्तर्हि किं ततो जातस्य ज्ञानस्य फलम्? तत्राह—

तदा सर्वावरणमलापेतस्य ज्ञानस्याऽऽनन्त्यात् ज्ञेयमल्पम्॥ ३१॥

तदेति। तदा समाधिजजीवन्मुक्त्यवस्थाकाले 'आव्रियते चित्तमेभिरि'त्यावरणानि सर्वेषां देहक्लेशसुखदुःखादिलक्षणानि तान्येव बन्धकत्वात् मलानि कार्मसंज्ञाभिः प्रतिपादितानि। एतैरपेतस्य रहितस्य ज्ञानस्य समाधिपराकाष्ठा तस्य विवेक-

साक्षात्कारस्य निर्मलगगननिभस्याऽऽनन्त्यादभिभावकतमोनिवृत्त्या विमुक्तत्वाज्ज्ञेयं प्रकाश्यमल्पं गणनास्पदं न भवति। अक्लेशेनैव सर्वं ज्ञेयं जानातीत्यर्थः।

अथवा आनन्त्यात्साकारताकृतपरिच्छेदराहित्याज्ज्ञेयं दृश्यमल्पं संविन्मात्रमेव तत्र प्रकाशमानं भवति नान्यदित्यर्थः। आह चैवं श्रुतिरपि—

यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यादिका।

तस्मात्तदा ग्रहणसमर्थमपि चैतन्यं तदा दृश्यं तदुपरमादेव॥

न गृह्णातीति संक्षेपः॥ ३१॥

ततः किमित्यत आह—

ततः कृतार्थानां परिणामक्रमपरिसमाप्तिर्गुणानाम्॥ ३२॥

तत इति। ततो ज्ञानाऽऽनन्त्येन ज्ञेयाल्पत्वात् कृतो निष्पादितो भोगापवर्गलक्षणः पुरुषार्थो यैस्ते कृतार्था गुणाः सत्त्वरजस्तमांसि तेषां परिणामः कार्यरूपाऽन्यथाभावरूपः कथितः, तस्य क्रमोऽनुपदमेव वक्ष्यमाणस्तस्य परिसमाप्तिर्निष्ठा पुनः सम्भवो नेत्यर्थः॥ ३२॥

तत्र क्रमं सोपपत्तिकमाह—

क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः॥ ३३॥

क्षणेति। क्रम इति लक्ष्यनिर्देशः। क्षणप्रतियोगीति लक्षणनिर्देशः। परिणामापरान्तनिर्ग्राह्य इति प्रमाणनिर्देशः। तत्र क्षणप्रतियोगी क्षणस्याऽवसरस्य विरोधिक्षणेनाऽप्यनन्तरित इति यावत्। एवंभूतः पूर्वापरीभावः क्रम इति निष्कर्षः। परिणामापरान्तनिर्ग्राह्य इति परिणामस्याऽपरान्तेन चरमावस्थया निर्ग्राह्योऽनुमेय इत्यर्थः।

वस्त्रादिषु दृश्यमाना पुराणताऽनवच्छिन्नपरिणामधारापूर्विका। अत्राऽप्यवान्तरभेदस्योपलभ्यमानत्वात्। न हि क्षणाऽव्यवहितपरिणामधारारूपक्रमं विना पुराणतायाः सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलादिरूपाऽवान्तरभेदः सम्भवति। तस्मात्परिणामक्षणेष्वविरलः क्रमोऽस्त्येवेत्यनुमेय इति यावत्। अधिकं व्यक्तमाकरे॥ ३३॥

इदानीं कैवल्यस्वरूपमाह—

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति॥ ३४॥

पुरुषार्थेति। कृतकृत्यतया कृतकर्त्तव्यतया पुरुषार्थशून्यानां गुणानां पुरुषोपकरणानां लिङ्गशरीरात्मकानां यः प्रतिप्रसवः स्वकारणेऽत्यन्तविलयः स बुद्धेः

कैवल्यम्। एतदेव च प्रधानस्यापि ज्ञानिपुरुषं प्रति कैवल्यमुच्यते। तेन पुरुषेण सह पुनरसंयोगाद् या तु धर्मधर्म्यऽभेदाच्चितिशक्तिः स्वस्वरूपिणी स्वरूपप्रतिष्ठा बुद्धि-सत्त्वोपाधिरूपशून्यरूपा। जपापाये स्फटिकस्य स्वरूपप्रतिष्ठावत् सा पुरुषस्य कैवल्य-मित्यर्थः।

यद्यपि प्रकृतिपुरुषयोर्द्वयोर्युगलीभावे भोगाख्यः पुमर्थ एकाकितायां तु निवृत्त्या केवलतारूपः पुमर्थो भवति। सा च केवलता परस्परवियोगे निर्विकारतारूपा द्वयोरेव भवति। अतो द्वे एव कैवल्ये लक्षिते तयोश्च द्वयोः सक्रियप्रकृतिकृतत्वमेवेति। वस्तुत पुरुष औपचारिकमात्रम्। सर्वमुक्तं च सांख्यकारिकायामपि—

तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति पुरुषः।
संसरति बध्यते मुच्यते च नानाऽऽश्रया प्रकृतिः॥

इति। मूलमत्रापि—

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्तिरित्येषा परमार्थता॥

इति श्रुतिः।

तथापि स्वरूपप्रतिष्ठारूपकैवल्यं पुरुषस्यैव स्वाभाविकं स्वप्रकाशचिद्रूपत्वात्। अत एव मोक्षार्थं करणानां प्रवृत्तिरपि सङ्गच्छते। पुरुषार्थमेव तेषां प्रवृत्तेरुपपादनात्। तस्माच्छ्रुतिसूत्रयोर्भोगतन्निवृत्त्याख्यौ पुरुषार्थावेव। वस्तुतः पुरुषे औपचारिकाविति ज्ञापितम्। न तु स्वरूपप्रतिष्ठारूपकैवल्यमपि तत्र नास्तीत्युक्तमित्यभिप्रायेणैव सूत्रे स्वरूपप्रतिष्ठा वेत्युक्तमिति संक्षेपः।

अविरुद्धमेतद्वेदान्तिनामपि स्वप्रकाशपरमानन्दरूपतयाऽऽत्मन एव पुमर्थरूप-तायास्तैरङ्गीकारात्। यद्यपि स्वमते सुखरूपता नास्ति, तथापि दुःखभोगाऽत्यन्ताऽभाव-रूपतया पुमर्थत्वे न कोऽपि विवादः। तैरपि दुःखनिदाननिवृत्तिरूपतयाऽविद्यानाशस्यैव वस्तुत आत्मरूपस्य शास्त्रफलत्वप्रतिपादनादिति संक्षेपः। इति शब्दोऽयं योगसूत्रशास्त्र-समाप्तिद्योतकः॥ ३४॥

इति श्रीपरमहंसपरिव्राजकाचार्यरामगोविन्दतीर्थभगवत्पूज्यपाद-
शिष्यश्रीनारायणतीर्थस्वामिविरचितायां पातञ्जल-
सूत्रवृत्तौ कैवल्यपादः समाप्तः॥ ४॥

प्रथमं परिशिष्टम्

योगसूत्रम्

समाधिपादः प्रथमः

अथ योगानुशासनम्॥ १॥

योगश्चित्तवृत्तिनिरोधः॥ २॥

तदा द्रष्टुः स्वरूपेऽवस्थानम्॥ ३॥

वृत्तिसारूप्यमितरत्र॥ ४॥

वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः॥ ५॥

प्रमाणविपर्ययविकल्पनिद्रास्मृतयः॥ ६॥

प्रत्यक्षानुमानागमाः प्रमाणानि॥ ७॥

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्॥ ८॥

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः॥ ९॥

अभावप्रत्ययालम्बना वृत्तिर्निद्रा॥ १०॥

अनुभूतविषयासम्प्रमोषः स्मृतिः॥ ११॥

अभ्यासवैराग्याभ्यां तन्निरोधः॥ १२॥

तत्र स्थितौ यत्नोऽभ्यासः॥ १३॥

स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः॥ १४॥

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञावैराग्यम्॥ १५॥

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्॥ १६॥

वितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञातः॥ १७॥

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः॥ १८॥

भवप्रत्ययो विदेहप्रकृतिलयानाम्॥ १९॥

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्॥ २०॥

तीव्रसंवेगानामासन्नः॥ २१॥

मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः॥ २२॥

ईश्वरप्रणिधानाद्वा॥ २३॥

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः॥ २४॥

तत्र निरतिशयं सर्वज्ञबीजम्॥ २५॥

स पूर्वेषामपि गुरुः कालेनानवच्छेदात्॥ २६॥
तस्य वाचकः प्रणवः॥ २७॥
तज्जपस्तदर्थभावनम्॥ २८॥
ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च॥ २९॥
व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थित्वानि चित्तविक्षेपास्तेऽन्तरायाः॥ ३०॥
दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः॥ ३१॥
तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः॥ ३२॥
मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्॥ ३३॥
प्रच्छर्दनविधारणाभ्यां वा प्राणस्य॥ ३४॥
विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी॥ ३५॥
विशोका वा ज्योतिष्मती॥ ३६॥
वीतरागविषयं वा चित्तम्॥ ३७॥
स्वप्ननिद्राज्ञानालम्बनं वा॥ ३८॥
यथाऽभिमतध्यानाद्वा॥ ३९॥
परमाणुपरममहत्त्वान्तोऽस्य वशीकारः॥ ४०॥
क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः॥ ४१॥
तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः॥ ४२॥
स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का॥ ४३॥
एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता॥ ४४॥
सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम्॥ ४५॥
ता एव सबीजः समाधिः॥ ४६॥
निर्विचारवैशारद्येऽध्यात्मप्रसादः॥ ४७॥
ऋतम्भरा तत्र प्रज्ञा॥ ४८॥
श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्॥ ४९॥
तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी॥ ५०॥
तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः॥ ५१॥

साधनपादो द्वितीयः

तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः॥ १॥

समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥ २ ॥
अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः ॥ ३ ॥
अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥ ४ ॥
अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥ ५ ॥
दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ॥ ६ ॥
सुखानुशयी रागः ॥ ७ ॥
दुःखानुशयी द्वेषः ॥ ८ ॥
स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः ॥ ९ ॥
ते प्रतिप्रसवहेयाः सूक्ष्माः ॥ १० ॥
ध्यानहेयास्तद्वृत्तयः ॥ ११ ॥
क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥ १२ ॥
सति मूले तद्विपाको जात्यायुर्भोगाः ॥ १३ ॥
ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥ १४ ॥
परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥ १५ ॥
हेयं दुःखमनागतम् ॥ १६ ॥
द्रष्टृदृश्ययोः संयोगो हेयहेतुः ॥ १७ ॥
प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥ १८ ॥
विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ॥ १९ ॥
द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥ २० ॥
तदर्थ एव दृश्यस्यात्मा ॥ २१ ॥
कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥ २२ ॥
स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥ २३ ॥
तस्य हेतुरविद्या ॥ २४ ॥
तदभावात्संयोगाभावो हानं तद् दृशेः कैवल्यम् ॥ २५ ॥
विवेकख्यातिरविप्लवा हानोपायः ॥ २६ ॥
तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥ २७ ॥
योगाङ्गानामनुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ॥ २८ ॥
यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥ २९ ॥
अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥ ३० ॥
एते जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥ ३१ ॥
शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ ३२ ॥

वितर्कबाधने प्रतिपक्षभावनम्॥ ३३॥

वितर्का हिंसाऽऽदयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्॥ ३४॥

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः॥ ३५॥

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्॥ ३६॥

अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्॥ ३७॥

ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः॥ ३८॥

अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः॥ ३९॥

शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः॥ ४०॥

सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च॥ ४१॥

सन्तोषादनुत्तमसुखलाभः॥ ४२॥

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः॥ ४३॥

स्वाध्यायादिष्टदेवतासम्प्रयोगः॥ ४४॥

समाधिसिद्धिरीश्वरप्रणिधानात्॥ ४५॥

तत्र स्थिरसुखमासनम्॥ ४६॥

प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्॥ ४७॥

ततो द्वन्द्वानभिघातः॥ ४८॥

तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः॥ ४९॥

स तु बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः॥ ५०॥

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः॥ ५१॥

ततः क्षीयते प्रकाशावरणम्॥ ५२॥

धारणासु च योग्यता मनसः॥ ५३॥

स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः॥ ५४॥

ततः परमा वश्यतेन्द्रियाणाम्॥ ५५॥

विभूतिपादः तृतीयः

देशबन्धश्चित्तस्य धारणा॥ १॥

तत्र प्रत्ययैकतानता ध्यानम्॥ २॥

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः॥ ३॥

त्रयमेकत्र संयमः॥ ४॥

तज्जयात् प्रज्ञाऽऽलोकः ॥ ५ ॥
तस्य भूमिषु विनियोगः ॥ ६ ॥
त्रयमन्तरङ्गं पूर्वेभ्यः ॥ ७ ॥
तदपि बहिरङ्गं निर्बीजस्य ॥ ८ ॥
व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥ ९ ॥
तस्य प्रशान्तवाहिता संस्कारात् ॥ १० ॥
सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥ ११ ॥
शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ १२ ॥
एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥ १३ ॥
शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥ १४ ॥
क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥ १५ ॥
परिणामत्रयसंयमादतीतानागतज्ञानम् ॥ १६ ॥
शब्दार्थप्रत्ययानामितरेतराध्यासात्सङ्करस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् ॥ १७ ॥
संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् ॥ १८ ॥
प्रत्ययस्य परचित्तज्ञानम् ॥ १९ ॥
न च तत्सालम्बनं तस्याविषयीभूतत्वात् ॥ २० ॥
कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासम्प्रयोगेऽन्तर्द्धानम् ॥ २१ ॥
सोपक्रमं निरुपक्रमञ्च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा ॥ २२ ॥
मैत्र्यादिषु बलानि ॥ २३ ॥
बलेषु हस्तिबलादीनि ॥ २४ ॥
प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ॥ २५ ॥
भुवनज्ञानं सूर्ये संयमात् ॥ २६ ॥
चन्द्रे ताराव्यूहज्ञानम् ॥ २७ ॥
ध्रुवे तद्गतिज्ञानन् ॥ २८ ॥
नाभिचक्रे कायव्यूहज्ञानम् ॥ २९ ॥
कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥ ३० ॥
कूर्मनाड्यां स्थैर्यम् ॥ ३१ ॥
मूर्धज्योतिषि सिद्धदर्शनम् ॥ ३२ ॥
प्रातिभाद्वा सर्वम् ॥ ३३ ॥
हृदये चित्तसंवित् ॥ ३४ ॥

सत्त्वपुंरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः
परार्थत्वात्स्वार्थसंयमात्पुरुषज्ञानम्॥ ३५॥
ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते॥ ३६॥
ते समाधावुपसर्गा व्युत्थाने सिद्धयः॥ ३७॥
बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः॥ ३८॥
उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च॥ ३९॥
समानजयाज्ज्वलमनम्॥ ४०॥
श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम्॥ ४१॥
कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम्॥ ४२॥
बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः॥ ४३॥
स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद् भूतजयः॥ ४४॥
ततोऽणिमादिप्रादुर्भावः कायसम्पत् तद्धर्मानभिघातश्च॥ ४५॥
रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत्॥ ४६॥
ग्रहणस्वरूपास्मिताऽन्वयार्थवत्त्वसंयमादिन्द्रियजयः॥ ४७॥
ततो मनोजवित्वं विकरणभावः प्रधानजयश्च॥ ४८॥
सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च॥ ४९॥
तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्॥ ५०॥
स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्॥ ५१॥
क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम्॥ ५२॥
जातिलक्षणदेशैरन्यताऽनवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः॥ ५३॥
तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम्॥ ५४॥
सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम्॥ ५५॥

कैवल्यपादः चतुर्थः

जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः॥ १॥
जात्यन्तरपरिणामः प्रकृत्यापूरात्॥ २॥
निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्॥ ३॥
निर्माणचित्तान्यस्मितामात्रात्॥ ४॥
प्रवृत्तिभेदे प्रयोजकञ्चित्तमेकमनेकेषाम्॥ ५॥
तत्र ध्यानजमनाशयम्॥ ६॥

कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्॥ ७॥
ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्॥ ८॥
जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात्॥ ९॥
तासामनादित्वं चाशिषो नित्यत्वात्॥ १०॥
हेतुफलाश्रायलम्बनैः सङ्गृहीतत्वादेषामभावे तदभावः॥ ११॥
अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम्॥ १२॥
ते व्यक्तसूक्ष्मा गुणात्मानः॥ १३॥
परिणामैकत्वाद्वस्तुतत्त्वम्॥ १४॥
वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः॥ १५॥
न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात्॥ १६॥
तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम्॥ १७॥
सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात्॥ १८॥
न तत्स्वाभासं दृश्यत्वात्॥ १९॥
एकसमये चोभयानवधारणम्॥ २०॥
चित्तान्तरदृश्यत्वे बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च॥ २१॥
चितेरप्रतिसङ्क्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्॥ २२॥
द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्॥ २३॥
तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्॥ २४॥
विशेषदर्शिन आत्मभावभावनानिवृत्तिः॥ २५॥
तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम्॥ २६॥
तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः॥ २७॥
हानमेषां क्लेशवदुक्तम्॥ २८॥
प्रसङ्ख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः॥ २९॥
ततः क्लेशकर्मनिवृत्तिः॥ ३०॥
तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पम्॥ ३१॥
ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्॥ ३२॥
क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः॥ ३३॥
पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति॥ ३४॥

योगसूत्रमिति समाप्तम्

द्वितीयं परिशिष्टम्

वर्णानुक्रमयोगसूत्रसूची

सूत्रम्	पाद-सूत्र-संख्या	पृष्ठ-संख्या
अ		
अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम्	४/१२	१२३
अथ योगानुशासनम्	१/१	३
अनित्याऽशुचिदुःखाऽनात्मसु नित्यशुचिसुखात्मख्यातिरविद्या	२/५	७२
अनुभूतविषयाऽसम्प्रमोषः स्मृतिः	१/११	१७
अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः	२/३९	१०५
अभावप्रत्ययालम्बना वृत्तिर्निद्रा	१/१०	१३
अभ्यासवैराग्याभ्यां तन्निरोधः	१/१२	१९
अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः	२/३	७१
अविद्याक्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्	२/४	७१
अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्	२/३७	१०४
अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः	२/३५	१०४
अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः	२/३०	९८
ई		
ईश्वरप्रणिधानाद्वा	१/२३	२६
उ		
उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च	३/३९	१६२
ऋ		
ऋतम्भरा तत्र प्रज्ञा	१/४८	६६
ए		
एकसमये चोभयानवधारणम्	४/२०	१९७
एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता	१/४४	६५
एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः	३/१३	१४०

सूत्रम्	पाद-सूत्र-संख्या	पृष्ठ-संख्या
क		
कण्ठकूपे क्षुत्पिपासानिवृत्तिः	३/३०	१५९
कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्	४/७	१७२
कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुः-प्रकाशाऽसम्प्रयोगेऽन्तर्द्धानम्	३/२१	१४५
कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम्	३/४२	१६३
कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः	२/४३	१०६
कूर्मनाड्यां स्थैर्यम्	३/३१	१५९
कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्	२/२२	८८
क्रमान्यत्वं परिणामान्यत्वे हेतुः	३/१५	१४२
क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः	१/२४	२८
क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः	२/१२	८०
क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम्	३/५२	१६७
क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः	४/३३	३०२
क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः	१/४१	६४
ग		
ग्रहणस्वरूपास्मिताऽन्वयार्थवत्त्वसंयमादिन्द्रियजयः	३/४७	१६५
च		
चन्द्रे ताराव्यूहज्ञानम्	३/२७	१५८
चितेरप्रतिसंक्रमायास्तदाकारताऽऽपत्तौ स्वबुद्धिसंवेदनम्	४/२२	१९८
चित्तान्तरदृश्यत्वे बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च	४/२१	१९८
ज		
जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः	४/१	१६९
जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेक-रूपत्वात्	४/९	१९१
जातिदेशकालसमयाऽनवच्छेदे तुल्ययोस्ततः प्रतिपत्तिः	३/५३	१६८

सूत्रम्	पाद-सूत्र-संख्या	पृष्ठ-संख्या
जात्यन्तरपरिणामः प्रकृत्यापूरात्	४/२	१७०
त		
तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः	४/ २७	२००
तज्जपस्तदर्थभावनम्	१/२८	४४
तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी	१/५०	६८
तज्जयात्प्रज्ञाऽऽलोकः	३/५	१३६
ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्म्मानभिघातश्च	३/४५	१६४
ततो द्वन्द्वानभिघातः	२/४८	११४
ततो मनोजवित्वं विकरणभावः प्रधानजयश्च	३/४८	१६८
ततः कृतार्थानां परिणामक्रमपरिसमाप्तिर्गुणानाम्	४/३२	२०२
ततः क्लेशकर्मनिवृत्तिः	४/३०	२०१
ततः क्षीयते प्रकाशावरणम्	२/५२	१२९
ततः परमा वश्यतेन्द्रियाणाम्	२/५५	१३१
ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः	३/२१	१४५
ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च	१/२९	४६
ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते	३/३६	१६१
तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्	१/१६	२२
तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः	१/३२	५१
तत्र प्रत्ययैकतानता ध्यानम्	३/२	१३४
तत्र ध्यानजमनाशयम्	४/६	१७२
तत्र निरतिशयं सर्वज्ञबीजम्	१/२५	३३
तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः	१/४२	६५
तत्र स्थितौ यत्नोऽभ्यासः	१/१३	२०
ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्	४/८	१९१
तदपि बहिरङ्गं निर्बीजस्य	३/८	१३८
तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम्	२/२५	९०
तदर्थ एव दृश्यस्याऽऽत्मा	२/२१	८८
तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्	४/२४	१९९
तदा द्रष्टुः स्वरूपेऽवस्थानम्	१/३	३

सूत्रम्	पाद-सूत्र-संख्या	पृष्ठ-संख्या
तदा कैवल्यनिम्नं कैवल्यप्राग्भारं चित्तम्	४/२६	२००
तदा सर्वावरणमलापेतस्य ज्ञानस्याऽऽनन्त्याज्ज्ञेयमल्पम्	४/३१	२०१
तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम्	४/१७	१९६
तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः	३/३	१३६
तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्	३/५०	१६६
तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः	२/१	७०
तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः	२/४९	११४
तस्य प्रशान्तवाहिता संस्कारात्	३/१०	१३९
तस्य भूमिषु विनियोगः	३/६	१३६
तस्य वाचकः प्रणवः	१/२७	४०
तस्य सप्तधा प्रान्तभूमिः प्रज्ञा	२/२७	९१
तस्य हेतुरविद्या	२/२४	८९
तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः	१/५१	६८
ता एव सबीजसमाधिः	१/४६	६६
तीव्रसंवेगानामासन्नः	१/२१	२५
तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम्	३/५४	१६८
तासामनादित्वं चाशिषो नित्यत्वात्	४/१०	१९२
ते प्रतिप्रसवहेयाः सूक्ष्माः	२/१०	७९
ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्	२/१४	८५
ते व्यक्तसूक्ष्मा गुणात्मानः	४/१३	१९४
ते समाधावुपसर्गा व्युत्थाने सिद्धयः	३/३७	१६१
त्रयमन्तरङ्गं पूर्वेभ्यः	३/७	१३७
त्रयमेकत्र संयमः	३/४	१३६
द		
दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः	१/३१	४८
दुःखानुशयी द्वेषः	२/८	७८
दृग्दर्शनशक्त्योरेकात्मतेवास्मिता	२/६	७७
दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्	१/१५	२१
देशबन्धश्चित्तस्य धारणा	३/१	१३३

सूत्रम्	पाद-सूत्र-संख्या	पृष्ठ-संख्या
द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः	२/२०	८७
द्रष्टृदृश्ययोः संयोगो हेयहेतुः	२/१७	८६
द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्	४/२३	१९९
ध		
धारणासु च योग्यता मनसः	२/५३	१२९
ध्यानहेयास्तद्वृत्तयः	२/११	८०
ध्रुवे तद्गतिज्ञानम्	३/२८	१५८
न		
न च तत्सालम्बनं तस्याऽविषयीभूतत्वात्	३/२०	१४५
न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात्	४/१६	१९६
न तत्स्वाभासं दृश्यत्वात्	४/१९	१९७
नाभिचक्रे कायव्यूहज्ञानम्	३/२९	१५९
निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्	४/३	१७०
निर्माणचित्तान्यस्मितामात्रात्	४/४	१७१
निर्विचारवैशारद्येऽध्यात्मप्रसादः	१/४७	६६
प		
परमाणुपरममहत्त्वान्तोऽस्य वशीकारः	१/४०	६३
परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः	२/१५	८६
परिणामत्रयसंयमादतीतानागतज्ञानम्	३/१६	१४३
परिणामैकत्वाद्वस्तुतत्त्वम्	४/१४	१९४
पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति	४/३४	२०२
प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्	२/१८	८६
प्रच्छर्दनविधारणाभ्यां वा प्राणस्य	१/३४	५३
प्रत्ययस्य परचित्तज्ञानम्	३/१९	१४४
प्रत्यक्षानुमानागमाः प्रमाणानि	१/७	१०
प्रमाणविपर्ययविकल्पनिद्रास्मृतयः	१/६	१०

सूत्रम्	पाद-सूत्र-संख्या	पृष्ठ-संख्या
प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्	२/४७	११४
प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम्	४/५	१७२
प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्	३/२५	१५०
प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः	४/२९	२०१
प्रातिभाद्वा सर्वम्	१/३३	५२
ब		
बन्धकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः	३/३८	१६२
बलेषु हस्तिबलादीनि	३/२४	१५०
बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः	३/४३	१६३
बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः	२/५१	११६
बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः	२/५०	११५
ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः	२/३८	१०५
भ		
भवप्रत्ययो विदेहप्रकृतिलयानाम्	१/१९	२४
भुवनज्ञानं सूर्ये संयमात्	३/२६	१५१
म		
मूर्द्धज्योतिषि सिद्धदर्शनम्	३/३२	१५९
मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः	१/२२	२५
मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्	१/३३	५२
मैत्र्यादिषु बलानि	३/२३	१५०
य		
यथाऽभिमतध्यानाद्वा	१/३९	५६
यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि	२/२९	९८
योगश्चित्तवृत्तिनिरोधः	१/२	३
योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः	२/२८	९२

सूत्रम्	पाद-सूत्र-संख्या	पृष्ठ-संख्या
र		
रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत्	३/४६	१६५
व		
वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः	४/१५	१९५
वितर्कबाधने प्रतिपक्षभावनम्	२/३३	१०२
वितर्कविचारानन्दास्मितारूपांनुगमात्सम्प्रज्ञातः	१/१७	२३
वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्	२/३४	१०३
विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्	१/८	१२
विरामप्रत्ययाऽभ्यासपूर्वः संस्कारशेषोऽन्यः	१/१८	२३
विवेकख्यातिरविप्लवा हानोपायः	२/२६	९०
विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः	४/२५	२००
विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि	२/१९	८७
विशोका वा ज्योतिष्मती	१/३६	५४
विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी	१/३५	५३
वीतरागविषयं वा चित्तम्	१/३७	५५
वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः	१/५	९
वृत्तिसारूप्यमितरत्र	१/४	९
व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थित्वानि चित्तविक्षेपास्तेऽन्तरायाः	१/३०	४८
व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः	३/९	१३८
श		
शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः	१/९	१२
शब्दार्थप्रत्ययानामितरेतराध्यासात्सङ्करस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम्	३/१७	१४३
शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी	३/१४	१४१
शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः	२/३२	१००

सूत्रम्	पाद-सूत्र-संख्या	पृष्ठ-संख्या
शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः	२/४०	१०५
श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्	१/२०	२४
श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्	१/४९	६७
श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम्	३/४१	१६३
स		
सति मूले तद्विपाको जात्यायुर्भोगाः	२/१३	८१
स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः	१/१४	२१
सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्	२/३६	१०४
सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति	३/५५	१६८
सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात् स्वार्थसंयमात्पुरुषज्ञानम्	३/३५	१६०
सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च	३/४९	१६६
सत्त्वशुद्धिसौमनस्येन्द्रियदर्शनयोग्यत्वानि च	२/४१	१०५
सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात्	४/१८	१९७
सन्तोषादनुत्तमसुखलाभः	२/४२	१०६
स पूर्वेषामपि गुरुः कालेनाऽनवच्छेदात्	१/२६	३४
समाधिभावनार्थः क्लेशतनूकरणार्थश्च	२/२	७१
समाधिसिद्धिरीश्वरप्रणिधानात्	२/४५	१०७
समानजयाज्ज्वलनम्	३/४०	१६२
सर्वार्थतैकाग्रतयोर्निरोधक्षणचित्तान्वयो निरोधपरिणामः	३/११	१३९
सुखानुशयी रागः	२/७	७८
सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम्	१/४५	६५
सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञान-मरिष्टेभ्यो वा	३/२२	१४५
संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम्	३/१२	१३९
स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का	१/४३	६५
स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्	३/५१	१६६

सूत्रम्	पाद-सूत्र-संख्या	पृष्ठ-संख्या
स्थिरसुखमासनम्	२/४६	१०७
स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद् भूतजयः	३/४४	१६४
स्वप्ननिद्राज्ञानालम्बनं वा	१/३८	५६
स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः	२/९	७८
स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः	२/५४	१३०
स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः	२/२३	८९
स्वाध्यायादिष्टदेवतासम्प्रयोगः	२/४४	१०७
हानमेषां क्लेशवदुक्तम्	४/२८	२०१
हृदये चित्तसंवित्	३/३४	१६०
हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः	४/११	१९२
हेयं दुःखमनागतम्	२/१६	८६

❋

तृतीयं परिशिष्टम्

योगसिद्धान्तचन्द्रिकायां निर्दिष्टानाम् उद्धरणानां अनुक्रमणी

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
अकामस्य क्रिया काचित् (२)	—	१८९
अकारं चाप्युकारञ्च (१)	मनुस्मृतिः २/ ७६	४०
अकारं ब्रह्माणम्	श्रुतिवाक्यम्	४१
अकारेण ममात्मानमन्विष्य	नृसिंहोपनिषत् ७/ १	४१, ४५
अग्नीषोमीयं पशुमालभेत	मीमांसान्यायप्रकाशः २१७/ २४	१७५, १८१, १८२
अङ्गुष्ठौ सन्निबध्नीयात् (४)	हठयोगप्रदीपिका १/ ४७-४८	१०८
अजं ध्रुवं सर्वतत्त्वैः (१)	श्वेताश्वतरोपनिषत् २/ १५	६
अजामेकां लोहितशुक्लकृष्णाम्	श्वेताश्वतरोपनिषत् ४/ ५	८८
	महानारायणोपनिषत् ८।४	
	नारायणपूर्णतापिन्योपनिषत् ५/ ५	
अजायमानो बहुधा	मुद्गलोपनिषत् ३/ १	३७
	चित्त्युपनिषत् १३/ १	
	तैत्तिरीय-आरण्यकम् ३/ १३/ ३	
अणिमा लघिमा चैव (३)	श्रीमद्भागवतम् ११/ १५/ ४-५	१६४
अण्डानान्तु सहस्राणाम् (२)	विष्णुपुराणम् २/ ७/ २७-२८	१५६
अत्युत्कटैः पुण्यपापैः	—	८५
अत्रात्मव्यतिरेकेण (६)	स्कन्दपुराणम्	५१
अत्राप्युदाहरन्तीमितिहासम् (२४)	महाभारते मोक्षधर्मः २६५/ १-१२	१७७
अथ चित्तं समाधातुम्	भगवद्गीता १२/ ९	५०, १३७
अथवा ह्यासने यस्मिन् (९)	स्कन्दपुराणम्	१२२
अथात आदेशो नेति	बृहदारण्यकोपनिषत् २/ ३/ ६	७७
अथाशरीरस्य ब्रह्मणः	मैत्रायण्युपनिषत्	३५
अथैतदप्यशक्तोऽसि	भगवद्गीता १२/ ११	५०
अदृष्टविग्रहो देवो	बृहद्योगियाज्ञवल्क्यस्मृतिः २/ ६१	४०

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
अधः शिरश्चोर्ध्वपादः (११)	योगतत्त्वोपनिषत् १२४	९७
(७)	हठयोगप्रदीपिका ३/ ८०-८२	
अनाहतस्य शब्दस्य	मण्डलब्राह्मणोपनिषत् ५/१	५४
अनित्ये कार्ये	योगभाष्यम् २/ ५	७२
अनिर्वाच्योऽज्ञानेनावृत्तं ज्ञानम्	स्मृतिवाक्यम्	७७
अन्तर्लक्ष्या बहिर्दृष्टिः	शाण्डिल्योपनिषत् १/३१	५५
अपवर्गेऽथ संत्यागे (१६)	महाभारते, मोक्षधर्मः	१७९
अपसव्येन संपीड्य (१५)	—	९४
अप्रमत्तस्तदा भवति (१)	कठोपनिषत् २/३/११	६
अभ्यासयोगयुक्तेन	भगवद्गीता ८/८	५१, १५७
अभ्यासेन तु कौन्तेय	भगवद्गीता ६/१५	२१
अभ्यासेऽप्यसमर्थोऽसि	भगवद्गीता १२/ १०	५०
अभ्यासे प्रथमे काले (२)	हठयोगप्रदीपिका २/१४	१२८
अयं तु परमो धर्मो यद्योगेन	याज्ञवल्क्यस्मृतिः, आचारोऽध्यायः ८	१७४
अयोनौ वा वियोनौ वा	मनुस्मृतिः	९९
अरश्मिबिम्बम् (५१)	मार्कण्डेयपुराणम्	१४८
अर्थ एव हि केषाञ्चित् (४)	—	१७६
अल्पद्वारमरन्ध्र० (४)	हठयोगप्रदीपिका १/१३	१२७
अवजानन्ति मां मूढाः	भगवद्गीता ९/११	३९
अवष्टभ्य धरां सम्यक् (५)	—	१०९
अविद्यादयः क्लेशाः	व्यासभाष्यम् १/ २४	२८
अविनाशी वा अरे	बृहदारण्यकोपनिषत् ४/ ५/ १४	८
अश्वत्थामा हतः	—	९९
अष्टाङ्गां बुद्धिमाहुर्माम् (१३)	शौनकवाक्यम्	१७६
अष्टादशसु यद्वायो (२)	याज्ञवल्क्यवचनम्	१३१
असमयेषु संन्ध्यावन्दनादेः	—	१८२
असाध्यः कस्यचिद् योगः (२)	योगवासिष्ठम्	७
अस्ति भाति प्रियात्मकम् (२)	वेदान्तपरिभाषा (विषयपरिच्छेदः) ३०९	१९४
आकाशाद्वायुः वायोरग्निः	तैत्तिरीयोपनिषत् २/ १/ १	१४०
आकाशे विगताऽम्बुदे	तन्त्रशास्त्रम्	१५०
आत्मक्रीड आत्मरतिः क्रियावान्	मुण्डकोपनिषत् ३/ ४	१७४
आत्मसत्यानुबोधेन	अद्वैतोपनिषत् ३२	९२

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
आत्मा वा अरे	बृहदारण्यकोपनिषत् २/ ४/ ५, ४/ ५/ ६	२
आधारकमले सुप्ताम् (६)	—	९६
आनन्दभुक्चेतोमुखः	—	१५
आनन्दलक्षणमनाहत०	—	५५
आनन्दवर्तवेगेन (४)	हठयोगप्रदीपिका २/ ३३, ३४	९४
आपो ज्योतिरसोऽमृतम्	बटुकोपनिषत् २७	१२३
	अथर्वशिरोपनिषत् ३/ १३	
	वनदुर्गोपनिषत् १२१	
आरम्भश्च घटश्चैव	शिवयोगः	१२६
आरेच्यापूर्य यत् कुर्यात्	स्कन्दपुराणम्	१२३
आसनं तु ततो बद्धवा (४)	—	१२०
आसनस्थानविधयो	पुराणवाक्यम्	१३७
आसनस्थेन पादौ द्वौ (२)	—	१११
आसनेभ्यः समस्तेभ्यः (२)	गोरक्ष	११४
आसने सुखदे योगी (६)	हठयोगप्रदीपिका २/ ४८-५०	११८
आहवनीये जुहोति	मीमांसान्यायप्रकाशः ८६/ १	१८२
आहारो बहुलं तस्य कार्योऽल्पे (५)	—	९७
इच्छामात्रं प्रभोः सृष्टिः	माण्डूक्योपनिषत् (आगमखण्डः) ८	१७०
इड्या पूरयेद्वायुम् (२)	योगभास्करः	१२२
इतिहासपुराणानि च पञ्चमो	मनुस्मृतिः	१७६
इतिहासपुराणाभ्याम् (२)	महाभारतम्	१७६
इत्थं मासत्रयाभ्यास० (२)	स्कन्दपुराणम् (उत्तरार्द्धः) ५३/ ४९	१२५
इन्द्रियाणीन्द्रियार्थेभ्यः (२)	महाभारतम्	१३०
	योगोपनिषत् २३	
ईश्वरः सर्वभूतानाम्	भगवद्गीता १८/ ६१	३७
उत्सेक उदधेर्यद्वत्	गौडपादवाक्यम्	२१
	अद्वैतोपनिषत् ४१	
उत्तानं शववद् भूमौ (२)	हठयोगप्रदीपिका १/ ३४	११२
उत्तानौ चरणौ कृत्वा (४)	हठयोगप्रदीपिका १/ ४७-४८	१०८
उपनयनादूर्ध्वमेतानि	आरुणिकोपनिषत् ४	१८५
उपवासपराकादिकृच्छ्र०	ईश्वरगीता	७०
ऊर्ध्वनाभिरधस्तालु० (२)	हठयोगप्रदीपिका ३/ ७९	९७

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
ॐ तत्सदिति	श्रुतिवाक्यम्	४०
ॐ मित्येकाक्षरम्	प्रणवोपनिषत् २	४२
ऋग्वेदः स्यात् (१०)	स्मृतिवाक्यम्	४३
ऋणानि त्रीण्यपाकृत्य	—	१८२
ऋतं पिबन्तौ सुकृतस्य	कठोपनिषत् १/ ३/ १	३०
एकं ज्योतिर्मयम् (१०)	पुराणवाक्यम्	१३५
एकं पादमथैकस्मिन् (२)	हठयोगप्रदीपिका १/ २३	१०८
एकं रूपं बहुधा यः	कठोपनिषत् २/ १२	३७
	ब्रह्मोपनिषत् १५	
एकः समस्तम्	विष्णुपुराणम् २/ १६/ २३	३८
एककालं द्विकालं वा	स्मृतिवाक्यम्	१२८
एकधा तद् द्विधा चैव (२)	कूर्मपुराणम् ४/ ५४-५५	१७१
	लिंगपुराणम् ७०/ ९०	
एकपादमथैकस्मिन् (२)	—	११२
एकमेवाऽद्वितीयं ब्रह्म	गोपालोत्तरतापन्युपनिषत् ९	३२, ३७, ७७
एकस्तु प्रभुशक्त्या (७)	वायुपुराणम् ६६/ ४३, ४४	१७१
	(समानार्था श्लोकाः)	
एकान्तगिरिदुर्गेषु	आदित्यपुराणम्	१२७
एको देवः सर्वभूतेषु	श्वेताश्वतरोपनिषत् ६/ ११	३७
	ब्रह्मोपनिषत् १६	
	गोपालोपनिषत् ३/ १९	
एको वशी सर्वभूतान्तरात्मा	कठोपनिषत् २/ २/ १२	३७
एतत् श्रेयो येऽभिनन्दन्ति (२)	मुण्डकोपनिषत् १/ २/ ७	१७५
एतद् बुद्ध्वा बुद्धिमान्	भगवद्गीता १५/ २०	१६१
एतद्धि जन्मसाफल्यम्	मनुस्मृतिः १२/ ९३	१८१
एतद्वै सत्यकाम०	मैत्रायण्युपनिषत् ६/ ५	४३
एवं खलु कपोतश्च कपोती	महाभारतम्	८४
एष एवात्मा	नृसिंहोपनिषत् ८/ १०	३७
एषोऽसौ परमहंसः	हंसोपनिषत् ६	६२
ओमितीदं सर्वम्	तैत्तिरीयोपनिषत् १/ ८/ १	४३
ओमित्येतदक्षरम्	तैत्तिरीयोपनिषत् १/ ८/ १	४२
कपालकुहरे जिह्वा (४)	हठयोगप्रदीपिका ३/ २२	९६

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
	स्कन्दपुराणम् (उत्तरार्द्धः) ५३/ १०४	
	योगचूडामण्युपनिषत्	
	ध्यानबिन्दूपनिषत् ७९, ८२	
कर्पूरं मधुरं स्निग्धम् (२)	—	१२८
कर्मणा कर्म निर्हारो न	श्रीमद्भागवतमहापुराणम्	१९०
कर्मणा पितृलोकः	बृहदारण्यकोपनिषत् १/ ५/ १६	१९०
कर्मणा मनसा वाचा सर्वभूतेषु	याज्ञवल्क्यस्मृतिः (आचारोऽध्यायः) १५६	९८
कर्मणा मनसा वाचा	नारायणपूर्णतापिन्युपनिषत् ४/ १५	९९
कर्मणैव हि संसिद्धिम्	भगवद्गीता ३/ २०	१९१
कर्मण्यकर्म यः पश्येत्	भगवद्गीता ४/ १८	१७४
कलत्रमित्रपुत्रार्थ०	विष्णुपुराणम् ६/ ५/ ५६	८६
कामतोऽकामतो वाऽपि	स्मृतिवाक्यम्	७०
कायेन मनसा वाचा (२)	जाबालदर्शनोपनिषत् १/ ७	१७४
कीटभृङ्गन्याय०	—	४०
कुक्कुटासनबन्धस्थो (२)	त्रिशिखिब्राह्मणोपनिषत् २/ ४२	११०
	हठयोगप्रदीपिका १/ २६	
कुम्भः सप्तविधो ज्ञेयो (३)	देवलः	१२१
कुर्वन्नेवेह कर्माणि	ईशोपनिषत् २	१७९
केवलं सहितं वापि (२)	—	११७
केवले कुम्भके सिद्धे (२)	हठयोगप्रदीपिका २/ ७३-७४	१२६
क्रत्वादिरूपतेव	—	१९०
क्रौञ्चस्यैवावस्थितिः	—	११३
क्षीयन्ते चास्य कर्माणि	मुण्डकोपनिषत् २/ २/ ८	८१
गरुडस्यैवावस्थितिः	—	११२
गुदं नियम्य गुल्फाभ्याम् (२)	त्रिशिखिब्राह्मणोपनिषत् २/ ३८	१११
	हठयोगप्रदीपिका १/२४	
गुल्फौ च वृषणस्याधः (३)	त्रिशिखिब्राह्मणोपनिषत् २/ ४५	१०८
	जाबालदर्शनोपनिषत् ३/ ७	
	शाण्डिल्योपनिषत् १/ ३८	
	हठयोगपप्रदीपिका १/ ५२, ५३, ५४	
गुल्फौ च वृषणस्याधः (५)	—	१०९
गुह्यस्थानकमङ्घ्रिमूल० (४)	—	११३

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
गूढं परं ब्रह्म मनुष्यलिङ्गम्	—	३८
गृहीत्वा चेतनां वायुः (२)	—	१२६
गोदोंहं वत्सपानं वा	याज्ञवल्क्यवाक्यम्	१२४
गोधूमशालियवषाष्टिक (२)	हठयोगप्रदीपिका १/ ६४	१२८
ग्रहणाकारपूर्वा बुद्धिः	व्यासभाष्यम्	१८
चतुरंगुलविस्तारम् (४)	हठयोगप्रदीपिका २/ २४-२५	९२
चतुराशीत्यासनानि (४)	हठयोगप्रदीपिका १/ ३५, ३६	११३
चित्रया यजेत पशुकामः	तैत्तिरीयसंहिता २/ ४/ ६ मीमांसान्यायप्रकाशः २१५/ १०	८४
चैतन्याभाससंयुक्तं शरीर०	—	७५
चैत्यवन्दनमिष्टसाधनम्	—	९९
छेदनचालनदोहैः (१३) (१०)	हठयोगप्रदीपिका ३/ ३३, ३७, ३८, ४२, ४३	९३
जपतो नास्ति पातकम्	स्मृतिवाक्यम्	४८
जप्येनैव तु संसिध्य (२)	—	१७६
जानुं प्रदक्षिणीकृत्य	स्कन्दपुराणम्	१२४
जानूप्रसारितं (१)	—	१०९
जानूर्वोरन्तरे	—	१०९
जायमानो वै नरस्त्रिभिः	तैत्तिरीयसंहिता ६/ ३/ १०	१८२
जिह्वया वायुमाकृष्य (४)	योगकुण्डल्युपनिषत् १/ ३० हठयोगप्रदीपिका २/ ५७-५८	११९
जीवन्नेव विद्वान्	—	९
ज्ञात्वा देवं मुच्यते	श्रुतिवाक्यम्	४७
ज्ञानं नैवात्मनो धर्मो	सौरपुराणम् ११/ २५	८७
ज्ञानविवित्सुः दोषेषु कर्मसु	शौनकवाक्यम्	१७६
ज्ञानाग्निदग्धकर्माणं तमाहुः	भगवद्गीता ४/ १९	८२
ज्ञानाग्निसर्वकर्माणि	भगवद्गीता ४/ २७	८१, ८२
तं त्वौपनिषदं पुरुषम्	बृहदारण्यकोपनिषत् ३/ ९२/ ६	६७
ततोऽभ्यासक्रमेणैव	—	१२६
तत्त्वमसि	छान्दोग्योपनिषत् ६/ ८/ ७	३२, ३३, ४१, ६७
तत्र यः परमात्मा	—	३०
तत्रैव शक्यते वक्तुम् (३)	मीमांसावार्त्तिककारः	१८६
तदधिगम उत्तरपूर्वा०	ब्रह्मसूत्रम् ४/ १/ १३	८१

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
तदेव सक्तः सह	बृहदारण्यकोपनिषत् ४/ ४/ ६	८२
तदैक्षत बहु स्याम	छान्दोग्योपनिषत् ६/ २/ ३	२८
तद्यो यो देवानाम्	बृहदारण्यकोपनिषत् १/ ४/ १०	७५
तद्वत् पादद्वयं कुर्यात् (४)	—	११२
तद्वत्पादद्वयं कृत्वा (४)	—	११२
तद्विद्धि प्रणिपातेन परिप्रश्नेन	भगवद्गीता ४/ ३४	२१
तद्वृत्तिप्रत्ययैक०	विष्णुपुराणम्	१३४
तद्धेदं तर्ह्यव्याकृत०	बृहदारण्यकोपनिषत् १/ ४/ ७	७५
तन्नामरूपाभ्यामेव	बृहदारण्यकोपनिषत् १/ ४/ ७	७६
तपसा तोषयित्वा (११)	वायुपुराणम्	३९
तमेतमात्मानमोमिति	कौषीतकिब्राह्मणोपनिषत् ४/ २०	४५
तमेव विदित्वाऽतिमृत्युमेति	श्वेताश्वतरोपनिषत् ३/ ८, ६/ १५	२, ४७
तरति शोकमात्मवित्	छान्दोग्योपनिषत् ७/ १/ ३	२
तलपादेन वामेन जानुना (२)	—	१११
तस्मादेतास्तु संसेव्य (२)	—	१२०
तस्मान्न बध्यतेऽद्धा	सांख्यकारिका ६२	२०३
तस्मान्मद्भक्तियुक्तस्य (५)	—	२६
तस्य तेनानुभावेन (२)	—	१८५
तस्य पुत्रा दायमुपयान्ति	भगवद्गीता १८/ १० (ब्रह्मानन्दगिरिव्याख्याने)	८२
तस्य मात्रात्रयध्यानात् (४)	स्मृतिवाक्यम्	१२५
तस्य ह न देवाश्च	बृहदारण्यकोपनिषत् १/ ४/ १०	४८
तस्याहं सुलभः पार्थ	भगवद्गीता ८/ १४	१५७
तस्यैव ब्रह्मणि प्रोक्तम् (१)	गरुडपुराणम् (उत्तरार्द्धः) १२२/ २५	१३६
तातैतद् बहुशोऽभ्यस्तम्	—	१८०
तानि सर्वाणि संयम्य (२)	भगवद्गीता २/ ६१	१३२
तामेव तत्र जानानः	—	१४
तावन्मनो निरोद्धव्यम्	—	५
तेषां सततयुक्तानाम् (२)	भगवद्गीता १०/ ११	२६
त्रयो धर्मस्कन्धाः	छान्दोग्योपनिषत् २/२३/१	१७४
त्रिषु धामसु यद्भोग्यम्	कैवल्योपनिषत् १५/ १८	१४
त्रैगुण्यविषया वेदा निस्त्रैगुण्यः (२)	भगवद्गीता २/ ४५	१८०
त्यक्तान्यभावस्य	—	१८७

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
त्यक्त्वा कर्म फलासङ्गम्	भगवद्गीता ४/ २०	१७३
त्यज धर्ममधर्मञ्च	संन्यासोपनिषत् २/ १२	८९, १७४, १८७
त्याग एव हि सर्वेषाम्	—	१७९
त्वरितं लघुभिर्वर्णैः (१)	नन्दिपुराणम्	१२४
त्वां शरणद	स्मृतिवाक्यम्	४१
दक्षजानौ सव्यगुल्फम् (४)	—	११३
दक्षिणोरुगतं वामपादम् (३)	—	११२
दण्डाष्टकं यदा वायुः (२)	—	१२६
दश मन्वन्तराणीह (५)	वायुपुराणम्	२४
दशमस्त्वमसि	वेदान्तपरिभाषा (प्रत्यक्षपरिच्छेदः) ४६	६७
दह्यन्ते ध्मायमानानां (२)	मनुस्मृतिः ६/ ७१	१२९
देवयानादिवैयानम् (८)	—	१८१
देशकालसंख्याभिः	व्यासभाष्यम् २/ ५१	११७
देशावस्थितमालक्ष्य (२)	कूर्मपुराणम् (उत्तरार्द्धः) ११/ ४०	१३३
द्वौ क्रमौ चित्तनाशस्य (२)	शाण्डिल्योपनिषत् १/ ७/ २४	७
	योगिवासिष्ठः ४/ ७८/ ८	
द्रव्याणामप्यनादा०	—	१००
धर्मः प्रज्ञां वर्द्धयति	—	१८२
धर्मेण पापमपनुदति	महानारायणोपनिषत् १७/ ६	१८२
धारणादिविधिर्नैव	—	१३८
धारणा सप्त कुर्वन्	—	१३४
धार्मिकस्त्वमसि	—	६७
धूमस्तोमं तमश्शंके	—	१२
धौती बस्ती तथा (३)	हठयोगप्रदीपिका २/ २२-२३	९३
ध्यानं द्वादशपर्यन्तम्	गरुडपुराणम् १/ २२७/ २५	१३६
ध्याननिर्मथन०	श्रुतिवाक्यम्	४८
न कर्मणा न प्रजया	महानारायणोपनिषत् ८/ १४	१००, १७४
न किङ्करो	—	१८७
न केचन जगद्भावाः (२)	योगवासिष्ठः	१९२
न चेहाऽविदुषो	—	१८६
न त्वत्समोऽस्त्यभ्यधिकः	भगवद्गीता ११/ ४३	३२
न निरोधो न चोत्पत्तिः	अवधूतोपनिषत् ८	२०३

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
	ब्रह्मबिन्दूपनिषत् १०	
	आत्मोपनिषत् ३१	
न प्राणेनाप्यपानेन (४)	स्मृतिवाक्यम्	१२०
न मुञ्चति न गृह्णाति (३)	—	११६
न वासुदेवभक्तानाम्	भगवद्गीता	५१
न वा ह्येते	—	१७५
न विधौ परः शब्दः	न्यायः	४२
न सोऽस्ति प्रत्ययो लोके	—	१७
न हिंस्यात्	—	१७५, १८३, १८४, १८९
न हि कल्याणकृत् कश्चित्	भगवद्गीता ६/ ४०	१८२
न हि द्रष्टुर्दृष्टेः	बृहदारण्यकोपनिषत् ४/ ३/ २३	३४
न हि धर्मात्	—	१८२
नाकस्य पृष्ठे सुकृते	मुण्डकोपनिषत् १/ २१०	१०४
नातिशीते न चोष्णे (१०)	स्मृतिवाक्यम्	१२७
नात्र काचन भिदाऽस्ति	महावाक्यरत्नावली ४	४४
नाभिदघ्ने जले पायु० (६)	हठयोगप्रदीपिका २/ २६-२८	९३
नाभेरधो गुदस्योर्ध्वम् (१४)	—	९३, १३३
नाल्पे सुखमस्ति	छान्दोग्योपनिषत् ७/ २३/ १	१८१
नाऽश्वमेधेन तत्पुण्यम् (२)	स्कन्दपुराणम् (उत्तरार्द्धः) ५३/ ८४	१३५
नाऽसद्रूपा न सद्रूपा	आदित्यपुराणम् ११/ २८	७५
नासासंपुटमङ्गुल्या (२)	स्कन्दपुराणम्	११५
नास्य कृतः कृतेन	—	१८७
नित्यो नित्यानाम्	कठोपनिषत् ५/ १३	४६
निमिषोन्मेषणे मात्राकालो (२)	मार्कण्डेयपुराणम् ३१/ १५	१२४
निरीक्षेन्निश्चलदृशा (४)	हठयोगप्रदीपिका २/ ३१, ३२	९४
नीलोत्पलदलश्याम० (१०)	योगवासिष्ठः	१३५
पञ्च पञ्चनखा भक्ष्याः	मीमांसान्यायप्रकाशः २०३/ २१	१८९, १९०
पदे जुहोति	—	१८२
पद्मासनं तु संयोज्य (२)	हठयोगप्रदीपिका १/ २५	११०
	त्रिशिखिब्राह्मणोपनिषत् २/ ५०	
	(श्लोकाः पाठभेदेन)	
परद्रव्यापहरणं चौर्याद्वाथ	—	९९

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
पर्यङ्कं योगपट्टेन बध्नीयात् (६)	—	१०९
पर्यग्निकृत० (१२)	—	१८०
पादमूलेन संपीड्य (४)	—	९६
पादाङ्गुष्ठौ च पाणिभ्याम् (२)	हठयोगप्रदीपिका १/ २७	१११
	त्रिशिखिब्राह्मणोपनिषत् २/	
पादौ द्वौ द्विगुणीकृत्य (३)	—	१०९
पुनर्विरेचयत्तद्वत् (१०)	हठयोगप्रदीपिका २/ ६२-६५	१२०
	२/ ६६ प्रथम पंक्ति	
	२/ ६७ द्वितीय पंक्ति	
पुरुषः प्रकृतिस्थो हि	भगवद्गीता १३/ २१	८२
पुरुषः स परः पार्थ	भगवद्गीता ८/ २२	२६
पुरुषो विषयी नित्यम्	अनुगीता	११७
पूरकं षोडशभिः कृत्वा	—	१२५
पूरकान्ते गाढतरं (२)	हठयोगप्रदीपिका २/ ६९	११९
पूरणात् पूरकः प्रोक्त इति	—	११६
पूर्वाभ्यासेन तेनैव ह्रियते	भगवद्गीता ६/ ४४	१८७
प्रणवेन परं ब्रह्म (३)	स्मृतिवाक्यम्	४६
प्रतिसंवत्सरं सोमेन	याज्ञवल्क्यस्मृतिः (आचारोऽध्यायः)	१८२
प्रवृत्तिसंज्ञके धर्मे	—	१८२
प्रसार्य पादौ भुवि (३)	हठयोगप्रदीपिका १/ ३०-३१	११०
	त्रिशिखिब्राह्मणोपनिषत् २/ ५०	
प्रसुप्तास्तत्त्वलीनानाम्	व्यासभाष्यम् २/ ४	७२
प्राणः प्राणमयो वायुः	पद्मपुराणम्	१२१
प्राणस्पन्दनिरोधाद्यै०	—	६४
प्राणापानौ नादबिन्दु० (२)	—	१२६
प्राणायामस्त्रिधा प्रोक्ता	—	११४
प्राणायामस्य मानं तु (९)	लिङ्गपुराणम्	१२४
प्राणायामोऽस्य मथनं (६)	नन्दिपुराणम्	१२५
प्राणायामैर्द्वादश०	गरुडपुराणम् १/ २२७/ २८	१३४
प्राणेन पीडितापानं (५)	स्मृतिवाक्यम्	१२०
प्राणेनोत्सार्यमाणेन (२)	—	१२४
प्राप्नुयाद्विषयान्	महाभारते, मोक्षधर्मः ३००/ २७	१७२

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
बद्ध्वा गले शिराजालम् (३)	—	९७
बहिर्विरेचनं वायोः (२)	—	११५
बाधिर्यं जडता लोपः	—	१२८
बाह्यमाभ्यन्तरं शौचम्	—	१००
बाह्याग्रप्रपदाभ्याम्	—	११३
बाह्ये स्थितं नासापुटेन (२)	—	११६
ब्रह्मचर्यं तपः श्रद्धा (१०)	शौनकादिस्मृतिः	१७३
ब्रह्मणो मायिकोऽपि	श्रुतिवाक्यम्	३५
ब्रह्मरन्ध्रादयोऽयोध्या	वराहपुराणम्	५७
ब्रह्मविदाप्नोति परम्	तैत्तिरीयोपनिषत् २/ १/ १ भस्मजाबालोपनिषत् २/ ७	२, ४७
ब्रह्मविद् ब्रह्मैव भवति	—	२
ब्रह्मविष्णुमहेषानाम् (१)	—	३६
ब्रह्मविष्णुशिवा ब्रह्मन् (२)	विष्णुपुराणम् १/ २२/ ५८	३६
ब्रह्मसंस्थोऽमृतत्वमेति	छान्दोग्योपनिषत् २/ २३/ १	४४
ब्रह्माणमेव विष्णुः	श्रुतिवाक्यम्	४१
ब्रह्मोडुपेन प्रतरेत विद्वान्	श्वेताश्वतरोपनिषत् २/ ८	४८
भवन्ति ज्ञानिनो नित्यम्	महाभारते मोक्षधर्मः २६९/ ११	४७
भुवि स्थित्वा तु जानुभ्याम् (२)	—	१११
भूतिकामो वायव्यं श्वेतमालभेत	तैतिरीयसंहिता	१८४
भूमौ स्वमस्तकं स्थाप्य (२)	—	११२
भूयः सृष्ट्वा पतयः (२)	श्वेताश्वतरोपनिषत् ५/ ३	३२, ३६
भूयश्चान्ते विश्वमाया	श्वेताश्वतरोपनिषत् १/ १०	७५
भेदस्तमसोऽष्टविधो (२)	सांख्यकारिका ४८	७९
भोक्तारं यज्ञतपसां सर्व०	भगवद्गीता ५/ २९	७०
भस्त्रेव लोहकाराणाम् (२)	हठयोगप्रदीपिका २/ ३५	९४
मासंभक्षयिताऽमुत्र	मनुस्मृतिः ५/ ५५	१०४
मन एव मनुष्याणाम् (२)	शाट्यायन्युपनिषत् १	६
मनसैवाऽनुद्रष्टव्यम्	बृहदारण्यकोपनिषत् ४/ ४/ १९	६८
मनोमयः तेन	बृहदारण्यकोपनिषत् ४/ ४/ ५	४४
मन्त्रायुर्वेदवच्च	—	३१
मय्येकचित्तता योगो	—	४

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
मय्येव मन आधत्स्व	भगवद्गीता १२/ १८	५०, १३७
महापातकयुक्तोऽपि (२)	पुराणवाक्यम्	१३५
महामुद्रा महाबन्धो (२)	हठयोगप्रदीपिका ३/ ६	९३
महावेधं स्थितो योगी (९)	—	९५
मात्रा द्वादशको मन्दः (२)	कूर्मपुराणम् (उत्तरार्द्धः) ११/ ३२	१२५
मामेव ये प्रपद्यन्ते	भगवद्गीता ७/ १४	२७
माया ह्येषा मया (२)	—	३७
मुक्तात्मनः प्रशंसा	सांख्यसूत्रम् १/ ९५	३०
मुखं संयम्य नाडी (६)	हठयोगप्रदीपिका २/ ५१-५३	११९
मेढ्रादुपरि विन्यस्य सव्यम्	हठयोगप्रदीपिका १/ ३८	१११
	जाबालदर्शनोपनिषत् ३/ ९	
यं कामं कामयते	छान्दोग्योपनिषत् ८/ २/ १०	४८
यं लब्ध्वा चापरं	भगवद्गीता ६/ २२	२३
य एवं विद्वान् सुरां पिबति	सौत्रामणिः	१७५
य एवैतं ब्रह्मलोकम्	छान्दोग्योपनिषत् ८/ ४/ ३	१०५
यच्च कामसुखं लोके	—	१०६
यततो ह्यपि कौन्तेय (२)	भगवद्गीता २/ ६०	१३२
यतो वा इमानि भूतानि	तैतिरीयोपनिषत् ३/ १	१४१
यत्र चैवात्मनात्मानम्	भगवद्गीता ६/ २०	४
यत्र त्वस्य (२)	—	२०२
यत्र पश्यति चात्मानम्	स्मृतिवाक्यम्	५
यत्र सुप्तो न कञ्चन	बृहदारण्यकोपनिषत० ४/ ३/ १९	१५
यत्रोपरमते चित्तं निरुद्धम्	भगवद्गीता ६/ २०	५
यत्रैतत् पुरुषः स्वपिति	छान्दोग्योपनिषत् ६/ ८/ १	१५
यथार्थकथनाचारं सत्यम्	—	९९
यथोक्तान्यपि कर्माणि (२)	मनुस्मृतिः १२/ ८२	१८१
यदग्ने रोहितं रूपम्	छान्दोग्योपनिषत् ६/ ४ / १	१९५
यदहरेव विरजेत्	याज्ञवल्क्योपनिषत् १	१८६
यदहरेवैनः	याज्ञवल्क्योपनिषत् १	१८७
यदात्मतत्त्वं प्रसमीक्ष्य (२)	स्मृतिवाक्यम्	६
यदा नाडीविशुद्धिः	स्मृतिवाक्यम्	११८
यदा पञ्चावतिष्ठते (२)	कठोपनिषत् ६/ १०	६

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
	मैत्रायण्युपनिषत् ६/ ३०	
यदा भवेत् घटावस्था (२)	—	१२६
यदा सुषुप्तो भवति	बृहदारण्यकोपनिषत् २/ १/ १९	१५
यदिदं ब्रह्मपुरम्	आत्मप्रबोधोपनिषत् ११	१५९
यदि मन्त्राङ्गहीनो यो यज्ञः (४)	—	१८०
यदि वेतरथा	याज्ञवल्क्योपनिषत् १	१८५
यदृच्छालाभतो नित्यम्	जाबालदर्शनोपनिषत् २/ ५	१०१
यद् यद् विभूतिमत् (२)	भगवद्गीता १०/ ४१	३८
यन्न दुःखेन संभिन्नम्	गरुडपुराणम् १०९/ ४४	१८७
यमानभीक्ष्णं सेवेत	श्रीमद्भागवतम् ११/ १०/ ५	१०१
यमेवैष वृणुते तेन (२)	कठोपनिषत् २/ २२	२६
	मुण्डकोपनिषत् ३/ २/ ३	
यस्मादुच्चार्यमाण एव	अथर्वशिर उपनिषत् ३/ ५	४४
यस्मिन् यस्मिन् वयसि	हारीत	८५
यस्य देवे यथा (२)	श्वेताश्वतरोपनिषत् ६/ २३	२६, ३४
यस्य नाहङ्कृतो	भगवद्गीता १८/ १७	१६७, १७३
यस्य यत्कारणं प्रोक्तम् (२)	स्मृतिवाक्यम्	१४०
यावज्जीवम्	—	१८६
यावत् केवलसिद्धिः (१)	हठयोगप्रदीपिका २/ ७२	१२३
यावद्वा शक्यते (३)	योगवासिष्ठः	११७
	परि.जाबालोपनिषत् ६/ ५	
यावनर्थ उदपाने सर्वतः	भगवद्गीता २/ ४६	१८०
या हि नासादिदेशेषु	स्मृतिवाक्यम्	५४
युज समाधौ	धातुपाठः ४/ ७१	६
येन येन हि भावेन	मनुस्मृतिः ४/ २३४	८४
ये हि संस्पर्शजा (२)	भगवद्गीता ५/ २२	२१
योगस्तु द्विविधो ज्ञेयो	स्मृतिवाक्यम्	५
योगिनः कर्म कुर्वन्ति	भगवद्गीता ५/ ११	१७४
योगी यामहमेतावन्तम्	—	४
योगेन योगो ज्ञातव्यः (२)	सौभाग्यलक्ष्म्युपनिषत् ५	१३७
योनिस्थानकमङ्घ्रिमूलघटितम् (४)	हठयोगप्रदीपिका १/ ३७	१०८
यो ब्रह्माणं विदधाति	श्वेताश्वतरोपनिषत् ६/ १८	३५, ३६

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
योऽयं विज्ञानमयः	बृहदारण्यकोपनिषत् ४/ ३/ ७	८
योषितागिंनं ध्यायीत	—	२७
योऽस्यां प्रसारितः (९)	—	९५
रसनातालुयोगेन यः	—	११९
रेचकं पूरकं त्यक्त्वा (२)	हठयोगप्रदीपिका २/ ७२ प्रथम पंक्तिः	११६
	याज्ञवल्क्यस्मृति २/ ७३ द्वितीय पंक्तिः	
	योगवासिष्ठः ६/ २५/ १०	
	परि. जाबालदर्शनोपनिषत् २/ १०८	
रेचितस्य बहिस्तम्भो (१०)	देवलः	१२१
लवणोदकन्यायेन	—	४०
लाभस्तेषां जपस्तेषाम्	स्मृतिवाक्यम्	४८
लोकवत्तु लीलाकैवल्यन्यायेन	ब्रह्मसूत्रम् २/ १/ ३३	३९
लोकसंग्रहमेवाऽपि	भगवद्गीता ३/ २०	१९१
लोके व्यवायामिषमद्यसेवानित्यास्तु	—	१८७
वर्त्मनि जुहोति	—	१८२
वसन्ते ज्योतिषा यजेत	—	१८२
वसन्ते वसन्ते ब्राह्मणो	मीमांसान्यायप्रकाशः (प्रभासंवलितः)	१८२, २१३
वाक्सिद्धिः कामचारित्वम् (८)	—	११७
वाचारम्भणं विकारो नामधेयम्	छान्दोग्योपनिषत् ६/ १/ १	१९३
वामनासापुटे यस्य (५६)	स्कन्दपुराणम्	१४६
वामोरुमूलार्पितदक्षपादम् (४)	हठयोगप्रदीपिका २/ ६८	११०
विकर्म यच्च	—	१८७
विज्ञानमानन्दम्	—	३४
विद्याञ्चाविद्याञ्च (२)	ईशोपनिषत् ११	१७४
विधिरत्यन्तमप्राप्तौ नियमः	मीमांसान्यायप्रकाशः २०२/ १	१९०
	तन्त्रवार्त्तिकम् १/ २/ ४	
विधिस्पृष्टनिषेधानवकाशः	—	१७५
विना देशादिबन्धेन	—	५७
वृत्तिहीनं मनः कृत्वा	श्रुतिवाक्यम्	६
वेगोद्घोषं पूरकं	—	११९
वेदान्तविज्ञानसुनिश्चितार्थाः	मुण्डकोपनिषत् २/ २६	१५६
	महानारायणोपनिषत् ८/ १५	

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
	भवसन्तरणोपनिषत् ३/ ३३	
वेदान्तशतरुद्रीया	गरुडपुराणम् (उत्तरार्द्धः) १२३/ २१	७०
वेदान्तोपनिषद् ब्रह्म (४)	—	१०१
वैधर्म्याच्च न स्वप्नः	ब्रह्मसूत्रम् २/ ९/ २९	७६
वैराग्यमाद्यं यतमानसंज्ञकम्	—	२२
व्यक्ताव्यक्ते च पुरुषः	गरुडपुराणम्	४५
व्रीहीनवहन्ति	मीमांसान्यायप्रकाशम् ७९/ ३१	१७५, १८९
शङ्कुना सर्वाणि पर्वाणि	छान्दोग्योपनिषत् २/ २३/ ३	४३
शब्दात्	—	१८१
शय्यासनस्थोऽपि	विष्णुपुराणम्	१०१
शवासनस्थौ द्वौ पादौ (३)	—	११०
शिश्नोदरकृतेऽप्राज्ञः (६)	शौनकवाक्यम्	१८५
शून्यं सर्वं निराभासम्	स्मृतिवाक्यम्	५
श्येनेनाभिचरन् यजेत	मीमांसान्यायप्रकाशः ४/ १७	१८९
षट्त्रिंशदङ्गुलं हंसः (३)	स्मृतिवाक्यम्	११५
षट्शतानि दिवा रात्रौ	गोरक्षनाथवचनम्	६१
षाड्गुण्यपरिपूर्णोऽसौ	स्मृतिवाक्यम्	३७
संन्यासकृतबुद्धिं तं (१२)	महाभारते मोक्षधर्मः	१७७
संहरेच्च पुनः	महाभारते मोक्षधर्मः ३००/ ,२७	१७२
स एकधा भवति	श्रुतिवाक्यम्	१६९
स एव शक्त्या सन्निहितः	—	३८
स यदि पितृलोककामो	श्रुतिवाक्यम्	१७०
सा च सम्प्रबोधे	व्यासभाष्यम् १/१०	१३
सच्चिदानन्दविग्रहम्	मुक्तिकोपनिषत् १७/ १	३९
सति वज्रासने पादौ (८)	—	९७
सत्त्वावलम्बनम्	स्मृतिवाक्यम्	५६
सत्याख्येन	—	१८०
सत्येन सर्वमाप्नोति (३)	महानारायणोपनिषत् १७/ १	१०४
सदसत्ख्यातिर्बाधा०	सांख्यसूत्र ५/ ५६	७६
सदेव सोम्येदमग्र आसीत्	छान्दोग्योपनिषत् ८/ २/ १	१९४
समस्तेन्द्रियवृत्तिश्च (८)	स्कन्दपुराणम्	१२९
समाधिस्तत्र निर्बीजो	स्मृतिवाक्यम्	२५

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
सम्पूर्य कुम्भवत् (१८)	याज्ञवल्क्यवचनम्	१३१
सम्प्रयोजनता तेषां स्वप्ने	—	१४३
सम्प्राप्यैनमृषयो ज्ञानतृप्ताः	मुण्डकोपनिषत् ३२/ ५	२३
सम्यग्देशे समास्तीर्य (२१)	तन्त्रशास्त्रम्	१२२
स यदि पितृलोककामो	छान्दोग्योपनिषत् ८/ २/ १	१७०
सर्वं वेत्ति विष्णुः	—	४२
सर्वमिदं गुणानां	व्यासभाष्यम् ४/ १३	१९४
सर्वव्यापी सर्वभूतान्तरात्मा	—	३७
सर्वेच्छाजालसंशान्ता (२)	योगवासिष्ठः ६/ ११५/ ३४	१६१
	परि. अन्नपूर्णोपनिषत् ४/ ८	
सर्वेषु कालेषु मामनुस्मर	भगवद्गीता ८/ ७	४८
सव्याहृतीं सप्रणवां गायत्रीम् (२)	अयनोपनिषत् ११	१२३
	अमृतनादोपनिषत् ११	
सव्ये दक्षिणगुल्फं तु (२)	हठयोगप्रदीपिका १/ २२	११०
	जाबालदर्शनोपनिषत् ३/ ४	
सव्येन गुल्फेन गुदम् (२)	—	१११
साक्षी चेता केवलो निर्गुणश्च	श्वेताश्वतरोपनिषत् ६/ ११	२८
	राधोपनिषत् ४/ ३	
	ब्रह्मोपनिषत् १६	
	गोपालोपनिषत् ३/ १९	
साधु वाऽसाधु वा	—	५०
सारासारविवेकार्थमुद्योगः (५)	—	२२
सिद्धिं पद्मं स्वस्तिकम् (२)	—	११३
सीत्कां कुर्यात्तथा वक्त्रे (६)	हठयोगप्रदीपिका २/ ५४–५६	११९
सुखप्रसारितौ पादौ संश्लिष्टौ (२)	—	१०९
सुरापानं च सौत्रायणे	—	१८९
सुशोभनं मठं कुर्यात् (४)	योगतत्त्वप्रकाशः	१२७
सूत्रं वितस्तिसुस्निग्धम् (४)	हठयोगप्रदीपिका २/ २९–३०	९४
सूर्यभेदनमुज्जायी (२)	हठयोगप्रदीपिका २/ ४४	११८
सोऽहं स च	—	३८
सौत्रामण्यां सुराग्रहान्	—	१८८
स्तुतिस्मरणपूजाभिः	गरुडपुराणम्	७०

उद्धरणानि	आकरग्रन्थाः	पृष्ठसंख्या
स्थातव्ये भूतले (४)	—	१११
स्थानाद् बीजादुपष्टम्भात्	वैयासिकी गाथा	७२
स्निग्धां यवागूमत्युष्णाम् (१४)	दत्तात्रेयः	१२८
सम्यग्देशे समास्तीर्य (२१)	तन्त्रशास्त्रम्	१२२
स्मरणं स्पर्शनं केलि (३)	—	९९
स्वदेहमरणिं कृत्वा	श्वेताश्वतरोपनिषत् १/ १४	४७
स्वप्नमाये यथा दृष्टे	माण्डूक्योपनिषत् (वैतथ्यप्रकरणम्) ३१	१४२
स्वर्गकामो यजेत	मीमांसान्यायप्रकाशः ४/ १	११
स्वर्गकामो यजेतेति सततं	महाभारते मोक्षधर्मः	१७८
स्वल्पमप्यस्य	श्रुतिवाक्यम्	४९
स्वशक्तिलेशादृत०	स्मृतिवाक्यम्	३८
स्वाध्यायोऽध्येतव्यः	मीमांसान्यायप्रकाशः १५/ २	१८८
हंस इत्यजपां नित्यम् (६)	तन्त्रशास्त्रम्	४१
हंसानुसंधानफलभूतः	—	५४
हिंसायां यदि रागः स्यात्	—	१८९
हकारेण तु सूर्योऽसौ (४)	स्मृतिवाक्यम्	५३
हृत्पुण्डरीके नाभ्याम्	कूर्मपुराणम् (उत्तरार्द्धः) ११/ २९	१३३

❋

चतुर्थं परिशिष्टम्

योगसिद्धान्तचन्द्रिकाव्याख्यास्थितपारिभाषिकशब्दानां लक्षणानि

अज्ञानम्	पञ्चपर्वा अविद्याऽज्ञानम्।
अणिमा	संकल्पमात्रेण तत्क्षणादेव प्रकृत्यपगमेन परमाणुवद्देशस्य सूक्ष्मता।
अथ	अथ शब्द आरम्भार्थः।
अधिगमः	अधिगमः साक्षात्कारः।
अध्यात्मप्रसादः	आत्मानं बुद्धिमधिकृत्य वर्तमानः प्रसादः।
अनभिघातः	अप्रतिबन्धः।
अनाशयम्	न सन्त्याशयाः क्लेशकर्मादिवासना अस्मिन्नित्यनाशयम्।
	ध्यानसिद्धं चित्तमेवाऽनाशयम्।
अनुत्तमः	नास्ति उत्तमो यस्मादित्यनुत्तमः।
अनुमानम्	सामान्यात्मनाऽध्यवसायोऽनुमानम्।
	मननं यौक्तिकं ज्ञानम्।
अन्तर्यामी	अन्तःस्थित्वा प्रेरकः।
अपरिग्रहः	देहयात्रामात्रातिरिक्तभोगसाधनानामस्वीकारः।
अपवर्गः	संसारनिवृत्तिरूपकैवल्यम्।
अभिनिवेशः	प्राप्तेष्वष्टादशसु विषयेषु तपस्विभ्योऽसुरादिभ्यश्च ग्रहणभयमभिनिवेशः।
	अभिनिवेशोऽन्धतामिस्रः।
अभिभवः	दाहः।
अयुक्तः (योगी)	अयुक्तस्त्वसमाहितमनाः।
अर्थभावनम्	परमात्मनो भावनं प्रकृतितत्कार्यपुरुषेभ्यो विवेकानुसन्धानम्।
	पूर्णस्य भावनं जीवाऽभेदेन पुनः पुनश्चेतसि निवेशनम्।
अर्थः	प्रयोजनम्।
अलब्धभूमिकत्वम्	समाधिभूम्यलाभः।

अलिङ्गम्	न लिङ्गमलिङ्गं प्रधानम्।
अवस्थापरिणामः	नूतनत्वप्राचीनत्वरूपः।
अविद्या	प्रकृतिमहदहंकारपञ्चतन्मात्रेष्वाऽऽत्मत्वबुद्धिरविद्या।
	अविद्या तमः।
अविरतिः	विषयतृष्णा।
अशुक्लम् (कर्म)	केवलं पुण्यात्मकं सत्त्ववर्धकत्वात् सुखफलदम्।
अशुक्लाकृष्णम् (कर्म)	ज्ञानसाधनव्यापाररूपं कर्मसामान्यं सुखदुःखफलशून्यकैवल्यमात्रफलदम्।
असम्प्रज्ञातः	सर्ववृत्तीनां निरोधोऽसम्प्रज्ञातः।
	असम्प्रज्ञातो निर्बीजः समाधिः।
अस्तेयम्	स्तेयाऽनाचरणम्।
अस्मिता	अभिमानविशेषोऽस्मिता।
	ग्रहीत्रैकीभूताऽस्मिता।
	अस्मिता मोहः
अहिंसा	वैरत्यागः।
	सहजविरोधिनामहिनकुलादीनामपि निर्मत्सरतयाऽवस्थितिः।
आकाशम्	शब्दतन्मात्रकार्यम्।
आगमः	शब्देन श्रोतुरतदर्थाकारा वृत्तिरागमः।
आधिदैविकं (दुःखम्)	ग्रहपीडादिजमाधिदैविकम्।
आधिभौतिकं (दुःखम्)	व्याघ्रसर्पादिजनितमाधिभौतिकम्।
आध्यात्मिकं (दुःखम्)	दुःखं शारीरं मानसञ्चाध्यात्मिकम्।
	शारीरं व्याधिजं मानसं कामादिजम्।
आनन्दः	सत्त्वप्रकर्षेण जायमानाऽऽह्लादस्य साक्षात्कार आनन्दः।
आनुश्रविकाः (विषयाः)	गुरुमुखादनुश्रूयत इत्यनुश्रवो वेदः, तत्प्रतिपाद्याः स्वर्गादितत्साधनादय आनुश्रविकाः।
आयुः	चिरकालं देहप्राणयोर्योगः।
आयुर्वेदः	आयुर्वेदः चिकित्साशास्त्रं वेदस्थमेव।
आलस्यम्	योगाऽनुष्ठाने प्रवृत्तिविरोधिकफादिना कायगुरुत्वम्।
आवरणम्	क्लेशकर्मविपाकरूपाऽऽवरणम्।
आशयः	आशेरते सांसारिकाः पुरुषा अस्मिन्नित्याशयः।
	आशयो धर्माधर्मरूपः संस्कारः।

	आशयाः वासनाः।
	चित्तभूमावाशेरत इत्याशयाः।
आसनम्	स्थिरं निश्चलं सुखकरं च यत्तदासनम्।
	आस्यते आस्ते वाऽनेन प्रकारेणेत्यासनम्।
इन्द्रियजयः	विषयेभ्यः पराङ्मुखता।
ईश्वरः	ऐश्वर्येण यत्र विश्रान्तिः प्राप्यते स ईश्वरः।
उदाराः (क्लेशाः)	विषयसङ्गिनामुदाराः।
उदितः	वर्तमानेऽध्वनि स्फुरितः।
उपसर्गाः	शैथिल्यसम्पादनविघ्नरूपाः।
ऋतम्भरा	ऋतं सत्यं पुरुषयाथार्थ्यं बिभर्त्तीति ऋतम्भरा।
	सत्यमेव गृह्णाति प्रज्ञा।
एकम्	मुख्यं यन्निर्मातृचित्तम्।
एकाग्रम्	एकाग्रं तु शुद्धसत्त्वोद्रेकादात्ममात्रगोचरः।
एकार्थता	एकमात्रविषयता।
कर्म	धर्माधर्मौ कर्म।
कायः	पाञ्चभौतिकः स्थूलदेहः।
कायावसायित्वम्	सत्यसंकल्पता।
कृतार्थम्	कृतः समापितोऽर्थो यस्येति कृतार्थम्।
कृष्णं (कर्म)	पापप्रधानं तमोवर्धकत्वाद् दुःखप्रधानफलदम्।
कैवल्यप्राग्भारम्	कैवल्याभिमुखम्।
कैवल्यम्	आत्यन्तिकदुःखनिवृत्तिविशिष्टे स्वरूपे प्रतिष्ठत्वरूपम्।
क्रमः	पूर्वापरीभावः।
क्रिया	क्रिया प्रवृत्तिः, रजसो धर्मः।
क्रियायोगः	कायवाङ्मनोव्यापारः।
क्रोधः	कृत्याकृत्यविवेकोन्मूलकोऽनेनाऽपकृतमिति प्रज्वलनात्मकश्चित्तधर्मः।
क्लेशाः	अविद्यादयः।
	पुरुषं क्लिश्नन्तः क्लेशाः।
	जात्यायुर्भोगहेतवः क्लेशाः।
गरिमा	लघुतरस्यापि तूलादेः पर्वतादिवद् गुरुभावः।
गुणपर्वणि	गुणानामवस्थाः।

गुणात्मानः	आत्मपरिणामिस्वरूपं येषां ते तथाभूता गुणा परिणामाः।
गुरुः	गुरुः गृणात्युपदिशत्यपूर्वमर्थं दर्शयति।
	गु मृत्युं रुध्नाति परिपालनोपदेशादिना वेति गुरुः।
क्षणः	स्ववृत्तिध्वंसप्रतियोग्यनाधारः समयः।
क्षयोदयौ	अभिभवप्रादुर्भावौ।
क्षिप्तम्	क्षिप्तं रजस उद्रेकादस्थिरम्।
क्षेत्रिकः	कृषीवलः।
चितिशक्तिः	निर्विषयस्वप्रकाशसच्चिद्रूपतैव चितिशक्तिः।
चेतनः	आत्ममात्रदृष्टा चेतनः।
जन्मकथन्ता	कथमित्यस्य भावः कथन्ता, जन्मनः कथन्ता जन्मकथन्ता।
जपः	प्रणवस्य जपः विधिवदुच्चारणम्।
जातिः	गोत्वमहिषत्वादिः।
	योन्यन्तरम्।
जुगुप्सा	घृणा।
तनवः (क्लेशाः)	क्रियायोगिनां तनवः।
दृश्यम्	दृश्यं प्रधानम्।
दृष्टाः (विषयाः)	दृष्टाः स्त्र्यन्नपानादयः।
दौर्मनस्यम्	दौर्मनस्यम् इच्छाविघातात् क्षोभो मनसि।
द्वेषः	परेण भुज्यमानेषु शब्दादिषु परप्राप्तेष्वणिमादिषु द्वेषः।
	द्वेषस्तामिस्त्रः।
	भोगपरिपन्थिनि द्वेषस्तापः।
द्रष्टा	वृत्त्यारूढः।
	द्रष्टा पुरुषः।
	दृशिमात्रः चिन्मात्रो न धर्मादिधर्मकः।
धर्मपरिणामः	अवस्थितस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरप्राप्तेर्धर्मपरिणामः।
धर्ममेघः समाधिः	धर्ममेघः समाधि प्रकृष्टमशुक्लाऽकृष्णं कर्म पुरुषार्थसाधकं मेहति सिञ्चतीति।
धर्मी	वर्तमानरूपेणाऽनुगतो धर्मी।
निदिध्यासनम्	एकतानतादिरूपः।
निद्रा	तम आलम्बनं विषयो यस्याः सा वृत्तिर्निद्रा।
निरुपक्रमं कर्म	कालान्तरे फलप्रदम्।

निरोधः	निरोध उपशमः ।
	निरिन्धिनाग्निवत् स्वकारणे लयः ।
	निरोधः परवैराग्यं सम्प्रज्ञातो निरुद्ध्यतेऽनेनेति व्युत्पत्तेः ।
निर्गुणः	निर्गुणः आविद्यगुणशून्यः ।
निर्ग्राह्यः	अनुमेयः ।
निर्माणचित्तानि	योगप्रभावात् स्वसंकल्पेन निर्मीयन्त इति निर्माणचित्तानि ।
पुरुषविशेषः	संसारिपुरुषेभ्यः सत्यसंकल्पत्वादिना विशिष्यत इति पुरुष-विशेषः ।
पूजा	आसनपादाद्यर्पणम् ।
पूरकः	आभ्यन्तरवृत्तिः पूरकः ।
प्रकाशः	प्रपञ्चावभासः सत्त्वधर्मः ।
प्रज्ञा	प्रज्ञा पुरुषगोचरा ख्यातिः ।
प्रज्ञालोकः	प्रज्ञाया ध्यातव्यविवेकस्वरूपाया आलोको दीप्तिः ।
प्रणवः	अखण्डोङ्कारः ।
	अश्च उश्च मश्चेत्याकारात्मा ।
प्रणिधानम्	स्तुत्यादिजनिता भक्तिः ।
प्रतिपक्षभावनम्	विपक्षभावनम् ।
प्रतिप्रसवः	प्रसवविरुद्धः प्रतिप्रसवः ।
	स्वकारणेऽत्यन्तविलयः ।
प्रतिबन्धी	बाधकः ।
प्रत्यक्	प्रत्यगत्र भ्रान्तो जीवपदाभिधेयः ।
प्रत्यक्षम्	इन्द्रियविषयसामान्यविशेषात्मनोऽर्थस्य विशेषाऽवधारणप्रधाना वृत्तिः प्रत्यक्षम् ।
प्रत्ययाविवेकः	प्रत्यययोर्विविच्याऽग्रहणम् ।
प्रमादः	प्रमादः कामादिः ।
प्रयोजकम्	नियामकम् ।
प्रश्वासः	प्रश्वासः कौष्ठ्यस्य वायोर्नियमेन बहिर्गमनम् ।
	पूरकविरोधी ।
	कौष्ठ्यस्य वायोर्निःसारणं प्रश्वासः ।
प्रसंख्यानम्	साधर्म्यवैधर्म्याभ्यां तत्त्वानां सम्यक् साक्षात्कारः ।
प्रसुप्ताः (क्लेशाः)	विदेहप्रकृतिलयानां प्रसुप्ताः ।

	तत्त्वज्ञानाभावेन शक्तिरूपेणाऽवस्थिताः।
प्राकाम्यम्	इच्छाऽनभिघातः।
प्रादुर्भावः	प्रकटतयाऽवस्थानम्।
प्रान्तभूमिः	प्रान्ता भूमयोऽवस्था यस्या सा प्रज्ञा प्रान्तभूमिः।
प्राप्तिः	देशान्तरस्थवस्तुस्पर्शः।
बन्धः	विषयान्तरपरिहारेण स्थापनम्।
बहिर्यामी	बहिः स्थित्वा नियामकः।
ब्रह्मचर्यम्	अष्टविधमैथुनत्यागो ब्रह्मचर्यम्।
भावनम्	उत्पादनम्।
भुवनज्ञानम्	चतुर्दशभुवनानां साक्षात्कारः।
भूतजयः	भूतानां वशवर्तिता।
भूमयः	चित्तस्य पञ्चभूमयोऽवस्थाविशेषाः।
भोक्ता (पुरुषः)	सच्चिद्रूपः पुष्करपलाशवन्निर्लेपः।
भोगः	भोगः विषयेन्द्रियसंयोगजन्यः सुखदुःखानुभवः।
	सुखदुःखाद्याकारदृश्यबुद्धिस्वरूपस्योपलब्धिर्भोगः।
	भोगः सुखदुःखान्यतरसाक्षात्कारः।
भ्रान्तिदर्शनम्	इदं कर्म न सिद्ध्यति न वेत्येककोटिको विपर्ययः।
मनोजवित्वम्	कायस्य मनोवच्छीघ्रतरो गतिलाभः।
मन्त्रः	मन्त्रो विषादिनाशकः।
महिमा	आकाशादिवन्महद्भावः।
मूढम्	मूढं तमस उद्रेकात् कृत्याकृत्यविमुखमुल्लङ्घ्य क्रोधादिभिर्विरुद्धकृत्येष्वेव निरन्तरम्।
मैत्री	मैत्री सौहार्दम् ईर्ष्याकालुष्यनिवर्तकम्।
युक्तः (योगी)	युक्तः समाहितमनाः।
योगः	योगः समाधिः।
	योगो भूमिविशेषः।
	वृत्त्यन्तरनिरोधपूर्वकात्मगोचरधारावाहिकनिर्विकल्पकवृत्तिर्योगः।
योग्यता	विक्षेपरहितः स्थिरीभावः।
रागः	शब्दादिषु पञ्चसूत्कटदृष्ट्या रागः।
	रागो महामोहः।
रूपम्	चक्षुप्रियो गुणः।

रेचकः	बाह्यवृत्तिः रेचकः।
लघिमा	गुरुतरस्यापि पर्वतादेस्तूलवल्लघुभावः।
लक्षणपरिणामः	अनागतवर्तमानातीतावस्थापरित्यागेन लक्षणपरिणामः।
लावण्यम्	सर्वाङ्गसौन्दर्यम्।
लिङ्गम्	लयं गच्छतीति लिङ्गं महत्तत्त्वादिः।
लोभः	चर्ममांसादिविषयिणी तृष्णा।
वज्रसंहननत्वम्	वज्रस्येव निविडो दृढः संघातः।
वशीकारः	अप्रतिघातः केनाऽप्यप्रतिबन्ध्यता।
वश्यता	जयः।
विकल्पः	वस्तुशून्यो बाधितविषयप्रत्ययः।
विक्षिप्तम्	सत्त्वोद्रेकाद्रजोविशिष्टम्।
विक्षेपः	ये चित्तं तत्फलसाधनेभ्यो योगादिभ्यो विक्षिपन्ति ते विक्षेपाः। विक्षेपा ऐहिकामुष्मिकफलप्रतिबन्धद्वारा योगाद्यान्तरायाः।
विच्छिन्नाः (क्लेशाः)	विषयसङ्गिनां विच्छिन्नाः।
वितर्कः	स्थूलांशचतुर्भुजादेः साक्षात्कारो विचारः।
वितर्काः	वितर्क्यन्ते मिथ्याज्ञानजन्यधारादिवासनाभिरभिमुखीक्रियन्त इति वितर्काः।
विदेहाः	षाट्कौषिकदेहशून्या विदेहाः।
विनियोगः	नियोजनम्।
विपर्ययः	अयथार्थज्ञानम्।
विपाकः	विपाकस्तयोः फलं सुखदुःखे। विपच्यते साध्यते कर्मभिरिति जात्यायुर्भोगात्मकः। विपच्यते साध्यते कर्मभिरिति विपाकः फलम्।
विभक्तः पन्थाः	भिन्नो मार्गः।
विरामः	विरमणं विरामो वृत्तीनामभावः।
विवेकः	दृग्दृश्ययोर्भेदो विवेकः।
विवेकजं ज्ञानम्	विवेकेन इतरव्यावृत्ततया जायमानं सर्ववस्तूनां ज्ञानम्। सर्वार्थगोचरम्
विशेषाः	विशिष्यन्ते व्यावर्त्यन्ते इति विशेषाः व्यावृत्ताः।
विषयः	मोहनीयो रञ्जनीयः कोपनीयश्च रूपादिः।

विषयता	विषयता च व्यापारानुबन्धिनी।
वीर्यम्	वीर्यं प्रयत्नः।
वृत्तयः	वृत्तयो दीपस्य शिखा इवावस्थापरिणामरूपा बाह्या आभ्यन्तराश्च।
	शान्तघोरमूढाश्चित्तस्य वृत्तयः क्षणभङ्गुराः।
	क्लेशानां वृत्तय स्थूला अभिव्यक्तावस्थाः।
व्यक्ताः	वर्तमानावस्थाः।
व्यापारः	व्यापारश्च वृत्तिरेव।
व्युत्थानम्	क्षिप्तमूढविक्षिप्ताख्यं भूमित्रयं व्युत्थानम्।
व्यूहः	सन्निवेशविशेषः।
शान्तः	अतीताऽध्वनि प्रविष्टः।
शीलम्	स्वाभाविकं रूपम्।
शुक्लकृष्णं (कर्म)	पुण्यपापात्मकं पुण्यप्रधानं रजोवर्धकत्वात् सुखदुःखफलदम्।
शौचम्	मलनिरसनम्।
श्रद्धा	पुरुषगोचरा सात्त्विकी श्रद्धा।
श्रुतम्	श्रवणं शाब्दबोधः।
श्वासः	श्वासः बाह्यवायोर्नियमेनाऽन्तःप्रवेशः।
	समाध्यङ्गरेचकविरोधी।
	बाह्यवायोराचमनं श्वासः।
संयोगः	सन्निधानं संयोगः।
संवेगः	संवेगोऽत्र वैराग्यम्।
संशयः	सिद्ध्यति न वेत्युभयकोटिको विपर्ययः।
संसारहेतवः	क्लेशसंस्कारा एव संसारहेतवः।
संस्कारशेषः	ख्यातिसंस्कारः।
सत्यम्	यथार्थबोधनानुकूलो व्यापारः सत्यम्।
सन्तोषः	पूर्णमिति बुद्धिरनुपादित्साहेतुः सन्तोषः।
समाधिः	राजयोगाऽपरपर्यायः।
सम्प्रज्ञातः	चित्तस्य राजसतामसवृत्तीनां निरोध उपशमः सम्प्रज्ञातः।
सम्प्रयोगः	तदभिमुखता।
सम्बोधः	सम्यग्ज्ञानम्।
सर्वार्थम्	सर्वभानप्रयोजकम्।

सारूप्यम्	चित्तेन सह द्रष्टुर्वृत्तौ सारूप्यमवैलक्षण्यम्।
सुतुच्छकम्	अत्यल्पसारम्।
	सुतुच्छकं मिथ्यैव।
सूक्ष्मविषयत्वम्	अलिङ्गपर्यवसानम्।
सूक्ष्माः	अतीतानागतावस्थाः।
सोपक्रमं कर्म	फलदानव्यापारयुक्तम्।
सौमनस्यम्	अक्षोभः।
स्तम्भवृत्तिः (कुम्भकः)	स्तभ्यते पूरितकुम्भकवन्निश्चलतया विधारकप्रयत्नेन अन्तर्बहिरिव नाऽवस्थाप्यते इति कुम्भकः।
स्त्यानम्	चित्तस्य लघुत्वेऽपि चाञ्चल्यादिना कर्माऽनर्हता।
स्तुतिः	गुणमात्रकथनम्।
स्थानिनः	स्वर्गादिलोकाधिकरणो देवाः।
स्मयः	कृताभिमानः।
स्मृतिः	अनुभवविषयादनधिकविषयो गृहीतग्राही प्रत्ययः।
	स्मृतिर्ध्यानम्।
स्वाध्यायः	उपनिषदाद्यावृत्तिः।
स्थितिः	स्थितिर्नियमस्तमसः।
हिंसा	प्राणिदुःखसाधनव्यापारो हिंसा।
हानम्	दृग्दृश्यसंयोगस्याऽभावात्मकनिवृत्तिर्हानपदार्थः।
हेयाः	नाश्याः।

सुश्रीडॉक्टर विमलाकर्नाटकमहोदयानां ग्रन्थाः

१. **व्याख्याकारों की दृष्टि से पातञ्जलयोगसूत्र का समीक्षात्मक अध्ययन**
(पुरस्कृतम्) का. हि. वि. प्रकाशन, १९७४

२. **भारतीय दर्शन** (योगदर्शन), हिन्दी ग्रन्थ अकादमी, लखनऊ, १९७५

३. **सांख्यकारिका** (गौडपादभाष्यहिन्दीव्याख्या विभूषिता) चौखम्भा प्रकाशन, १९८४

४. **पातञ्जलयोगदर्शनम्** (तत्त्ववैशारदी–योगवार्त्तिकेतिटीकाद्वयोपेतं व्यासभाष्यम्)
(खण्डचतुष्टयम्) सपाठभेद 'बालप्रिया'ऽऽख्यहिन्दीव्याख्याया विभूषितम्
(पुरस्कृतम्) का. हि. वि. प्रकाशन, १९९२

५. **पातञ्जलयोगसूत्रवृत्तिः** (रामानन्दयतिविरचिता 'मणिप्रभा' युता सपाठभेद
'सुप्रिया'ऽऽख्यहिन्दीव्याख्योपेता च)
(पुरस्कृतम्) चौखम्भा प्रकाशन, १९९६

६. **योगदर्शन का इतिहास** (संस्कृत वाङ्मय का बृहत् इतिहास) दर्शनखण्ड
संस्कृत अकादमी, उत्तर प्रदेश, १९९९

७. **श्रीमद्भागवत में सांख्ययोग के तत्त्व : एक परिशीलन** यन्त्रस्थः
(श्रीधरीसंस्कृतटीका के आधार पर)

❋

महत्वपूर्ण प्रकाशन

सांख्यकारिका । गौड़पादभाष्य तथा हिन्दी टीका ।
सम्पादक—ढुण्ढिराज शास्त्री १५-००

सांख्यकारिका । माठरवृत्तिसहिता ।
सम्पादक—म० म० विन्ध्येश्वरीप्रसाद द्विवेदी ५०-००

सांख्यकारिका । 'युक्तिदीपिका' विवृति सहित सान्वय 'तत्त्वप्रभा' संस्कृत-हिन्दी व्याख्या, टिप्पणी (नोट्स) विभूषित ।
व्याख्याकार – डॉ० रमाशंकर त्रिपाठी ७५-००

सांख्यतत्त्वकौमुदी । 'तत्त्वचन्द्रिका' हिन्दी व्याख्या विभूषित विवृति सहित । व्याख्याकार— डॉ० ओमप्रकाश पाण्डेय ५०-००

सांख्यसंग्रहः । सम्पादक — म० म० विन्ध्येश्वरी प्रसाद द्विवेदी ५०-००

पातञ्जलयोगदर्शनम् । व्यासभाष्य सहित । सटिप्पण 'योगभाष्य-चन्द्रिका' हिन्दी व्याख्या सहित ।
व्याख्याकार— डॉ० रमाशङ्कर त्रिपाठी १५०-००

पातञ्जलयोगसूत्रवृत्तिः । रामानन्दयतिविरचिता 'मणिप्रभा' युता । सपाठभेद 'सुप्रिया'ऽऽख्य — हिन्दी व्याख्योपेता च । व्याख्याकर्त्री एवं सम्पादिका: डॉ० विमला कर्णाटक १५०-००

योगदर्शनसमीक्षा । श्रीकृष्णमणि त्रिपाठी २५-००

शिवस्वरोदयः । नूतन हिन्दी टीका सहित । डॉ० सत्येन्द्र मिश्र ४०-००

Sivasvarodaya. Text, its Romanised form and 'Sveta' Eng. Trans. Ed. by Goswami Prahiad Giri 75-00

The Aesthetic Experience According to Abhinava Gupta : By R Gnoli 250-00

Comparative Aesthetics : Vol. I. Indian Aeshthetics. By Dr. Kanti Chandra Pandey. With a Foreword by Dr S Radhakrishnan 300-00

Comparative Aesthetics : Vol. II. Western Aesthetics. By Dr. Kanti Chandra Pandey with a Foreword by Dr. S. Radhakrishnan. 2nd Revised Ed. 300-00

Sarvadarsana Samgraha. Translated by E. B. Cowell and A. E. Gough 100-00

प्राप्तिस्थानम्—चौखम्बा संस्कृत सीरीज आफिस पो० बा० १००८, वाराणसी

चौ. सं. सी. १०८

योगसिद्धान्तचन्द्रिका

डॉ० विमला कर्नाटक